Shri Raghunath Temple MSS. Library,
JAMMU

No. १५०१

Title गदाधरी कारिकाव्याख्यां
अवयव ग्रन्थ टीका

Author गदाधर,

Extent १४६ Age a

Subject न्याय शास्त्रं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

गादाधर्यां काशिकाख्यायां

अवयवग्रंथटीका

१५०१

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

[illegible]

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

=निरुक्तमितिनिरूपितमित्यर्थः=५

ग०टी० १ श्रीगणेशायनमः॥अनुमानंनिरूप्येति॥लिंगपरामर्शरूपानुमानस्यतत्करणमनुमानमितिलक्षणंतच्चलिंगपरामर्शइतिस्वरूपंअथानुमानं
नप्रमाणमित्यादिनाप्रामाण्यंतच्चानुमानंत्रिविधमितिविभागंचोक्तेत्यर्थः॥अनुमानादिविशेष्यकत्वलक्षणादिप्रकारकप्रतिपत्त्यनुकूलोयो
व्यापारस्तदुत्तरकालीनोयोलक्षणादिप्रकारकन्यायादिविशेष्यकप्रतिपत्त्यनुकूलोव्यापारोऽव्यवहितोत्तरकालकर्त्तृत्वेनतद्बोधनंयत्त
दनुकूलकृतिमानुमप्रिकारइतिबोधः॥आद्योव्यापारस्तत्करणमित्यादिशब्दात्मकःद्वितीयोऽनुमितिचरमप्रोत्सादिशब्दात्मकःबोधनं कार
चतच्चेत्यादिग्रन्थः॥अत्रस्वार्थानुमितौअप्रमाण्यज्ञानानास्कंदितपरामर्शत्वेनहेतुता॥परार्थानुमितौतुन्यायप्रयोज्यविजातीयपरामर्शत्वे
नतस्याप्रामाण्यज्ञानास्कंदितत्वात्॥नचानुमितित्वपरामर्शत्वाभ्यांसामान्यतएवकार्यकारणभावःस्वार्थानुमितिप्रतितुअप्रमाण्यग्रहा
भावोऽधिकइतिवाच्यम्॥तथाप्यप्रामाण्यज्ञानास्कंदितात्न्यायाप्रयोज्यपरामर्शात्परार्थानुमितिप्रसंगवारणायोक्तवैजात्यस्याव
र्थत्वपरा॥४ श्यकत्वात्॥तथाचविभिन्नसामग्रीप्रयोज्यतावच्छेदकतयास्वार्थत्वेऽनुमितित्वव्याप्यजाती॥करणेतुस्वार्थानुमितिकरणत्वंस्वार्थत्वंप
रार्थानुमितिकरणत्वंपरार्थत्वमितिविभागस्तदसत्॥परार्थस्थलेऽप्रामाण्यज्ञानास्कंदितादनुमित्युपगमेन्यायजन्यज्ञानस्यैवोपनय त्वेवः
र्थविषयकत्वेनमूलेपरामर्शान्तरस्वीकारवैयर्थ्यात्॥अप्रामाण्यज्ञानास्कंदितात्तस्मान्नानुमितिरितिमिश्रमतेऽभिधानात्॥निरुक्तम १
नुमानमितिव्याख्यानाच्च॥अप्रामाण्यज्ञानास्कंदितानुमानस्य॥निरुक्तत्वात्॥एकहेतुकन्यायाधीनपरामर्शद्वैतात्साध्यव्याप्यहेतुमत्तरभा

परामर्शरूपतया[illegible]-२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

एवं विवादकाले तेन्यानुमानं न साध्यनिश्चये पितद्गताप्रयोजकविरहशंकया तत्र प्रामाण्यपशंका याअनिर्णतेसत्प्रयोजक
=आदिना प्रतिबंधकत्वादिग्रहः=१ आयसाध्योनुमिति विषयत्वतानस्याबस्य करत्वार्थं न्यायसाध्यत्वम् २

त्य नेऽनुमितेर्जातिसंकराद्यापाताच्चेत्यतोऽन्याचष्टे परार्थेति। विपरीतोद्भावकपरविजिगीषया न्यायप्रयोगो विचारः। तद्द्वारा यामित्यस्य निश्चयेऽन्व

यः। तत्प्रयोज्यपरामर्शोत्तरकालीन इति यावत्। परोर्थः प्रयोजनं यस्येति विग्रहः। संशयस्य दुःखहेतुत्वात्तन्निवृत्तिः प्रयोजनत्वमिति तद्भिन्नार्थकं

तान परपदं। अर्थात् साध्यव्यापकादिविलाभः। संशयसामग्रीसूचनाय न्यायसाध्यत्वान्वयापच विवादेति। ~~येन संशय...~~

~~नं युक्तमिति शंकापि~~ निरस्ता। परामर्शस्यानुव्यवसायादि प्रयोजनकत्वेन्यायसाध्यत्वस्य प्रयोजकत्वात्तथानोक्तं न्यायजन्यशाब्दबोध

प स्योऽन्यार्थे [illegible] प्रामाण्यग्रहस्यं दितत्वेन लिंगसंशयद्वारा साध्यसंशयहेतुत्वमिति। किंत्विदित्याकांक्षायां दत्तः अनुमानमित्युक्तं। साध्यप

दं तु जन्यत्वार्थकमिति [illegible] साह। वादीति। ज्ञायमानेति। एतन्मते न्यायोपयोगसमर्थनार्थं। न च तन्मते विशेष्यस्य ज्ञानस्य लिंगतास्थले न्या

यसाध्यतासंभवः एवं विनिगमनाविरहेण विशेषणस्यापि हेतुत्वात्तत्र तत्संभवेन तद्विशिष्टस्य संगतमिति वाच्यम्। परार्थानुमानत्वाव

च्छेदेन न्यायसाध्यत्वप्रदर्शनार्थं तथाभिधानात्। पूर्वं केवलान्वयिग्रंथे ऽनुमानस्यैवानुमितेरपि त्रैविध्यस्य प्रदर्शितत्वात् तत्त्वानुमान

मिति मूलस्यानुमित्यर्थकत्वमाह। यथेति। एतत्कल्पेतत्तूक्तलक्षणालक्षितमित्यर्थः। वस्तुतस्तु विवादनिवर्तकत्वस्य शब्दतोलाभायाह। न्याय

वेति। नन्वनुमानस्यैव न्यायज्ञानप्रयोजनत्वात्तस्य साध्यसंशयनिवर्तकत्वरूपपरार्थत्वसंभवादनुमितिरितिव्याख्यानं व्यर्थमिति चेन्न।

अनुमितित्वतृतीयक्षणपर्यंतं संशयोच्छित्तेर्विवक्षितत्वात्लाभायतद्व्याख्यानात्। पूर्वोक्तार्थासंभवादाह। परार्थमिति परत्वमुक्तरूपत्वम्

अविप्रतिपन्नसंशयनिवृत्त्यनुभवः=१

यस्मादितिर नुत्व संश दस्या स पदार्थत्वा भावात्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

उपदर्शितमिति तद प्रदर्शने ग्रंथमवगमे प्रवृत्त्य उपपत्तेः सद्धेतु प्रयोज्यत्वान्निर्णयां ... तरालाभात् ४
साधनानुदितस्य तेनिभावः

ग०टी० तद्दुःखसाधनाभावे संशयनिवृत्तावक्षतमिति तस्यां प्रागुक्तपरार्थपदार्थत्वाभावेपि न क्षतिः ॥ विजयप्रयोजकत्वमपि दर्शयति परस्ये
२ तिपरापरकीयानिवृत्तिर्यस्मादित्यादौ समस्यमानपरपदे पि लक्षणा स्यात् अतस्तन्नोक्तं । प्रतिवादिनिवृत्तिश्च प्रतिवादिसिद्धार्थज्ञाने प्रा
२ माण्यज्ञानसंपादनम् । एतत्कल्पेनुमितिरिति व्याख्यानमावश्यकं परामर्शे ईदृशपरार्थत्वाभावात् एतेन परार्थत्वाद्यभिधानेन । निरू
पणेति । न्यायतदवयवनिरूपणेत्यर्थः । सल्लिंगपरामर्शमात्रस्य न्यायज्ञानप्रयोजनत्वव्यवच्छेदायैवकारः । ननु अनुमितिनिरूपणानं स्वार्थानुमि
तरं न्यायनिरूपणे का संगतिरित्यत आह कारणत्वमिति । प्रयोजकत्वस्य हेतुत्वानंतर्भाविप्याह स्मरणेति । प्रथमकल्पे स्वप्रयोज्यानु ते ४
मितिप्रयोजकत्वं संबंधः तच्चित्यादिना कथ्यते । स्वमनुमानं स्वप्रयोजकत्वं तु सुगमं । द्वितीयकल्पे च स्वप्रयोजकानुमितेः प्रयोजकत्वं सं
बंधः । परार्थे [illegible] न्यायसाध्यमित्यादिना कथ्यते । स्वसंशयनिवृत्तिः । स्वप्रयोज्यसंशयनिवृत्तिप्रयोजकत्वं तु सुगमम् । एतादृशसंबंधज्ञा
नसहितादनुमानादिज्ञानान्न्यायरूपापरसंबंधिस्मृतिरित्यर्थः । प्रसंगश्च न्यायत्वादिः को न्याय इति जिज्ञासायामनंतराभिधानात् ।
क गुरुमतिविषयत्वेन व्यापनीयो ध्याद्वितीयादिमते । इति पदं प्रक्रांतसाधकत्वार्थकं पंचम्यंतं । तथा च अनुमानादिविशेष्यकलक्षणादिप्र हेत्वंशः
कारकप्रतिपत्त्यनुकूलो यो व्यापारस्तदुत्तरकालीनो यो वर्तमानो न्यायनिष्ठसाधकताज्ञानजन्यजिज्ञासाधीनो लक्षणादिप्रकारकप्रतिप २
त्त्यनुकूलो व्यापारस्तज्जन्यफलविशेष्यो न्यायादिरित्यर्थः । तदवयवा इति तत्पदं न्यायत्वघटितधर्मपुरस्कारेणैवावयवनिरूपणात् ।

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

भाग। उदाहरणेनेति। ननु सपक्षसत्त्वविपक्षासत्त्वयोः कथं व्याप्तिघटकत्वमिति चेत्। प्राचां मते साध्यवदन्यावृत्तित्वमिति साध्यसामानाधि
करण्यस्यैव व्याप्तित्वात्। तथा चोदाहरणस्य व्याप्तिबोधकत्वे तदुभयबोधकत्वमक्षतमिति भावः। केचित्तु अनयेन पक्षसत्त्वादीनामुत्त
रकालीनो मानसबोधः। एवमवयवान्तरेभ्योऽपि सपक्षसत्त्वादीनामित्यग्रे स्फुटमित्याहुः। निगमनेनेति। तत्पदस्याबाधितत्वादिविशिष्ट
लिंगे लक्षणा। परे तु प्रतिज्ञाहेतुभ्यां लिंगज्ञाप्यसाध्यबोधे न पुनः तादृशसाध्यबोधे किं प्रयोजनमित्याकांक्षायामबाधितत्वादिबोध
नस्यैव प्रयोजनत्वं वाच्यं तच्च हेतुरबाधितत्वादिमान् साध्यनिष्ठहेतुज्ञाप्यत्वबोधकवाक्यान्तरवाक्यबाधितसाध्यनिष्ठहेतुज्ञाप्यत्वघ
टकहेतुत्वादिति शब्देत्याहुः। मोक्षस्यात्र पदस्य लक्षणावाक्य इति नार्थः तस्य प्रतिपादकत्वप्रतिपादकत्वादेतोऽव्याचष्टे। समस्तेति। लिंगं स
पक्षसत्त्वादिरूपनानाधर्मवद्विषयाकारकैकवाक्य इत्यर्थः। न्यूनतां परिहरति। इत्थमिति। तादृशशाब्दबोधप्रयोजकवाक्यपंचकमात्रवृत्ति
समुदायत्वोक्तिर्नायं दोषः। मात्रपददानात्। कोऽवह्निमानित्यादिप्रश्नवाक्यव्युदास इति चेत्। लिंगपक्षवृत्तित्वसपक्षवृत्तित्वादिवाक्यपंचके
ऽतिव्याप्तिः। प्रतिज्ञात्वादिना वाक्यनिवेशे च प्रयोजकतां तद्वैयर्थ्यात् सिद्धान्तलक्षणपर्यवसानं। स्वार्थविशिष्टज्ञानमित्यत्र कर्तेति लक्षणेऽक
मत्व ज्ञानं निवेशयन् तन्मुपाध्यायानां मतमादर्शयति। अनुमितीत्यादि। चरमेत्यनुमितिजनने स्वोत्तरभाविज्ञानानपेक्षत्वं। एतत्तु स्वार्थानुमितिजन
कमानसपरामर्शजनकबोधजनकस्य वह्निव्याप्यधूमवानयमितिवाक्यस्य वारणाय चरमेति। अनुमित्साऽर्थचरमापरार्थस्यैवेति नतु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

सहचारग्रहत्वप्रदर्श्य व्यापकत्वतात्पर्यग्राहकं २

ग० टी० च्छं चरमगापितत्वस्य चरमपदार्थत्वापातात्। महावाक्यार्थबोधस्येति विशिष्टैकार्थतापन्नबोधस्येत्यर्थः। स च निगमनैकार्थतापन्नोप

३ नयार्थस्तद्विधेयकउदाहरणार्थान्वितयोहेत्वर्थान्वितप्रतिज्ञार्थस्तदुद्देश्यकबोधोऽनुषंगपक्षे उपनयार्थे निगमनार्थान्वयेनबो

ध्यः। उदाहरणवाक्ये च यो यद्रूपसमद्रूपस स यथा महानस इत्यस्य च तात्पर्यग्राहकत्वमात्रं। वह्निपदस्य धूमव्यापकवह्नौ लक्षणा। धू

३ मवत्पदार्थे तद्वृत्तौऽभेदान्वयात् धूमव्यापकवह्निमदभिन्नधूमवानुदाहरणार्थः। उदाहरणार्थकृत्स्नवच्छेदकतानिरूपितहेत्वर्थ

घटितप्रतिज्ञार्थोद्देश्यतानिरूपिताया निगमनार्थावच्छिन्नोपनयार्थविधेयताया अच्छालिशाब्दबोधप्रतिज्ञादिपंचकत्वेन कारणत्वे

सा याय:॥ परिचायकेति तावदर्थबोधत्वादिना शाब्दबोधपदत्वलक्ष्यं प्रदर्श्य स्वयं निर्वर्तितत्वइतियावत्। यथा श्रुतत्यागे बीजमाह। अ

जि तद्दति। ननु प्रयोजकत्वात परित्यागे न्यायैकदेशेऽतिव्याप्तिस्तावदर्थबोधजनकताव्यापकवाक्यत्वोक्तौ च संभवादत आह। तादृशे

के ४ ति। न्यायज्ञाने एककारणता नानास्वपर्यैककारणतामादाय तु प्रतिज्ञादौ न्यायैकदेशेऽतिव्याप्तिरिस्यत आह। यादृशयादृशेति। अग्नेय श्रीः

यि यति च वीप्सेन्यायाविषयेनेति तुनो कं सकलांतर्गतानुपूर्वीविषयितानिरूपकवर्णोपसिद्धिः। ननु तत्तद्धर्मावच्छिन्नत्वमंस्यवर्णएव

पा २ न सर्ववर्णेष्वित्यत आह। तादृशेति। यो दृशधर्मश्चेत् पर्वतो वह्निमानिति वाक्यनिष्ठानुपूर्वी तदाचद्विशिष्टवाक्यसमुदायत्वं तत्संकारवाक्य हेरंबः ३

सहस्रघटितसमुदायस्य न त्वेकवाक्यघटितस्य न्यायस्यत्यसंभवइत्यत आह। यत्स्यपिकाष्टितत्यत्तु तावदर्थबोधकारणतावच्छेदकविषय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विषयकत्व २ व

तावच्छेदकसमुदायस्यं न्यायत्वं न्यायघटकतावद्वर्णवृत्तिसमुदायत्वावच्छिन्नविषयतात्वेन कारणतावच्छेदकत्वात्। न च तादृशपर्या
त्वात् प्तिसमुदायत्वेन न हेतुत्वं आनुपूर्वीशून्यतद्घटकसकलवर्णसमुदायत्वज्ञानसाधारण्यात्। नाप्यानुपूर्वीविशिष्टसमुदायत्वज्ञानत्वेन। ता
दृशानुपूर्वीविशिष्टनिगमनमात्रवृत्तिसमुदायत्वज्ञानसाधारण्यादिति वाच्यम्। तथाविधसमुदायत्वविशेषावच्छिन्नज्ञानत्वेनैव हेतुत्वो
पगमात्। तादृशसमुदायत्वविशिष्टविषयितात्वेन याप्तितुल्यनिरूपकनिष्ठतादृशविषयितानिरूपकतावच्छेदकसमुदायत्वं। तत्र च
न व्यापकत्वादिप्रवेश इति मतं तन्निराकर्तुमाह। तादृशधर्मश्चेति। समुदायत्वमाकांक्षादिमत्पदसमूहत्वं। तत्र समूहत्वज्ञानस्यानुपयु प
क्ततया ऽऽकांक्षाज्ञानत्वेन हेतुत्वं फलितं आकांक्षा चानुपूर्वीविशेषः। महावाक्यार्थघटितत्वलक्षणे तोपि दर्शापनयोत्तरत्वविशिष्टनिग
मनत्वरूपानुपूर्वीज्ञानत्वेनैव हेतुत्वमिति उक्तकार्यकारणभावस्याप्रामाणिकतया न्यायत्वरूपसमुदायत्वेन तादृशविषयतावच्छेद
कत्वासंभवात्। पर्वतो वह्निमानिति शाब्दबोधे आनुपूर्व्यन्तरसाधारणतत्सामान्यं न कारणतावच्छेदकघटकमिति विशेषपदम्। मनो
गा योगादिकारणतायां योग्यताज्ञानादिविषयाकारणतायां यद्यदर्थान्तर्गतत्वे तदवच्छेदकविषयितानिरूपकवर्णाप्रसिद्धेराह। शब्दज्ञा
घा नविष्टेति। तत्वं चैतदवच्छिन्नविषयितापर्याप्तिकधर्मानवच्छिन्ननिर्णयत्वावच्छिन्नत्वम्। तात्पर्यशब्दोभयसमूहालंबनेन तात्पर्यज्ञानत्वा
वच्छिन्नकारणतायास्तादृशविषयितानवच्छिन्नत्वात्। योग्यताशब्दोभयसमूहालंबने च योग्यताज्ञानत्वावच्छिन्नकारणताया निर्णय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग०टी० त्वानवच्छिन्नसाध्युदासः हितुतयेति। यद्यपिसमानासमानानुपूर्वीकनानावाक्यविषयित्वान्यतमविषयिताशालिज्ञानत्वेनपर्वतोवह्निमानि
४ त्याकारकबोधंहेतुत्वेयत्तिविच्छादृबोधानुधावनमफलंच तथापिकारणानंतरत्वविशिष्टशाब्दबोधंप्रतिअसमानानुपूर्वीकवाक्यानुतरजा
क २ दृशशाब्दबोधंमतिवापृथक्कारणताकल्पनदावश्यकं। पर्वतोवह्निमान् पर्वतोदहनवानितिवाक्ययुगलोचरशाब्दबोधस्यचसमाना
वाच्य नुपूर्वीकज्ञानविरहविशिष्टसमानानुपूर्वीकवाक्यज्ञानानुतरत्वं निविश्यकार्यतानिर्वाहः। अनुगतरूपं। पूर्वपूर्ववर्णविषयत्वानिरू
पित चरमवर्णविषयतात्वादि। प्रतिज्ञादिघटकतावच्छेदकरूपेण। घटकवर्णघटितसमुदायत्वारणाय। समान्यज्ञानं वाच्यम्। समाना
नुपूर्वीकवाक्यनिश्चयत्वेन हेतुत्वादानुपूर्वीसाधारणविषयत्वव्यापकत्वासंभवाद्वर्णत्वनिवेशः। वर्णत्वं चकत्वादिव्यापकजातिवि
शेषं। [redacted] प्रतिज्ञादिपंचकघटकैकदेशवृत्तिसमुदायेऽतिप्रसंगइति [redacted]। विनिगमनाविरहेण।
प्रतिज्ञाघटकवर्णसमानकारणतानीलक्षणघटकत्वाचावच्छेदकविषयताश्रयवर्णवृत्तित्वस्यतत्समुदायत्वेऽसत्वात्। साक्षादव
पर २ च्छेदकतानुनिवेश्या। अन्यथापरंपरयावच्छेदकविषयताश्रयत्वस्यविधेकदेशवृत्तित्वेनातिप्रसंगानुद्धारप्रसंगात्। नचविषयतायांसाक्षा त्वसहरंबः
दवच्छेदकत्वं विवक्षितुमशक्यमेवातद्विशिष्टज्ञानत्वस्येतथात्वादितिवाच्यम्। ज्ञानत्वस्यविशेषणविधया ज्ञानीयत्वेनविषयतायाएवसाक्षाद २ ४
वच्छेदकत्वात्। मैवंयत्न। किंचिद्वर्णवृत्तिविषयतायामेवकारणतावच्छेदकत्वं इतरविषयतानांच दत्तवच्छेदकत्वमितिरीत्याप्रतिज्ञाप्रतिपाद्या।
दक १ ए २ व्यापकत्वनिवेशः संत्वेपवत्यर्थः ५
CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यत्तु[redacted]॥२   आनुपूर्वीज्ञानसाधारण ५
ज्ञाना ९२   अनुगतत्व=२

थवोधीयाएकाकारणताहेत्वंघथवोधीयाएकेककारणतेतिपंचैवकारणताः प्रवेश्याः नतु याक्यो महागौरवादितिव्यापकत्वोपाद
नात्[redacted]वाक्यार्थबोधतद्घटकसकलवर्ण[redacted]ज्ञानानामेव हेतुतयाप्रत्येकं सकलवर्णविषयता[redacted]वकारणतावच्छेद[redacted]लाद क्रा: एवं च
शीयायाकारमानानद्वच्छेदकविषयताश्रयवर्णवृत्तिसमुदायत्वस्यैवलक्षणत्वस्य सुवचनत्वाज्जातिविषयताकारणतायवर्णत्वस्या तत्र
वश्यकत्वेपि व्यापकत्वस्य व्यर्थमिति[redacted]तत्तुच्छम्। विर्म्मृकलतावद्रूपोज्ञानादिनावाक्यार्थबोधवारणाय यत्तद्वाक्यार्थबोधे तद्वाक्यानुपू
वक्रम वीज्ञानस्यैव हेतुतायाः अवश्य[redacted]तयोक्तहेतुतायानिर्वाहकत्वात्। पदपि वाक्यघटकवर्णानां प्रत्येकं न हेतुता गौरवात्। किंतु तावद्वर्ण
विषयताशालिज्ञानत्वेनैकहेतुतैव। एवं च अवच्छेदकीभूततावद्विषयतानिवेशेनोपपत्तेर्व्यापकत्वं व्यर्थमेव। परंतु व्युत्क्रमोच्चरितप्रतिज्ञा
ट दिघटकवर्णसमुदायत्ववारणाय स्वाश्रयीभूतप्रतिज्ञादिघटकाद्यद्वितीयवर्णाव्यवहितोत्तरत्वशून्यत्वघटकद्वितीयादिवर्णवृत्तित्वसमुदायत्वं
तद्रूपत्वं निवेश्यमिति तदपि तुच्छतरम्। तथा सति तद्वाक्यघटकव्युत्क्रमोच्चरितसकलवर्णज्ञानाच्छाब्दबोधवारणाय तत्प्रतिबंधकत्वे[redacted]
[redacted]प्रसंगात्। केचित्तु वर्णज्ञानानामपि हेतुता परंतु याः याः कारणता इत्यत्र किंकतिपयकारणता उपादीयते उत सकलाः। आद्ये कतिपयका
ए रणतावच्छेदकीभूतविषयताश्रयवर्णसमुदायत्वस्य वाद्ये कदेशेऽतिव्याप्तिः। अंत्ये सकलकारणतावच्छेदकैकविषयित्वाप्रसिद्धेस्तादृशैकविषय ये
यितानिरूपकवर्णवृत्तित्वविशिष्टत्वादृश्यापरविषयितानिरूपकवर्णवृत्तित्वविशिष्टत्वादिरीत्या निवेशे विशेष्यविशेषणभावे[redacted]विनिगमना व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्व२ त्वक्ताव्यापकत्वमेवविवक्षितम्। एतेनतादृशयत्किंचिद्वर्णत्वव्यापक. २

ग०टी विरहेपापर्वतोवह्निमान्पर्वतोदहनवानित्यादिन्यूनाधिकवर्णघटितप्रतिज्ञाभेदेनचलक्षणानंत्यमतआनुपूर्वीज्ञानेहेतुतामात्रंव्यवच्छे
५ दमुपवर्णितमित्याहुः। यत्तुवर्णत्वंकत्वादेर्नान्यत्। एवंचतादृशयत्किंचिद्वर्णत्वमेकदेशत्वेगतं। नत्तद्वर्णत्वव्यापकत्वंतुसकलतत्तद्वर्ण
कु२ त्वाधिकरण्योकाऽप्रसिद्धिग्रस्तंतादृशैकवर्णव्यापकत्वेसतितादृशापरवर्णव्यापकत्वेत्यादिचोक्तदोषग्रस्तमित्यपास्तम्। यत्किंचिद्वर्णत्वव ल
हि त्वावच्छिन्नविषयितासमानाधिकरणतादृशावच्छेदकीभूतविषयितानिरूपकत्वविशिष्टतादृशविषयितानिरूपकतावच्छेदकवत्त्वंसंबं
धेन। स्वप्रतिज्ञादिघटकतावच्छेदकपत्वादितिनरूपेणतद्घटकवर्णभ्रमस्यापिप्रतिज्ञादिप्रतिपाद्यार्थबोधकत्वात्तत्साधारण्यसमु
दायवारणाययनिरूपकतावच्छेदकपर्वेशः। भ्रमान्यत्वंतुननिवेश्यंगौरवात्। स्वावच्छिन्ननिरूपकताकत्वस्वान्यधर्मावच्छिन्ननिरूपक
त्व ताकत्वोभयाभाववत्तादृशविषयितानिरूपकत्वेसतिस्वावच्छिन्नत्वस्वान्यधर्मावच्छिन्नत्वोभयाभाववत्तादृशविषयितानिरूपकत्वेस वा
तितादृशनिरूपकतावच्छेदकवत्त्वंवासंबंधः। एवंचदृशसंबंधेनवर्णत्ववत्ताश्रयेकदेशवारणायव्यापकत्वप्रवेशः। व्यायाकारणते
तिग्रंथतात्पर्यमप्यत्रैवेतितत्तुच्छम्। [redacted]। अस्मन्मतेकोवर्णः खोवर्णइत्यनुग हेरंब:
मन२ तमतिसिद्धंवर्णत्वं[redacted]तादृशेति। प्रतिज्ञात्वादिकमादायासंभववारणाय व्यापकांतं तत्रसकलपदोपादानंच। तयाचनिरूपक ५
यत्किंचिच्छाब्दबोधनिरूपितसकलजनकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तिचानिरूपकंयद्यत्

२ तथासतिनिरूपकतावच्छेदकधर्मेणकधर्मविद्वर्णजातिवारणेपिसांसर्गिकविषयितास्थलेतादृशवारणेपिनविशिष्टपत्वादिजातिवेशावश्या
गादिर्दृशस्तस्यदृशी [illegible] यधेरयत्किंचिदेकवर्णत्वस्यत्वंसर्वभासमानसुप्तेनदेद
रापरेपराबाःसंबंधत्वेमाभाव:- तादृशप्रत्यादिमत्वस्यन्यायदपादेसत्वारसंघकयोर्नकिंचिदेतत्. २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यत्प्रतियोगितावच्छेदकं पदस्थितिरिक्तत्वरूपत्वं संबंधात् निवेश्यतादृशसमुदायत्वमित्यनेन तादृशवर्णत्वसमनियतसमुदायत्वनिवेशेन धात्वंतरसा
धारणसमुदायत्वं वार्यं नेत्यत्र प्रतिज्ञादेस्तादृशसमुदायत्वे यनिष्ठन्यूनवृत्तितानिरूपकत्वेन वारणात् ६

मुदायत्वं तद्भिन्नं यत्तादृशवर्णत्वव्यापकसमुदायत्वं तद्वत्त्वमिति दलद्वयार्थः। तन्न तन्न्यूनवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदक
त्वे सति स्वसामानाधिकरण्यम्। न चैवं स्वाधिकरणं यत्स्वैकप्रतिज्ञादि तत्र न्यायत्वावच्छिन्नभेदसत्त्वेनासंभव इति वाच्यम्। स्वावच्छि
न्नानुयोगिताकभेदप्रतियोगितानिवेशात्। प्रतियोगितायां चानुयोगितासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं देयं। तेन वा
क्यांतरसाधारणसमुदायत्वस्य न्यायत्वन्यूनवृत्तित्वेपि नासंभवः। स्वसमानाधिकरणभेदप्रतियोगितायाः पर्याप्त्यघटितस्वरूपसंबंधे
नावच्छेदकत्वं वा वाच्यम्। उच्चारणभेदेन न्यायभेदादिकन्यायत्वस्यापरन्यायत्वनिष्ठन्यूनवृत्तितानिरूपकतयाऽसंभव इति स्वसामानाधि
करण्यनिवेशः। तादृशवर्णत्वनिष्ठन्यूनवृत्तितानिरूपकत्वोक्तावसंभव इति समुदायत्वव्यापकत्वयोर्निवेशः। एवं च घटमानयेत्यादिवाक्यत्व
वारणाय दलांतरे व्यापकांतं। तत्र प्रतिज्ञाहेतुसमुदायादिवारणाय यावत्त्वकारणतानिवेशः। समुदायैकदेशभेदस्यानुयोगितावच्छिन्न यद्वा ५
प्रतियोगिताकभेदसामानाधिकरण्यं तादृशानुयोगितावच्छेदकत्वे वा सति स्वसमानाधिकरणत्वं तत्। प्रत्येकप्रतिज्ञात्वादेरपि वारणाय
दलांतरे व्यापकांतं। एवं च तत्तन्न्यायत्वरूपतादृशसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वसत्त्वात् यमेकैकन्यायघटकवाक्यपंचकत्व
त्वसमुदायत्वमादाय नातिव्याप्तिप्रसक्तिः। यदि च दलांतरे तावदर्थविषयकयच्छाब्दबोधो निवेश्यते एतद्दलेपि तच्छाब्दबोधव्यक्तेरेव नि
वेशान्न दोष इत्युच्यते तदा फलोपधायकतानिवेशपर्यवसानापत्तेः। नियमेनोत्थाकांक्षानरार्थविषयकशाब्दबोधप्रयोजकवाक्यानां स्वधि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

[illegible]

ग०।टी० तत्समुदायत्वद्वयपरोपयोगाद्ता नैष्पत्तिव्याप्तिरशक्यसमाधाना कस्मात् एवं न्यायत्वेप्येकैकन्यायघटकवाक्यपंचकवृत्तिसमुदायत्वनिष्ठ
९ न्यूनवृत्तित्वानिरूपकत्वसत्वादसंभवश्चेति चेन्न। यत्किंचित्तादृशसमुदायत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे सति तदन्य
त्वंहितादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वं। अवच्छेदकत्वंच पर्याप्तिघटितसंबंधेन सामान्यतस्तादृशसमुदायत्वनिवेशेपर्व
तो वह्निमान् पर्वतो दहनवानित्यादिन्यायत्ववति एकतरन्याये [redacted] वाक्यांतरसाधारणसमुदायभेदसत्वेनातिव्याप्तिरतो यत्कि
ञ्चित्त्वनिवेशः। असंभववारणाय तदन्यत्वनिवेशनं। स्वसमानाधिकरणयत्किंचित्तादृशसमुदायत्वावच्छिन्नभेदसमानाधिकरण्यं तु समु
दाये एकदेशभेदोपगमापत्तिग्रस्तम्। व्युत्क्रमप्रयुक्तत्वं सामान्यतः प्रतिज्ञात्वत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तद्भिन्नत्वं अन्नेचान्ते वप्रतिज्ञा
यांस्वाश्रयत्वनिवेशो ऽधिक इति भेदः प्रतिज्ञादिपदं च तत्समानानुपूर्वीकवाक्यपरम्। अव्यावर्तकपदार्थभेदानिवेशलाभाय समुदायत्वमिति।
एकैकेति। अत्रैकन्यायघटकप्रतिज्ञान्यायांतरघटकं हेत्वादिचतुष्टयं एकन्यायघटकवाक्यद्वयमपरत्रत्रयघटकवाक्यत्रयं क्रमिकमित्यादिदृ
ष्टांततत्समुदायत्वमादाय तत्तत्पंचकेप्यतिव्याप्तिर्बोध्या। स्वाश्रयीभूतेति। इदमसंभववारणाय। ननु एतादृशपरिचायकरूपेणैव व्युत्क्रमप्र
युक्तप्रतिज्ञादिसमुदायातिव्याप्तिर्वारयितुं शक्यत्वात् व्युत्क्रमप्रयुक्तत्वादिव्यर्थम्। न च व्युत्क्रमप्रयुक्तेषु प्रतिज्ञात्वादिकं नास्त्येव किंतूदासीन हेरंबः ९
वाक्यत्वमेवेति वाच्यम्। प्रतिज्ञात्वादिकमित्यनेन विरोधात्। नापि स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यत्व यत्किंचित्प्रतिज्ञाद्युत्तरहेत्वा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ति द्विवृत्तिपर्याप्तीति विलक्षणान्नदोषइतियुक्तम्। यत्किंचित्प्रतिज्ञाघुत्तरत्वनिवेशवैयर्थ्यादिति चेन्न। तदा स्यादेव वैयर्थ्यं यदि स्वाश्रयीभूतेत्यादिना साम
ए भेद २ न्यधर्मावच्छिन्नत्वमित्येतावन्मात्रनिवेशः स्यात्तदेव न किंतु तत्तद्व्यक्तित्वेनैवेति युक्तमप्रयुक्तप्रतिज्ञा। द्विवृत्तिसमुदायत्वस्यापि भेदकूटस्यावश्य
कत्वात्। अथवा युक्तमप्रयुक्तप्रतिज्ञा। द्विवृत्ति यद्यत्समुदायत्वं तत्तद्भिन्नत्वमित्यस्य वैयर्थ्यमेवेति। अत एव दीधितिकृता एतन्न निवेशितम्।
एतत्साह्यासत्वेऽयं दिशोर्थोऽन्यथापूर्वविशेषणसार्थकमेवमितिबोध्यम्। अत्र च तादृशप्रतिज्ञाव्यवहितोत्तरत्वशून्यहेतुवृत्तित्वतादृशहेतुत्वव्यवहि
तोत्तरत्वशून्योदाहरणवृत्तित्वाद्यन्यतमविशिष्टान्यत्वस्य च वृत्तित्वस्याव्यवहितोत्तरत्वशून्यहेतुवृत्तित्वोभयसंबंधेन प्रतिज्ञाविशिष्टत्वस्य
वृत्तित्वस्याव्यवहितोत्तरत्वशून्योदाहरणवृत्तित्वोभयसंबंधेन हेतुविशिष्टत्वाद्यन्यतमविशिष्टान्यत्वस्य वानुगतस्य निवेशः। अत्रानुपूर्व्यां
त चरमवर्णपर्यवसितत्वेन चरमवर्णविषयताया एव साक्षादवच्छेदकत्वं अतः साक्षात्परंपरासाधारणावच्छेदकत्वाभाय कोटिप्रविष्टम्युक्त चे
तत्वस्य प्रक म्। अवच्छेदकतावच्छेदकसाधारणावच्छेदकतायां मानाभावे ... विनिगमना। विरहेण पूर्वपूर्ववर्णविशिष्टचरमवर्णत्वस्येव च
रमवर्णविशिष्टपूर्वपूर्ववर्णत्वस्यापि एवं पूर्वचरमवर्णविशिष्टमध्यमवर्णत्वादेरप्यानुपूर्वीत्वात्तादृशवर्णविषयतानां साक्षादेवावच्छेदक
विष्ट २ त्वं संभवति परंतु लाघवीयापाकारणता तत्तदवच्छेदकप्रविषयितानिरूपकवर्णवृत्तिसमुदायत्वनिवेशेनैवैकदेशवृत्तिसमुदायत्वा
रोपाव्यापकत्वनिवेशवैयर्थ्यं। अ[illegible]मान्यत्वं तु कल्पद्वय एवेति नोदासीनसाधारणसमुदायत्वमादाय। तिव्याप्तिरित्युपाध्यायमतनिष्कर्षः॥ कुः

केचित् ... ४

पि ४

पर्याप्तिघटितसंबंधेन ५

तावुत्तरत्वकेन २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

५

ग॰टी॰ ८ अ[redacted]ताकद्दर्थविषयकयत्किंचिच्छाब्दबोधजनकयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिवेशादेवोपप
न्नो किमवच्छेदकत्वाकूटोपादानेनानेनैवं प्रतिज्ञाद्यर्थविषयकघटमानयेत्यादिवाक्यार्थविषयकसमूहालंबनयत्किंचिद्बोधव्यक्तिमादाय
घटमानयेत्यादिवाक्यघटितसमुदायेऽतिप्रसंग इति वाच्यम्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वविशेषणेन वारणात्। अन्यथा
त्वन्मतेप्यधिकवृत्ति समुदायत्वे तादृशवर्णत्वव्यापकत्वसत्त्वेनातिप्रसंगस्य दुर्वारत्वापत्तेः। न च तादृशानिरूपकत्वांतमपहाय तादृशाव
र्णत्वसमनैयत्यमेव निवेश्यं लाघवात्। तथा चोदासीनविषयकन्यायविषयकयत्किंचिज्ज्ञानमादाय न्यायोदासीनसमुदायेऽतिव्याप्ति
वारणाय व्याप्यकोटावच्छेदकत्वोपादानं व्यापककोटौ तद्द्वयं व्यर्थं विशिष्टमिति वाच्यम्। एवमपि न्यायद्वयार्थविषयकयत्किंचित्समूहा
लंबनबोधव्यक्तिमादाय न्यायद्वयसमुदायेऽतिव्याप्तिस्तद्विशेषणस्यावश्यकत्वात् तत एव घटमानयेत्यादिवाक्यघटितसमुदायेप्यतिप्र
संगानवकाशेनावच्छेदककोटिप्रविष्टविशेषणवैयर्थ्यस्य दुर्वारत्वात्। यत्तु वर्णत्वस्य कत्वादिरूपतया समुदायत्वे तादृशवर्णत्वव्याप
कतायाः संभवेपि न तद्व्याप्यतासंभव इति तावद्वर्णविषयताः एकन्यायवृत्तिविषयितामात्रवृत्तिरूपेणानुगमय्य तन्निरूपकवर्णत्वव्याप्य हेरंबः
त्वनिवेशान्न्यायद्वयवारणमिति। तन्तुच्छम्। वर्णत्वस्य कत्वादिरूपतानिराकरणात्। उक्तरीत्यैवोपपत्तौ अनुगमवैयर्थ्याद्गौरवाच्च। अत्रेदंस ८
माधानमवगंतव्यम्। तज्जनकत्वावैशिष्ट्यं स्वरूपसंबंधेनैव वक्तव्यं अन्यथा घटमानयेत्यादिवाक्येपि कालिकसंबंधेन जनकत्वविशिष्ट

अन्यतमत्वादिना=३ ता

ज्ञानमादायातिप्रसंगात्॥ अथ कालिकसंबंधेन तत्तज्ज्ञानजनकतावद्यत्किंचिज्ज्ञानविषयवर्णत्वव्यापकत्वस्य घटपटत्वस्वरूपस
मुदायत्वसत्वात्तन्निष्ठन्यूनवृत्तितानिरूपकत्वसत्वेन नातिव्याप्तिरिति चेत्॥ तर्हि तादृशप्रतिज्ञात्वादिकमादायासंभवः॥ अवच्छेदकताग
२ र्भापरदलस्य स्वरूपसंबंधेन यत्किंचिदेकत्वद्वित्वादिसंख्यायां निवेशान्न कोपि दोष इति चेत्॥ एवमप्यन्वयेवेऽतिव्याप्तिः प्रतिज्ञात्वादिस्तादृशन्या
यत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वात्॥ न्यूनवृत्तितदेकदेशत्वादेः सकलकारणतावच्छेदकविषयितानिरूपकत्वनिवारणाय वच्छेद वच्छे
कत्वनिवेशात्॥ नवोक्तवाक्यविषयितानामपि कालिकसंबंधेनावच्छेदकतावत्वात् स्वरूपसंबंधेनवत्तद्वत्वं निवेश्य
मेवं चावच्छेदकत्वनिवेशनमधिकमिति वाच्यम्॥ अवच्छेदकत्वं न प्रकारविधया प्रवेश्यते किंत्ववच्छेदकतासंबंधेन जनकतावत्त्वमेवेत्य
गौरवात्॥ एवं प्रतिज्ञादिज्ञाने कालिकसंबंधेन तत्तज्जनकतासत्वेनासंभव इत्यपरदलेपि संसर्गतयाऽवच्छेदकत्वप्रवेश इति वस्तुतस्तु
स्वरूपयोग्यज्ञानकन्यायसंग्रहाय वाक्यांतरघटितत्वतादृशन्यायवारणाय च स्वरूपयोग्यत्वाजनकतानिवेश्येति उक्तार्थपर्यवसानं रूप
एवं चावच्छेदकतायाः प्रकारतयैव निवेशे गौरवाभावात्॥ एवं विषयितानां विनिगमनाविरहेपानसाक्षादवच्छेदकत्वं संभवति॥ प्रागभा
वानुपगमे त्वासत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालवृत्तित्वरूपाव्यवहितपूर्वत्वस्यासत्तिद्वयघटितत्वेन गुरुत्वात्तयात्तद्घटितानुपूर्वी ॥२
विषयताया एवकारणतावच्छेदकत्वात्॥ पदार्थाद्यवच्छिन्नप्रकारताशालिनिर्णयत्वेनैव विनिगमनाविरहेण तादृशप्रकारतानिरूपितपदादिनि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तापदवेनत्रीतरत्वघटितानुपर्दसाच्छिन्नताननयेनैष कारणतानिवेशेनव्यापकत्वानिवेशनावश्यं भावात् ४

साक्षात् १

ग० टी० षावच्छेदकताशालिनिर्णयत्वेनापि जनकतायाः वक्तुं शक्यतया यावदंतर्गततज्जनकतावच्छेदकविषयिताकवर्णाप्रसिद्धेरसंभवाच्च न
८ वे चेदृशासंभववारणाय जनकतासु वर्णविषयितावच्छिन्नत्वमेव निवेश्यं पत्वाद्यवच्छेदकत्वावच्छिन्नजनकतानां वर्णविषयितानवच्छि
४ न्नत्वेन वारणादिति वाच्यम् तथा सति तथाविधजनकतावच्छेदकविषयिताश्रयवर्णवृत्तित्वनिवेशनैव सामंजस्ये वर्णत्वव्यापकत्वोपादान
वैयर्थ्यात् एवं सावच्छिन्नत्वावच्छेदकमात्रमात्रावच्छेदकतानिवेशनाभावेऽपि कोटिद्वयप्रविष्टत्वमुक्तं एतन्मतेन तु एकसकलवर्णविषयिता
वच्छिन्नावच्छेदकत्वात्र दोषः प्रविष्टत्वं च पर्याप्त्यनिवेशे सकला अयपत्वाद्यवच्छिन्नविषयितायाः साक्षाज्जनकतावच्छेदकतामतेज
त्व नकतासु वर्णव्याप्यजातिनिरूपितावच्छेदकत्वाख्यविषयिता तूक्तवच्छेदकत्वानिरूपितत्वमेव निवेश्यं तावतैव वर्णविषयिता निरूपित ये
जातिप्रकारित्वावच्छेद्यसकलजनकतासु पदासात् एवं च तथाविधायाया जनकतानत्तदवच्छेदकयत्किंचिज्ज्ञानीयविषयताश्रयवर्ण
वृत्तिसमुदायत्वनिवेशन एवोपपत्तेस्तादृशविषयताश्रयवर्णत्वव्यापकत्वमपि न निवेश्यमिति महालाघवमिति चिन्त्यम् एवमपि पत्वाद्यव
च्छिन्नप्रकारितानिरूपितत्वे सत्यत्वाद्यवच्छिन्नविशेष्यितानिरूपिताव्यवहितोत्तरत्वावच्छिन्नसांसर्गिकविषयताशालिनिर्णयत्वाव हेरंबः
च्छिन्नजनकताया विनिगमनाविरहलब्धायास्तादृश्या यावदंतर्गतैर्यातज्जनकतावच्छेदकविषयताश्रयवर्णाप्रसिद्ध्याऽसंभवापत्तेः प ८
दिवं जातिनिष्ठावच्छेदकत्वनिष्ठसाक्षादवच्छेदकत्वानिरूपकत्वे सति सांसर्गिकविषयतानिष्ठसाक्षादवच्छेदकत्वानिरूपिका [redacted]

दत्वितासानत्वावच्छिन्नतानाकारणताघटितानिरुक्तेः १

२ एवं चावच्छेदकतावच्छेदकसाधारणावच्छेदकस्येवादरणीयताः प्रविष्टत्वं च पर्याप्त्यनिवेशे स्फोरकमिति २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

[redacted]यायाजनकतावच्छेदकयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णवृत्तिसमुदायत्वनिवेशनेनैवोपपत्तौ तादृशवर्णत्वव्यापक म

गुरुतर त्वनिवेशवैयर्थ्यमुच्यते तदा तत्पदे लक्षणान्तरत्वान्न दोषः[redacted] अत्र सकलवर्णविषयतानां साक्षादवच्छेदकत्वं न त्वेकमवच्छेदकमन्यत्तदव

८ च्छेदकमिति [illegible] तत्पर्याप्त्यधिकरणविषयतावै[redacted]ऽप्रसिद्धिरतः प्रविष्टत्वपाद्गुः। यत्तु अवच्छेदकत्वानुपादाने फलोपधानरूपजनक

तोपादाने समानानुपूर्वीकेत्यादिदोषाप्रसरेऽपि न्यायान्तराविषयकत्वरूपं यत्किंचित्वं ज्ञाने निवेश्यं। एवं च न्यायद्वयविषयकज्ञानवारणाना

दृशवर्णत्वसमनेयत्स[redacted]पक्षोऽपि समंजस इति। न च न्यायलक्षणे न्यायत्वप्रवेशादात्माश्रय इति वाच्यम्। तावदर्थविषयकशाब्दबोध।

यसकलकारणतावच्छेदकयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकतराविषयकत्वस्य तदर्थत्वादिति तत्तुच्छम्। प्रतिज्ञानन्तरं हे यद्

तूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वादिरूपानुपूर्व्या अव्यापकत्वात्। समुदायत्वविशेषस्य तथात्वे पि[redacted]।

प स्वाश्रयीभूतप्रतिज्ञाद्यवहितोत्तरत्वसंबन्धेनेत्यादिदिशेति समुदायत्वभिन्नविशेषणेन न्यायद्वयत्वादिवारणे[redacted]। किं चोदासीनप्रतिज्ञोकदे तद्

[illegible] शन्यायोभयसमुदायत्वमुदासीनप्रतिज्ञान्यायोभयसमुदायत्वं चादाय तिव्याप्तिः। न्यायमात्रविषयकयत्किंचिज्ज्ञानसत्त्वेऽपि यत्किंचि

त्तदुभयज्ञान घटितता दृशवर्णत्वस्य तादृशसमुदायत्वव्यापकत्वसंभवात्। अथ तथाविधसकलकारणतावच्छेदकविषयितानिरूपक

वर्णत्वव्याप्यत्वं स्वव्यापकतादृशवर्णत्वकत्वं वा विवक्षितं न्यायत्वाश्रयस्य सकलकारणतावच्छेदकविषयत्वाभावान्न दोष इति चेन्न तदाऽसंभ

त्व४ वि

एकैकन्यायघटकवाक्यपंचकघटितसमुदायत्वमादायासंभवात् पर्याप्तिप्रवेशे नैव विवक्षायां पर्याप्तिः ५

तत्कारणतावच्छेदकविषयता श्रयवर्णत्वाभावरूप व्यवस्थापि ले त[redacted] निव्याप्तिः

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अत्रावीरप्रतिसादिपदे घटमानयेतिवाक्यांतरघटितेत्येद २

गु० टी वंकत्वयेति। यदपित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमात्रंन्यूनवृत्तित्वं। सामानाधिकरण्यनिवेशप्रयोजनाभावात्। नचैवमसंभ
१ वः। यज्ज्ञानीयत्ताद्दशत्तत्कारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वंसमुदायत्वेताद्दशत्तत्
१ त्कारणताश्रयतज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वस्यविवक्षितत्वात्। पूर्वदले ऽवच्छेदकत्वनिवेशान्न्यायोदासीनसमुदायेनाति
प्रसंगः। यदिचिद्दलद्वयेपिपघ ज्ञानत्तत्तज्ज्ञानेतिवीप्साहृत्वा ऽवच्छेदकत्ववेयर्थ्य ... यद्यर्थांतर्गतन्यायमात्रज्ञानमादायातिप्रसं ८
।सुअतेतदा ५ गवारणाय महागौरवं। यत्तुसामानाधिकरण्य ... घटितन्यूनवृत्तित्वप्रवेशेपितस्यप्रति ... त्वादिसाधारणतयासंभववारणायताद्दशसमुद
यत्वेतन्निवेशेताद्दशसमुदायत्वव्याप्यावृत्तित्वंवा। निरूपकांतार्थः। तत्रचानेकत्रसमुदायत्वनिवेशगौरवात्तमनेयस्यमेवसम्यगितितन्न।
त ५ असंभवभयेनताद्दशविषयतान्यतमविषयताश्रयनिवेशेन्यायोदासीनप्रतिज्ञासमुदायेतिव्याप्तिरितितत्तुच्छं। याद्दशन्यायव्यक्तिज्ञानो
त्तरंनकस्यापिशाब्दबोधः। तत्तत्संग्रहायत्स्वरूपयोग्यतायाएवनिवेश्यतयाज्ञानाभेदविवक्षावैयर्थ्यात्न्यायोदासीनप्रतिज्ञासमुदायेऽति
व्याप्तिरनुद्धारावा। यज्ज्ञानशब्देनतथाविधसमुदायज्ञानस्यैवधर्तुंशक्यत्वात्। यत्तुशाब्दबोधपदेविवत्वविशेषणेनन्यायद्वयादिवारणं देसंबः
।स्वाव्यवहितोत्तरोत्पन्नंज्ञानंतेनप्राधान्येतच्चैकैकन्यायार्थज्ञानमेवेतिन्यायद्वयाद्बोधप्रसंगः। भट्टाचार्याणामयमेवाशयइतितत्तुच्छम्। १
एवमपिन्यायोदासीनप्रतिज्ञाभयसमुदायेतिमापिरूक्तरीतिरावश्यकत्वेन्यायद्वयादौदोषस्यैवाप्रसरात्। यज्ज्ञानमादायव्यापकत्वंतदन्यय

समन्वयत्पपदे १

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

र्थमात्मत्वेन यावत्कोपि तत्तद्वर्णसमुदायरूपप्रतिज्ञाघटकत्व … र्थमित्यादि निवेशाभावात् ८

त्किं चिज्ज्ञानमादायापरदलनिवेशाद्वच्छेदकत्वैवेपर्थमिति तत्तुच्छतरमुक्तन्यायमात्रज्ञानमादाय व्यापकन्यायोदौ न समुदायत्वेन ज्ञानमा सौ

पत्र २ दायापरदलसत्त्वात् यत्र वच्छेदकत्वोपादानेपि उदासीनधर्मिकन्यायत्वभ्रमादेव शाब्दबोधस्तत्र न्यायेन्यायत्वेन तद्धर्मावगाहित्वायाश्र

प्यवच्छेदकत्वाद्व्याप्तिर्गमान्पत्वनिवेशेपि दुर्वारा एवं यत्र घटधर्मिकन्यायत्वभ्रमादेव शाब्दबोधस्तत्र न्यायत्वेन निरूपकत्वाभावात्सत्त्विना

व्याप्तिरिति तन्न तथाविधन्यायेमानाभावादिति इदं तु पक्षविनिना हेतुबोध्यं मुख्याश्रयीभूतप्रतिज्ञाद्यवहितोत्तरत्वरूपं स्यादोषप्रकृत

पक्षेप्रकृतसाध्यवैशिष्ट्यबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीशालित्वं प्रतिज्ञात्वं [redacted] वह्निमान् पर्वत इति वाक्यधर्मिकपर्वतोवह्नि अन्यथा

मानित्यानुपूर्वीज्ञानमादाय यत्क्रमोक्तवर्णसमुदायरूपप्रतिज्ञात्वं तत्त्वात्तद्धेतुत्वादोस्वत्वे पिनातिव्याप्तेः अव्यभिचारोपाधादिवर्णसमुदायस्य

मवर्णान्तरघटितसमुदायस्यभिन्नतया निवेशनीयत्वापातात्तद्गौरवात् आनुपूर्वीपदं वच्छेदकतापर्याप्तिनिवेशार्थं साध्यविशिष्टप एवं

क्षबोधमयोग्यहेतुविशिष्टहेतुत्वबोधनिवेश्यहेतुत्वं तत्र प्रतिज्ञाघटकहेतुत्वयबोधकभागवारणाय प्रकृतपक्षविशिष्टप्राप्ता साध्याभिवृत्तता तापन

दृष्टहेतुत्वविषयिताश्रयं वा हेतुत्वविषयिताश्रयं वा यो निवेश्यः तेन निगमनव्युदासः एवं प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतहेतु

मत्पक्षबोधं साध्या[redacted] व्याप्त्यादिमत्प्रकृतहेतुविशिष्टहेतुत्वविशिष्टप्रकृतसाध्यविशिष्टपक्षबोधं निवेश्य क्रमेणोपनयनिगमनेवो

ध्यानन्तत्रोदाहरणाकारपाततयानिवेशेयुक्तमोक्तभागघटितोदाहरणाघटितसमुदायेतिव्याप्तिरिति चेन्न धूमवान् धूमव्यापकव

बोधजनकतावच्छेदकप्रकारताश्रयत्वे सति तादृशहेतुत्वेतरविषयिताशून्यबोधजनकतावच्छेदकप्रकारताश्रयी भूतायानुपूर्वीत्वमिति फलितं २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग०टी० ह्निमानित्याद्याकारकबोधेयोयोधूमवान्सवह्निमानित्याद्यानुपूर्वीप्रकारकज्ञानत्वेनैवहेतुत्वात् । यद्वा हेतुविशिष्टधर्मिबोधजनकतावच्छेद

१० कप्रकारताश्रयानुपूर्व्यवच्छिन्नाव्यवहितोत्तरसाध्यविशिष्टधर्मिबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीमत्त्वंतत्त्वम् एवंव्यतिरेक्यु

नाविशिष्ट ३ दाहरणस्थलेऽप्यूह्यम् । ननु तादृशकारणतौ तादृ[redacted]शकारणतैव निविश्यतां लाघवात् वैशिष्ट्यंच सामानाधिकरण्यसंबन्धावच्छेदकविषयता

10 श्रयवर्णाव्यवहितोत्तरवर्णविषयतावच्छिन्नत्वोभयसंबन्धेनेति चेन्न हि योयो धूमवानित्यादिपूर्वभागवृत्ति आनुपूर्व्यास्तदवच्छेदक

प्रकारतानाश्रयतया कथंकारं तद्घटितसमुदायवारणमिति । यदि पर्वतो वह्निमानित्यादिप्रतिज्ञायां योयो धूमवान्स दहनवानि

त्यादिकं नोदाहरणं तदा प्रतिज्ञाघटकसाध्योपस्थापकतावच्छेदकानुपूर्वीभिन्नसाध्योपस्थापकतावच्छेदकानुपूर्वीमद्वृत्तित्वं न्या

[redacted] यत्वेनिवेश्यं । एवं च विभिन्नानुपूर्वीकैकार्थोपस्थापक[redacted]पदद्वयघटितं न्यायस्य लक्षणमभिमित्य । तस्यापि लक्ष्यत्वे तु धूमाद्दहनवान्स

धर्मापर्वतो वह्निमानस्मादौ उक्तोदाहरणादिसाधारण्यं समुदायत्ववारणाय भेदप्रतियोग्यानुपूर्व्यां प्रकृतपक्षोपस्थापकताव

च्छेदकप्रविष्टत्वं देयं तत्रैव वह्निपदघटितोदाहरणादिघटितन्यायेऽव्याप्तिः प्रतिज्ञायास्तादृशानुपूर्वीभिन्नसाध्योपस्थापकतावच्छे

दकानुपूर्वीमत्त्वादतः भेदानुयोग्यानुपूर्व्यां प्रतिज्ञात्वरूपविशिष्टत्वं विशेषणीयम् । एवं हेतुघटकहेतूपस्थापकतावच्छेदकानुपूर्वीभि हेरंबः १०

हेतौ १ न्नाविशेषितहेतूपस्थापकतावच्छेदकानुपूर्वीमद्वृत्तित्वं निवेश्यम् । अविशेषितत्वोपादानात्तस्माद्वह्निमानिति निगमननिर्वाहः । धूमा

धूमाद्दहनवान्सधर्मापर्वतो वह्निमानित्यादि ४ प्रतिज्ञाघटितन्य ५ तत्पदस्य व्याप्त्यादिविशिष्टहेतूपस्थापकत्वात् ६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

द्वह्निमतः सधर्मो पर्वतो वह्निमान् धूमादित्यादिन्यायस्यलक्षणेतुभेदानुयोग्यानुपूर्व्यीप्रतिज्ञेतरमविशिष्टंविशिषण्णं पर्वतो धूमाद्वह्निमान् धू
मादित्यादेर्योयो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटितस्य संग्रहाय तत्रैव योयो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघ
टितस्य च वारणाय च प्रतिज्ञाघटकसाध्योपस्थापकतावच्छेदकानुपूर्व्यप्रविष्टत्वं तत्रैव निवेश्यं तच्च तादृशसाध्यतावच्छेदकप्रकारताशाल्यु
पस्थितिजनकतावच्छेदकतापर्याप्त्यधिकरणप्रकारतानाश्रयत्वं अत एव तत्रैव योयो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटित
स्यापि व्युदास इति धूमाद्वह्निमानिति च ननिगमनं। धूमपदे आर्द्रेन्धनादिविशिष्टलक्षणाप्रसंगात्। एवं च। यत्राद्वानितिनोदाहरणम्। वि
शेषणपरामर्शित्वापत्तिः संप्र पविरोधाच्चेति तदुपस्थाप्येति। निगमनप्रतिज्ञयोः संग्रहाय प्रतीकद्वयम्। तेन द्वितीयकल्पानुसर
णेन। समूहालंबनमिति दीधितिकारोक्तदोषोद्धारार्थम्। अन्यथा वेति। महावाक्यार्थबोधो यथा श्रुतमूलार्थ इत्यग्रे स्पष्टं। अना
ख्यायां वाकारः। न्यायार्थबोधपरामर्शयोरंतराज्ञानाभावाद्विशिष्टेत्याद्यसंगतं तेनोपाचष्टे विशिष्टेति। तादृशी मा ऽनेनेति व्युत्प
त्तिमभिप्रेत्य। अंतरपदं स्वरूपपरं। उपस्थाप्यतद्रूपस्यासाधारणत्वादितिनार्थो मनसो नित्यत्वादित्यत आह। स्वात्मकेति। स्वं तत्तद्वाक्या
र्थविषयकज्ञानं। तेनेति किंवल्लभनः परामर्शकत्वे ऽसंगतिस्तस्य परामर्शानुत्पादकत्वादित्यतो व्याचष्टे तेनेति। तदेव तन्महावाक्यार्थविष
यकज्ञानमेव तर्हि तत्र योपनयः किमिति प्रयुज्यते इत्यत आह। व्याप्त्या इति। आकांक्षितं जिज्ञासितं। तदस्त्वेनेति। उपनयवाक्यजन्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शसत्त्वेनेत्यर्थः।नचोपनयार्थबोधोत्तरंनिगमनार्थावगाहिन्यायार्थबोधएवसंभवतीतिक
थमेतदितिवाच्यम्।निगमनार्थविशिष्टोपनयार्थस्यविधेयत्वेविधेयतावच्छेदकज्ञानविषयानिगमनार्थोज्ञानस्यापेक्षणात्।उ
पनयार्थस्यादबोधोत्तरंनिगमनश्रवणेनतद्घटकपदार्थोपस्थितेसेवोपनयार्थबोधनाशाच्चनचतावसर्यंतंतदस्त्वेपिमहावा
क्यार्थबोधेऽवांतरवाक्यार्थबोधस्य[illegible]कारणत्वेतदनुरोधेनोपनयार्थस्मरणस्यैवकल्पनीयतयात्ततएवानुमितिनिर्वाहेपरा
मर्शोत्तरस्वीकारोऽनुचितइतिवाच्यम्।तदाभ्यासंशेउद्बोधकंनकल्प्यतेइत्याशयः।समाधानंतुनदंगेमोक्षस्याप्रामाणिकत्वम
नुरुध्यबाधकाभावादिति।अवांतरवाक्यार्थबोधएवसामग्री।अपेक्षितामहावाक्यार्थबोधस्यसंभवत्सामग्रीकावांतरवाक्यार्थबोधाधी नाना
ए नत्वेतिपुनर्भ्रमनिवादिनास्यापेक्षाशंकानवकाशः।मिश्रसमाधानमाह।वादीतिवादीतिसाधारणधर्मोक्तिः।एवमप्यप्रामाण्यशंका
[illegible]नैयत्येभानाभावात्क्वचित्परामर्शवैयर्थ्यंदुर्वारमेवेत्यस्वरसः।स्वसंमतंसमाधानमाहन्यायास्त्विति।न्यायार्थज्ञानस्यहेतोर्व्या
प्यप्रकारकत्वादित्यादिनामानस्यानुधावनम्।तेनवह्निव्याप्यधूमवानयमितिवाक्येन।तत्रपरामर्शजनकवाक्यत्वमितिलक्षणे।धूमः हेरंबः
पक्षवृत्तित्वेनवक्तव्यमाकांक्षा।तथाचायमित्येवोपनयइति।व्याप्तिपक्षधर्मतयोर्विशिष्टंखलमेवभानमितिविवक्षितंमतमाह।मुख्येति।अत्रस ११
र्यंन्यायलक्षणमाहेतिजागदीशी।यावत्कारणमसंनिधेमूलार्थत्वाएवसंभवात्।उपाध्यायप्रभृतिभिस्तस्याएवानुरोधात्वल्लघुलक्ष

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्याशंकायां प्रतिज्ञादिपंचक समुदायत्वमि २

अस्य स्वीय प्रतिज्ञादिलक्षण घटितत्वेन क्लृप्तत्वात् १

णां तरासत्वेन मौलिन्यायलक्षणसद्भुत्पन्नत्वात् । अथात तन्न्यायलक्षणमित्यस्य पर्यवसितन्यायलक्षणमित्यर्थः स्याप्ये नाह अत्रेति । पंचके वाक्य १

ति । शब्दवृन्दानां जनकानि नियुक्तपतेः । नन्वेतावता बोधजनक पंचवाक्यसमुदायत्वं मूलार्थः । ननु प्रतिज्ञादि पंचक समुदायत्वमित्यत्र प्रतिज्ञा

त दिपंचानां प्रतिज्ञात्वादि नैव निवेशेत वात् तत्र प्रतिज्ञात्वं कितत्परार्थ बोधजनक वाक्यत्वरूपमेवेति मूलार्थ एवोक्त इत्याह अत इति । उचि

तानुपूर्वीकत्वं तु पूरितं दीधितिकारेण सामान्यतो बोधनिवेशघटमानयति विकिंतु तिव्याप्तिसादन आह । प्रयोजकं तत्त्वेति । ननु परामर्शप्र

योजक शाब्दत्वस्यत्र शाब्दं यदस्य पंचबोधप रत्वे प्रतिज्ञादिपंचवाक्ये रित्या दिमूलासंगतिः एकबोधाजनने पि उक्त रीत्या पंचबोधानादायलक्ष

णागमनसंभवादित्या शयेन संकेत यद्यपीति । उपाध्यायोक्तलक्षणेक्वचिदेक ज्ञानाजननेः निर्वाहो व्यंजित । दीधितिकृन्मते न्यायार्थविशिष्ट

ज्ञानमित्येकत्वानुपपत्तिं परिहरति । संभवेति । पंचार्थक एक बोध परामर्श प्रयोजकतोपपादने ऽर्थात् पंचानां बोधानां तदुपपादितं भवतीत्य ६

भिप्रायेणेत्यर्थः । इत्यभिप्रेत्य । ननु तस्य लक्षणे प्रवेशः सफल प्रवेशत्वेनि लाघवमभिप्रेत्य । उचितानुपूर्वीकः प्रतिज्ञादिपंच समुदायो य

त्रेति विग्रहेन संख्यादि समुदायानतिरिक्तत्वयातत्रातिव्याप्ते राहोचितेति । समुदायत्वस्य धर्मत्वेनैव निवेश उचितः । अन्यथा चारव्याव्यक्ति

भेदेनन्यायभेदादनुगतलक्षणानुपपतेः । अनुगतसमुदायत्वेमीभावा वा इत्यभिप्रेत्य यत्र समुदाये इत्युक्त मूलन्त्वेव मन्यतम इत्युक्तं कथं व । ला

रण्यामित्यतः पर्याप्तिं प्रवेशयति । तादृशेति । स च धर्मोऽर्थात् समुदायत्वमेवेति स्फुटयति । समुदायत्वमिति । एवं सति पंचपदोपादानं संगमय

नवियेशेष बोजनाभावात् २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग०टी० तिा पंचपदमिति। विशिष्यप्रतिज्ञात्वादिनारूपांतरेण निवेशो ऽतिप्रसंगः। एतेनबौद्धानां मतेद्व्यवयवकेवैयमीमांसकानां त्र्यवयवकस्य चीनत्वेया
२२ यिकानांदशावयवकस्यवारणा। यपंचपदमित्यपास्तम्। उत्तरेति। अव्यवहितोत्तरेत्यर्थः। प्रतिज्ञोत्तरवाक्योत्तरहेत्वा देहेत्वादिनिगमनांतो
त्तरप्रतिज्ञादिष्ववारणायतयोर्निवेशः। नवस्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभाव रूपमव्यवधानं नहेत्वव्यवक्षणास्वत
स्यप्रतिज्ञाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वादितिवाच्यम्। स्वाधिकरणक्षणध्वंसाधिकरणकालध्वंसाधिकरणत्वा
संबंधेनप्रतिज्ञासामान्याभावस्यनिवेश्यत्वात्। स्वत्वानिवेशेपि अन्याधिकरणत्वाया अन्यसंबंधत्वाभावेनसामान्याभावनिर्वाहात्। सं
बंधेसामान्यरूपस्तद्वावेपितत्तदनवच्छिन्नप्रतियोगितावच्छेदकतासोलभ्यात्। वस्तुतस्तु पूर्वपूर्ववर्णानंतर्यविशिष्टचरमवर्णत्वरू
पानुपूर्वीरूपंप्रतिज्ञात्वं। तस्यपर्वतोदहनवान्। पर्वतोवह्निमानित्यादिवाक्यभेदेन भिन्नत्वेपिपक्षसाध्यवैशिष्ट्यावगाहिबोधजनकतावा
च्छेदकप्रकारताश्रयत्वमनुगमकं। आनंतर्यंचस्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणकालोत्पत्तिकध्वंसप्रतियोगिका
लवृत्तित्वं। ध्वंसाधिकरणाद्वयं ध्वंसोत्पत्त्यधिकरणरूपंतेननैकदोषः। स्वध्वंसोत्पत्त्यधिकरणक्षणोत्पन्नध्वंसप्रतियोगिक्षणवृत्तित्वंवा।
स्वंतादृशप्रकारता श्रयधर्मवत्। एवंतादृशप्रकारताश्रयधर्मत्वेनहेतुत्वादिनिरुक्त तत्रनिरुक्तानंतर्याश्रयवर्णघटितत्वंनिवेश्यं। ता
दृशानंतर्यवत्तितादृशधर्मवत्त्वादिरूपहेतुत्वंवा। आनंतर्यवत्त्वंचस्वाश्रयवर्णघटितमहत्त्वधर्मकत्वसंबंधेनानुपूर्व्यंतरस्यनप्रवेशः

स्वाधिकरणक्षणध्वंसाधिकरणत्वमुत्तरत्वं [illegible] आनुपूर्व्यप्रतियोगर

[illegible] वस्तुतस्त्वानंतर्यं ध्वंसत्वचरमवर्णध्वंसत्वे [illegible]

Right margin: चरमवर्णः त्वं [illegible] हेतुः २२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७ अत्रैकसमुदायत्वाश्रयाव्यवधानं अपरसमुदायत्वाश्रयोत्तरत्वं चादायो ऽत्रैव वारणाय यत्र अव्यवधानं तत्र आश्रयोत्तरत्वं तत्र

हेत्वादिरूपात् पञ्चप्रतिज्ञानुत्तरत्वात् । अत एव तत्र तत्राग्रे तथाविधानुपूर्वी विशेषितेति तथाविधविशेषपदद्वयोपादानमिति बोध्यम् । निगमने
एवविश्रान्तेरित्यग्रिमग्रन्थेऽपि च निगमनपदं निगमनघटकाद्यवर्णपरम् । प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिबोधजनकतावच्छे य
दकयत्किंचिद्विषयताश्रयपञ्चवर्णसमुदायत्वं प्रतिज्ञात्वं । एवं हेत्वादिकं निर्वाच्यम् । अत्र च निगमन एव विश्रान्तेरिति यथाश्रुतमेव रमणीयम् ।
अत्र प्रतिज्ञादिघटकचरमवर्णानन्तर्यं निवेश्यं तच्च चरमवर्णाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तदधिकरण
कालध्वंसाधिकरणत्वं परं तु तत्र स्वघटकवर्णप्रागभावासमानकालीनत्वं स्ववृत्तित्वावच्छिन्नविशिष्टत्वं वा चरमत्वं न निवेश्यं विशिष्य तदधि
करणकालनिवेशेनैवोपपत्तेः हेत्वादिलक्षणानां पूर्ववर्तिप्रतिज्ञाविषयकज्ञानध्वंसाधिकरणकालध्वंसाधिकरणतया तादृशप्रतिज्ञा ८
धिकरणकालध्वंसविषयकज्ञानाधिकरणतयाचाव्याप्तिरतः कालद्वयनिवेशेऽपि तन्न तथा सति [redacted] वृत्तिसमुदा शु॰क्रमो॰रू ५
यत्वाव्यत्वस्य प्रतिज्ञात्वाद्यैनिवेशापत्तेः प्रतिज्ञाघटकचरमवर्णध्वंसोत्पत्तिकालोत्पत्तिकहेत्वादिविवक्षितन्यायसंभवेन तु स्वाश्रयप्रतियो
गिकस्वाश्रयासमानकालीनध्वंसाधिकरणकालध्वंसानधिकरणत्वस्वरूपमव्यवधानं निवेश्यं स्वं प्रतिज्ञात्वादिरूपं समुदायत्वं तेन प्र वा
अथ तिज्ञाघटकाद्यादिवर्णध्वंसाधिकरणकालतृतीयस्वांशध्वंसाधिकरणत्वेऽपि न दोषः इत्यपास्तम् । समुदायत्वस्वरूपप्रतिज्ञात्वादिनैव प्रतिज्ञा
त्वानुपूर्वीविशेषेणोक्तमित्युक्तं बोध्यम् । प्रतिज्ञादिरूपेकज्ञानभेदेन विषयिताभेदेऽपि प्रतिज्ञाविषयितात्वेनानुपूर्वीविषयिताव्यापकत्वं स्यात् । अतः

क्रमशुक्रमोरू वर्णेषु समुदायत्वस्यैकत्वेऽपि विशिष्य निवेशे नानागमात् चरमत्वनिवेशे गौरवात् समुदायत्वनिवेशवैयर्थ्याच्च ४
तत्र यथा मतमानुपूर्वीत्वं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

देशत्वकः मेविषयमभेदेन नञ्ञेदा ५

२ प्रे केव्युत्क्रमो केन्याय घटकसमूहा लंबमा (?) अतिसंधीयाविदापकत्व मिदे रेविषयताले न न छि विषयता[redacted]वा व्यापकत्वात्

ग०टी० यानुव्यक्तिभेदेन भिन्नत्वात्की लेनमा यादृशयादृशानुपूर्व्यवच्छिन्नवाक्यविषयितात्वं यादृशयादृशावि षयितात्वं वा नानुगतमिति भावः।

१३ व्याप्यतालेयादृशानुपूर्वीकप्रतिज्ञात्वेन यादृशानुपूर्वीकहेतुत्वेनरस्याद्व्युत्क्रमेणोचितानुपूर्वीनिवेशे वद्धिदहनादिशब्द घटितानुपूर्वीभेदेन शब्द

व्यक्तिभेदेनैवान्यायभेदप्रसंगः। अग्निमत्त्वेऽतिव्याप्तिश्च। वस्तुतउदासीनप्रतिज्ञादिपंचकेऽतिव्याप्तिवारणाय तत्समानाधिकरणभेदप्र

13 तियोगितानवच्छेदकत्वमेव व्यापकत्वं निवेश्यं। एतेनानुपूर्वीविषयितासामान्यनिवेशपक्षे प्रतिज्ञादिविषयितासामान्यस्यावश्यकतया शब्द

उत्तरकल्पे व्यक्तिभेदेनेत्यसंगतमेवेति न शंक्यं तथापि ज्ञानभेदेन विषयिताभेदात्संक्तिसंगतेः [redacted]। परिष्कृतिविषयितावि शेषणं। नादृशेति व्युत्क्र

मोक्त्यर्थः। क्रमप्रयुक्तव्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचकोभयसमूहालंबने आनुपूर्वीविषयकत्वव्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयकत्वयोः

व्याप्यव्यापकभावः ज्ञानभेदेन विषयिताभेदात्केवलन्यायज्ञानेसमूहालंबनज्ञानीयन्यायानुपूर्वीविषयितावि रहादित्यर्थः। भेदमिति तस्याएवक्र

विषयिता मोक्तमात्रज्ञानेपि सत्वात्तन्नव्युत्क्रमोक्तप्रतिज्ञादिविरहान्नातिव्याप्तिः। नादृशेति व्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचकसमानाधिकरणन्यायघटकानु

पूर्वीविशिष्टप्रतिज्ञादिसमुदायवद्गगनमिति व्युत्क्रमोक्तप्रतिज्ञादिपंचकसमानाधिकरणोन्यायादिरेषइतिवाज्ञानीयेत्यर्थः। आदिनासमानकाली हेरंबः

नत्वादिपरिग्रहः। समानाकारकज्ञानेविषयितयोरेकेपिसामानाधिकरण्यविशेष्यकत्वावच्छिन्नानुपूर्वीप्रकारितारूपाउक्तज्ञानीयविषयिताः २३

तथाविधज्ञानीयन्यायघटकप्रतिज्ञादिपंचकविषयितानोभिन्नेववाङ्मानुपूर्वेतइतिज्ञानविषयितात्वाद्धटसमानाधिकरणवद्गिमानुपर्वतइ

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२ न च तादृशानुपूर्व्याः पर्याप्तिनिरूपकताकत्वे यत्किंचिद्धि बाधितानिवेशन[redacted] न्यायं तोयदृशित्वाव्यं आनुपूर्व्याः पात्रे विषयत्वावच्छि ःनच तत्पर्याप्तावच्छेदकताकनिरूपकताकविष

१ एकमपि २ एव अनुक्तिभेदेन प्रतिज्ञादेर्भिन्नतयाज्ञातः नी व्याघेता संभवात् ३ यितानिवेशः। यत्किंचिन्न्यायादि घटितत्वेनातिगुरुत्वात् १

सादिज्ञानविषयितावत्। तस्यांशेक्तसमूहालंबनव्यावृत्ताया। केवलन्यायज्ञानेऽभावात् सुवर्णमोक्तप्रतिज्ञादिसमुदायेऽतिव्याप्तिरिति भावः॥ ए

तेन यादृशविषयितात्वं यत्किंचिदानुपूर्वीविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशविषयिता श्रूयज्ञानीयत्वं व्यापकीभूत

विषयितायां देयमित्यपास्तम्। अत्र आनुपूर्वीकत्वं आनुपूर्व्याश्रयत्वं तच्च विशिष्टनिगमनत्वरूपायाऽनुपूर्व्यास्तदाश्रयत्वरूपं निगमने एव विश्रां

तेरित्येकेन दूषितं। इदानीं तु यया विशिष्टनिगमनत्वं तयैव विशिष्टविशिष्टप्रतिज्ञात्वादिना तैत्यापंचविधा[redacted]ऽनुपूर्वीति तदाश्रयत्वरूपं तादृशा ने

नुपूर्वीकत्वं प्रत्येकं सुकुं शक्यमित्याशयेन। शंकते। अथेति। पूर्वेति। अव्यवहितपूर्वत्वमर्थः। तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वं

१ उपनयघटकचरमवर्णाऽकृत्तं निगमनत्वं चोत्तरवर्णपूर्वत्वविशिष्टाद्यवर्णत्वं तस्य प्रकारता विशेषाश्रयधर्मत्वेनोक्तरीत्या निवेशः। उदासीन अन्तरा

प्रतिज्ञान्यायांतर्गतक्रमिकहेत्वादिसमुदायवारणायोचितानुपूर्वीकप्रतिज्ञानिवेशः। एवमुचितानुपूर्वीकहेत्वादिनिवेशात्समूह। तदस्मा

यादोषे पौनरुक्त्यनिरसनीयं कल्पांतरमाह। अथवेति। पूर्वं पंचानुपूर्व्य उक्तास्तत्रेदानीं यद्वत्येकैकनिवेश्य निर्दर्शयति॥ एकविधेति। एवमपीति।

प्रतियोगीक न चैतत्प्रतिज्ञानंतरं तद्धत्वादिघटितभेदप्रतियोगितावच्छेदकत्वस्य तत्पक्षसाध्यहेतुकन्यायाननुगमप्रसंगात्। यत्तु एवमपि तन्न्यायघटक अन्त२

प्रतिज्ञायाः। यथा तादृशभेदप्रतियोगितावच्छेदकत्वं तथैवापरन्यायघटकहेतोरपरापरन्यायघटकोदाहरणादेर्भिन्नोक्तात्यासुद्धा। रसं

क२ भवः। तादृशैर्भेदप्रतियोगितावच्छेदकत्वव्याप्यधर्मत्वमित्यपि हेयम्। तत्समुदायन्यायोभयभेदावारणात्। न च न्यासङ्ग्रहत्तिधर्मानवच्छिन्नत्वं

आनुपूर्वीनिवेशानुरोधात् समुदायःऽवर्षजस्तो[redacted]नां घटकनिगमनादीनां त्यागः ६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तादृशैकभेदं द्वियेश्यतन्त्र२

ग०टी० १४ 15 प्रतियोगिताविशेषणं न्यायत्वं चानुपूर्वीरूपमिति तन्त्रोद्देशसंग्रह इति वाच्यम्। नानान्यायान्तर्गतप्रतिज्ञादिसामानाधिकरण्यविशिष्टन्यायभेदावार
णात्। न च हेतोर्यानुपूर्वीतरानवच्छिन्नप्रतियोगिताकभेदनिवेशः संभवः न्यायभेदस्य तादृशेतरप्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकत्वादि
ति तन्न। अवच्छेदकतापर्याप्त्युपादानेन बहूक्तदोषवारणात्। न्यायेऽयेति प्रतिज्ञायां यत्किंचित्त्वं तु वैयर्थ्यान्नोक्तम्। यत्तु उपाध्यायनिष्कर्षे तन्ना
वदर्थविषयकबोधस्य निविष्टत्वात् दृष्टत्वे यत्किंचिच्छाब्दबोधपदेन न्यायघटकार्थशाब्दबोधमुपादाय न्यायद्वयेऽतिव्याप्तिरतस्त
द्घटकत्वविशेषणोपि यत्किंचित्त्वं प्रतिज्ञाद्यावश्यकमिति तन्न। यत्किंचिच्छाब्दबोधपदेनैकन्यायार्थ उपादीयते न वा। आद्ये निरूपकत्वं
तेन वारणं। अन्त्ये ऽसंभवः न्यायत्वेन तद्व्यापकत्वस्य दुरुपपादत्वात्। न तु याचतत्रापि यत्किंचित्त्वं व्यर्थमिति विदांकुर्वन्तु। तात्पर्यादिति तु वि
तानुपूर्वीकत्वादि रित्यादिः। एवं चेत् तन्नवत्र संदर्भविरोधाद्दुर्वारः। तादृशभेदप्रतियोगितावच्छेदकत्वनिवेशकल्पेपि प्रतिज्ञादिपंचके
कदेशवृत्तिसमुदायत्ववारणाय प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकयत्किंचिद्धर्मपंचकव्यापकत्वरूपविशेष्यदलस्य सार्थक्यस्यावश्यकत्
त्वात्। असंभवभयेन तादृशभेदप्रतियोगितावच्छेदकवर्णत्वव्यापकत्वनिवेशासंभवादिति वित्त। अत्र केचित् तादृशभेदप्रतियोगिताव हेरंबः
च्छेदकत्वस्यावच्छेदकतावच्छेदकस्य धारणस्याप्रामाणिकत्वेन तादृशानुपूर्वीप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकयत्किं १४
चिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिवेशेनैकैकदेशवृत्तिसमुदायत्ववारणे प्रतिज्ञादिपंचवृत्तित्ववैयर्थ्यं संभाव्यतद्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

सभिप्रायात्तेनेवं चेत्यादिकथनासंगतिः। यत्तु वर्णत्वव्यापकत्वादिरूपत्तया। तादृशनिश्चयत्वसमनियतकारणतावच्छेदकविषयितानिरूप
कवर्णान्यतमत्वसमनियतसमुदायत्वं किंचिस्विन्नं। एवं च विशिष्यदलवैयर्थ्यान्न संदर्भविरोधः। अनिरूपकत्वांशं तु न निवेश्यं। एवमपीत्यसतिप्रसंगा तं२
संगतेः। यत्तु आनुपूर्व्यामव्यवधानांशानिवेशप्रयोजनाभावाद्धेरवाच्च तद् । घटितत्वादृशानुपूर्वीप्रकारकनिश्चयत्वसमनियतकारणता
वच्छेदकविषयतानाश्रयत्वं। पर्वतो वह्निमान् पर्वतो वह्निमान् कुतो धूमादित्यादिवाक्यसमुदाये ऽव्याप्तिरतो ऽजिज्ञासानिष्ठविषयत्वाप्रयोज्यत्वेन व क
र्णो विशिष्य इति तन्न। एवमपि घटमानयेत्यादिवाक्यांत प्रतिज्ञादित्वादिघटितसमुदाये ऽतिव्याप्त्यापत्तेरिति तद्समत्वा वर्णत्वादिः कत्वा
दिरूपतामते प्युक्तत्वादिसंसर्गकनिश्चयं प्रति वर्णपदस्य संसर्गतान्यजात्यवृत्तिविषयतामात्रनिवेशोपयिकत्वे यात्तव्यापकत्वनिवेश
ने वोपपत्तावन्यतमत्वव्याप्यत्वांशयोर्निवेशवैयर्थ्यात्। उक्तरीत्या ऽसंभववारणाय यत्किंचिद्व्यापकत्वे सति तन्नद्रूपत्वरूपस्यैव निरूप
कत्वांतार्थस्य निवेशनीयत्वे एवमपीत्यादिग्रंथसंगतेः। वस्तुतस्तु यथा विपर्यये किंचिदानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदक
त्वविशिष्टवर्णत्वव्यापकसमुदायत्वनिवेशान्न विशिष्यदलवैयर्थ्यमिति पूर्वं दीधितिकाराणां विशेषणं व्यर्थं घटमानयेत्यादिवाक्ये ऽतिप्रसं
गस्यैवाभावादिति चेषां तदभिधानासंगतिः। पंचैकैकदेशसमुदायवारकं च विशेषणं नास्त्येव किं पूर्वं नेति पूर्वपक्षीभावः इदानीं तेषां तदभिधान
संगतिः। तादृशसमुदायवारकविशेषणस्यैव चेतन्नभ्यते। दीधितिकाराभिप्रायलिखनमात्रं अन्यथा एवं चेति पंक्तेरर्थे नैरर्थक्यं स्यादिति तु

...थप घटं प्रति ता वादिरूप ४ बं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

प्रतिज्ञात्वव्यापकत्वसंकिंचिन्न्यायान्तरवृत्तिभेदप्रतियोगिता ८

ग० टी० युक्तं। अत्र एकैकन्यायघटकहेत्वादावपरापरन्यायघटकप्रतिज्ञाद्यानन्तर्याविरहात् विशिष्टमात्मकं विशिष्टयत्वसमनियतावच्छेदकीभूतयत्किंचिद्ज्ञा तत्कारण

१५ नीयविषयतामादायैवमप्यासादिदोषात्। न च व्याश्रयीभूतप्रतिज्ञाद्यघटितेन रत्नस्यूनपंचहेत्वादिविशेष्यकत्वादृशान्यावदितात्त्वप्रकारकज्ञा

15 नाप्यवरूपं धर्मान्तरं निवेश्यमिति गौरवं। तादृशे तादृशदेहेत्वादिवृत्तिभिन्नत्वस्यैव निवेशइति वाच्यम् प्रतिज्ञात्वादीनां तादृशयत्किंचि तत्र द्१श

द्धर्मव्यापकत्वमर्थः। अन्यथा कुत्रापि समुदायत्वे तादृशनानासमुदायत्वव्यापकत्वासंभवात् प्रतिज्ञात्वादिव्यापकत्वनिवेशेऽसंभवश्च अ

वनिवेशदत्त नुगतप्रतिज्ञात्वस्यैव यावत्प्रतिज्ञावृत्तितया प्रत्येकन्यायवृत्तिसमुदायत्वस्य तद्व्यापकत्वादिस्यावच्छेदकधर्मोपादानं। धर्मश्च पर्वतोव

वाजस्य द्धिमानिति वाक्यत्वादिः। यद्यप्येवं सति पर्याप्त्यवच्छेदकं नानैवेति तद्वृत्तिन्यायत्वावच्छिन्नभेदोऽप्रसक्तस्तथापि पर्याप्त्यतिरिक्तसंबंधेन

व्यापकत्वविवक्षणान्न दोषः। तादृशयत्किंचिद्धर्मव्यापकत्वे सति तदितरचतुष्टयसामानाधिकरण्याको प्रतिज्ञातदितरैकैकत्वसमुदा

यत्वादिकमादाय अतिव्याप्तिरतः पंचकेति। प्रतिज्ञादीति। प्रतिज्ञाघटकभागे हेतुघटकभागादिपंचकघटितसमुदाये इत्यर्थः। अत्रापि च

घटमानयेत्यादिवाक्यघटितसमुदायेऽतिव्याप्तिरतः स्वनिरूप्यन्यूनवृत्तितानिरूपकं यद्यत्तत्तद्भिन्नत्वं निवेश्यं। केचित्तु एवं चो[illegible]घटितत्वा देवं बः

दृशपंचकसमुदायत्वस्यापि निरासो वाच्यस्तादृशव्यापकत्वादिस्यादुक्तत्वेषां वाक्यमात्राय। तादृशधर्मपंचकावच्छेदेन न्यायत्वसंभवात् तादृशयत्किं २५

को चिद्धर्मपंचकावच्छिन्नानुयोगिताकभेदप्रतियोगितायां पर्याप्तिसंबंधेनानवच्छेदकत्वरूपव्यापकत्वमेव निवेश्यं तत एव तादृशसमुदायत्व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

निराकांक्षेनानिरूपकत्वात्तं विशेषणं नोपादेयमिति। प्रतिज्ञात्वादेरिति। न्यूनपर्याप्तस्याधिकपर्याप्त्यनवच्छेदकत्वादिति भावः। अन्यतमत्वमा
दायाति व्याप्तिं अनेकपर्याप्तघटकप्रवेशेन समुदायत्वस्य पर्याप्त्यघटितस्वरूपसंबंधेन न्यायपदप्रवृत्तिनिमित्तत्वं वारयति। अनेकेति। यत्तु जगदी
शेन क्रमेण पंचभिः पुरुषैः प्रतिज्ञादिपंचाभिधानेन न्यायत्वापत्तिरत आचित्स एकपुरुषप्रयुक्तत्वं देयम्। न चैकत्वस्य सर्वेषां धारण्यात्कथं
दोषवारणं। स्वाश्रयप्रयुक्तत्वस्वानाश्रयप्रयुक्तत्वोभयसंबंधेन त्ववदन्यत्वस्य वाच्यत्वात्। संप्रयोक्तृगतमेकत्वमिति तन्न। स्वाश्रयीभूत
प्रतिज्ञाव्यवहितोत्तरत्वशून्ये सत्राव्यवहितोत्तरत्वसानुकूलत्ववृत्तिसमानाधिकरणवृत्तिजन्यत्वोभयसंबंधेन प्रतिज्ञाविरहस्यैव निवेश्य
पृ त्वात्। इदं तु बोध्यम्। अनन्त्युदाहरणार्थघटितमेकं न्यायत्वं व्यतिरेकि उदाहरणार्थघटितं चापरं। एवं चोदाहरणोपदर्शितव्याप्तिविशिष्टे ए
वपक्षधर्मत्वाकांक्षापनयप्रयोगान्न्यायत्वे धर्म्याधिबाधकोदाहरणोत्तरान्यविधापनयप्रसंग इति। यत्तु साध्यसाधनभेदेन न्यायभेदा भेदे
त्वाभासलिंगकासाधकतास्थले पंचावयवत्वं एव। तत्र व्याप्त्युभयसंपन्नत्वेनोदाहरणाभावादिति तन्न। यदि पंचभिरवयवैरसाध
कत्वं साधयामीति समयबंधपूर्वकं तत्रानाकांक्षिता अपि पंचावयवाः प्रयोक्तव्याः अन्यथा स्वकर्तव्यसाध्यतद्व्याप्त्युपदर्शननिर्वाहो नस्या
कतावच्छेदकविषयितानिरूपकवर्णवृत्तित्वस्य वह्निमत्पदविषयितायाश्च प्रतिज्ञैकदेशज्ञानत्वावच्छिन्नजनकतावच्छेदकतया देठ
ज्ञानितादृशजनकत्वाभावकूटवत्त्वस्य च सत्वेनातिव्याप्तेः पर्याप्तिनिवेशे च हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यताकजन
व्यत्या कताहेतुज्ञानत्वावच्छिन्नेवतदनवच्छेदकवह्निमत्पदविष~~[illegible]~~नेनातिव्याप्तिः। एवं धूमादालोकवानुपर्वतो वह्नि
मानित्यादौ धूमादालोकवानुपर्वतइत्यादिभागेऽतिव्याप्तिः। धूमादालोकवानुपर्वत इति भागज्ञानत्वावच्छिन्नजनकतायाः हेत्वर्थविषय
कशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपितत्वेन तज्ज्ञानितादृशजनकत्वाभावकूटवत्त्वसत्वेन च तत्र तदवच्छेदकविषयितानिरूप हेरंबः
कवर्णसमुदायत्वसत्वादिति। अत्र तथापि प्रतिज्ञैकदेशे धूमादिति भागेऽतिव्याप्तिः तत्र हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकज ३०
न्यतानिरूपकजनकतावच्छेदकविषयितानिरूपकवर्णसमुदायत्वसत्वात्तज्ज्ञानितादृशजनकत्वाभावकूटवत्त्वाच्चेति भट्टाचार्याणाम

दादिविषयिताविशिष्टतथाविधजनकताशरत्वप्रकृतसामीयतदवच्छेदकविषयितानिरूपकवर्णसमुदायत्वासत्वे ५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नि॰

स्वरससंगतिरिति। न च स्वानवच्छेदकविषयितावद्भिन्नतायास्तदर्थविषयकशाब्दत्व[redacted]षावच्छेदकताकजन्यतान्यतमजन्यतानिरूपि
तजनकतावच्छेदकविषयितावन्निरूपकवर्णसमुदायत्वमेव समुदितार्थः तत्र विशेष्यदले पर्याप्तिनिवेशस्यैतत् किंतु यां जनकतावच्छेदकविष
यितामादाय लक्षणसमन्वयः पर्याप्तिघटितार्थकतज्जनकतां स्वपदेनोपादाय तस्यां तदनवच्छेदकविषयितान्यत्वमपेक्षितम्। तथा च
हेत्वर्थविषयकशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविष[redacted]तायास्तद्विषयकशाब्दत्वपर्याप्त्यवच्छेदकताकज या
न्यतानिरूपितजनकतानवच्छेदकीभूतवत्सालिकादिमत्सदाविषयितान्यत्वाभावान्नातिव्याप्तिरिति। एवं सत्यनुगमेन प्रतिज्ञाहे
तुविषयिते उपादाय प्रतिज्ञाहेतुसमुदाये ऽतिव्याप्तिस्तु न शंक्या। स्वानवच्छे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अव·गा.टी.
३१
31

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

दकविषयिताऽन्यत्वकूटनिवेशात् । विषयिपज्ञानवृत्तिस्तद्वृत्तिर्या जनकता स्वपदेन तस्या एवोपादानात् प्रतिज्ञाविषयिताद्ये हेतुज्ञानत्वावच्छिन्नजनकता
मादाया व्याप्तिरिति वाच्यम् । तस्य लक्षणान्तरत्वात् । प्रकृतलक्षणापरिष्कारस्य पत्ते स्वपदेन प्रतिज्ञार्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपि
तजनकतैव हेतौ लक्षणगमनाय हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकताया अप्युपादेयतया हेतुज्ञानत्वावच्छिन्नाजनक
तानप्रवेश्यते किं त्वन्यच तुष्टयीत्वस्य संगतेः । अत एवात्र स्वपदेन हेतुज्ञानत्वावच्छिन्नाजनकता गृह्यते तथा च स्वानवच्छेदकवह्न्यालोकपदादिविषयि
ताविशिष्टहेतुज्ञानत्वावच्छिन्नजनकतावत्त्वेन ताद्दशज्ञानस्य तत्कूटवत्त्वाभावादेव नातिव्याप्तिरिति पर्याप्त्युपादानं व्यर्थमिति समाहितम् । स्वपदेन हेतुज्ञा
नत्वावच्छिन्नजनकत्वस्योपादाने धूमादालोकवान्पर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तेश्च । तज्ज्ञानस्य हेत्वर्थविषयकशाब्दत्वपर्याप्तावच्छेदकताकजन्य
तानिरूपितजनकतानवच्छेदकपर्वतपदादिविषयिताविशिष्टजनकतावत्त्वात् ताद्दशकूटाभावादिति । यदि च स्वानवच्छेदकेति स्वपदेन प्रत्येकं ताद्दशजनकता
पंचकमपि गृह्यते हेतुज्ञानत्वावच्छिन्नजनकतानयास्येति तु यथाश्रुतहेतुत्वाभिप्रायेणायोज्यते । न चैवं निरुक्तप्रतिज्ञायामव्याप्तिः । तज्जन्यशाब्दबोधस्य विवक्षि
तहेत्वर्थाविषयकत्वात् । तथा च नक्तोपि दोष इति विभाव्यते तदा प्रतिज्ञैकदेशहेतुज्ञानादिवारणाय स्वानवच्छेदकेत्यादिमहाचार्योक्तविशेषणता वैयर्थ्यं दुष्प्रा
पत्तिरिति मंतव्यम् । ननु यथाश्रुतमते स्वानवच्छेदकत्वं स्वानतिरिक्तवृत्तिभिन्नत्वं तथा च हेतुज्ञानत्वावच्छिन्नजनकतोपादानेपि प्रतिज्ञाविषयितायास्तदनति
रिक्तवृत्तितया तद्भिन्नविषयिताविशिष्टजनकत्वाभावघटितकूटमप्रसिद्धमिति चेन्न हि हेतुविषयितायाः प्रतिज्ञाजनकतातिरिक्तवृत्तित्वादव्याप्तिरिति दिक् । स्वस्व

ति यत्तु

हेतुविशिष्टहेतुत्वविषयताद्यहिर्भूतविषयताश्रयत्ववोधवृत्तिपदार्थान्वितसाध्यान्वितप्रकृतहेतुविशिष्टहेतुत्वशक्त्यावच्छिन्नकार्यतानिरूपितजनकतासत्त्वे इदं ४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धर्मादाणोकवानित्यादौ हेतुमानत्वावच्छिन्नजनकतायाः स्वरूपनवृत्तित्वाभावेन प्रतिज्ञाहेतुभयपक्षसंग्रहेपि तदीयप्रतिज्ञातानत्वावच्छिन्नजनक
तायाः एवस्वपदेनोपादानात्स्वावच्छेदकविषयितोपादानान्न प्रतिज्ञायां अव्याप्तिः नापि प्रतिज्ञाहेतुसमुदाये अतिव्याप्तिः तद्विषयितायाः स्वानवच्छेदकत्वात्
एवं च तत्राव्याप्तिः जनकतावच्छेदकत्वान्तं विषयिताविशेषणं देयम् १

३२ 32 धर्मितावच्छेदकत्वकारणाय प्रतिज्ञाज्ञाने पक्षतादिप्रकारतानिरूपितविशेष्यतायाश्च उपगमे तादृशप्रकारतायाः स्वानवच्छेदकविषयितायाः शून्यत्व विरहे
ण प्रतिज्ञायाम व्याप्तिः जनकतानिवेशे चावच्छिन्नत्वसंबंधेन तद्विशिष्टत्वाभावान्न दोष इति तदसत्। अवच्छिन्नत्व संबंधेन तादृशविषयितावैशिष्ट्यस्य निवेशे
पदि चेत्यादिग्रंथविरोधात् उदासीनपदार्थविषयितायाः स्वानवच्छेदकत्वेपि तादृशजनकत्वस्य तदनवच्छिन्नत्वात् व्याप्यपेगेन विषयितायां तादृशान्यतमज
नकतावच्छेदकत्वस्योन्मत्तप्रलपितत्वापत्तेरिति। यादृशप्रतिज्ञादिज्ञानमुदासीनपदार्थविषयकमेव जायते तादृशप्रतिज्ञादिव्यक्तौ व्याप्तिमाशंकते यदि चे
ति। समाधत्ते तदेत्यादि। एवं च स्वानवच्छेदिकायास्तथाविधजनकतावच्छेदकविषयितात्वद्विशिष्टतादृशजनकताशून्यत्वं ज्ञानविशेषणमित्यर्थः। अत्र स्वान
न वच्छेदकतादृशजनकतावच्छेदकविषयिताशून्यत्वमेवास्तु भागविषयितायास्तादृशजनकतानवच्छेदकत्वे न तत्रातिव्याप्तेर्विशेष्यदलसार्थक्यसंभवादिति
तु वोध्यम्। अगतिरेवेति। इदं चात्रालोचनीयम्। स्वानवच्छेदक [redacted] विषयिताविशिष्टस्वरूपनवृत्तिजनकताशून्यत्वं गतिः। पंचानामप्यवयवा
नां विषयिता न्यैयसोपगमेपि स्वरूपनवृत्तिजनकताख्याने स्वरूपनवृत्ति स्वानवच्छेदकविषयितानिवेशपौनरुक्त्यं स्वानवच्छेदकेत्यादिकमपहाय स्वाश्रयत्वस्य स
मानाधिकरणभेदप्रतियोगितावच्छेदकविषयितोभयाभाववत्त्वेन ज्ञानं विशेष्यं। स्वानवच्छेदकेति विषयितानिरूपकत्वेन वा वर्णो विशेषणीय इति। असमानाका
रकप्रतिज्ञाद्वये जन्यताभेदमते दोषप्रसक्तेः समानेति। इष्टमेवेति। एकप्रतिज्ञाप्रतिज्ञाद्वयभिन्नेति प्रत्येकं संभवेपि नावयवद्वितिप्रत्ययासंभवात्। तस्मात्तथा
त्वे प्रतिज्ञाद्वयस्यावयवत्वासीकारे। परिचिंतनीय इति। प्रति[redacted]ते तादृशसमुदायत्वनिष्टस्वरूपनवृत्तिता निरूपकत्वं देयमित्यभिप्रायः। नन्वेते नैव
प्रतिज्ञाहेतुसमुदायातिव्याप्तिवारणे स्वानवच्छेदकेत्यादेर्वैयर्थ्यप्रसंगात् इति चेदेतत्कल्पे इष्टत्वात्। [redacted] प्रतिज्ञैकदेश [redacted] वृत्तिसमुदायत्वं वा

१ विषयिताविशिष्टत्वं च स्वसामानाधिकरण्यसहितस्वरूपनवृत्तित्वसंबंधेनेति अवयवांतरविषयताविषयक तत्र संग्रहः धर्मादाणोकवानित्यादौ च प्रति
तथापि पजनकतावच्छेदक ४

अत्रायं भट्टाचार्याशयः २

१ यधुदासीनप्रतिज्ञाहेतुमिलितान्नोपचयो अवयवेवोक्तौ ... तादृशादि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६ तु एवं च प्रतिज्ञाद्यपादे ईश्वरतायाः स्वावच्छेदकत्वादिविशेषणवशीवत्वात्तत्त्वस एव न तत्त्वप्रतावांतार जायते इति · यदि च ६
४ उदाहरणोपनयसमुदायत्वस्य तदेकदेशवृत्तित्वाविशेषयत्किंचित्समुदायत्वनिष्ठन्यूनवृत्तिता निरूपकत्वादुदाहरणे व्याप्तिः ४

निवेशपदं २ ३म व्याप्तेः तन्निष्ठसमुदायत्वे २

रणायत्ताहशायत्किंचिज्ज्ञानीयविषयिता निरूपकवर्णत्वसमनियतसमुदायत्वनिवेशात्प्रतिज्ञादेरसमुदायादावतिव्याप्तिर्न्वासानवच्छेदकेसादिविशेष
२ णावैयर्थ्यमा [redacted] प्रतिज्ञाद्यवयवा रणयत्तत्तत्समुदायत्वभिन्नत्वमेवान चैवंस्वनिष्ठन्यूनवृत्तिता निरूपकत्वसमक [redacted] वर्णत्वसमनैयत्यनिवेशनेनातिव्या
प्तिसंपायस्ता नवच्छेदकेसादेस्तत्तत्समुदायत्वभिन्नत्वस्य च प्रवेशे महागौरवादितिवाच्यम् धूमादालोकवान् इति प्रतिज्ञायां धूमादितिभागमात्रवृत्ति [redacted]
[redacted] निरूक्तसमुदायत्व [redacted] निष्ठ [redacted] न्यूनवृत्तिता निरूपकत्वेऽतो [redacted] नितादवयवस्य [redacted]
[redacted] इत्थं चावच्छेदकत्वनिवेशनमपि सार्थकं अन्यथा हेतुप्रतिज्ञैकदेशज्ञानस्यस्वानवच्छेदकताहशान्यतमजन्यतानिरूपितज
नकतावच्छेदकविषयिताविशिष्टजनकतानिरूपितयातत्समुदाये ऽतिप्रसंगो [redacted] तत्तदर्थेशाब्दत्वपर्याप्तावच्छेदकताकजन्यतान्य
तमजनकताश्रयमत्किंचिज्ज्ञानविषयवर्णत्वव्यापकसमुदायत्वं वाच्यम् तत्र चपूर्वोक्तस्वनिष्ठन्यूनवृत्तिता निरूपकत्वेनिवेश्यप्रतिज्ञाद्यादिकमलक्ष्यं स्वावच्छेद मात्रं
कत्व [redacted] ताहशजनकताद्यपशब्दत्वादिकं तत्तत्समुदायत्वभिन्नत्वं चव्यर्थमिति [redacted] यत्किंचित्त्वएकमा त्रवृत्तिधर्मः स्वाधेयतासंबंधेनज्ञानवृत्ति तथात्व
शिष्टायाः ऽकमात्रवृत्तिर्यो धर्मस्तद्वि [redacted] स्वाधिकरणायत्किंचिद्वृत्तित्वसंबंधेनज्ञानत्वविशि [redacted] इत्यत आह स्वमिति। [redacted]
[redacted] भागे धूमादालोकवा [redacted] कदेवे। ननु पर्वतो वह्निमानि [redacted] वत्कपर्वतपदे। तन्मात्रज्ञानस्य तथाविधजनकतानाश्र
यत्वादतउक्तं हेत्वर्थेति प्रतिज्ञादीसादिना धूमाद्वह्निसाध्यकोदाहरणादिपरिग्रहः। नन्वत्रसाध्यविशिष्टपक्षविषयिताघन्यतमनिष्ठप्रयोज्यता निरूपितप्र

नित्यादौ व्यभिचार इत्यत आह ध्येयं नमु ४ व्याद्योर्वर्णतादि २

२ शब्दोऽस्वार्थत्व वादवत्किंचिद्विषयविषमसमाप्ताधिकरणभेदप्रतियोगिताव च्छेदकतानवच्छिन्नत्वमिति यावत् · विषयिता अतिवेशनात्मा ९ नियतावयवहृदयस्थातं चास्मात्किंतदा
मनुगमः वन्हतत्तदस्थानार्थप्रवर्णविषयिता · शब्दत्वादाद्यजनकतावच्छेदकविषयिताशालि सात्वकसमुदायत्वं यत्किंचित्पदार्थव्याप्यार्थ ·· ० एवमेव
प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकयत्किंचिद्वर्णपंचकव्यापकत्वमित्यत्रापि प्रतिज्ञात्वादौ यत्किंचित्वगर्भत्वे नस्याच्छेदपर्याप्तिक प्रतिज्ञात्वक धर्मविवक्षया ५
ननुगमो ह्यारः व्यवस्थायत्किंचित्प्रतिज्ञात्वादि धर्मविषयकव्यापकत्वमेव प्रयात ३ × हेतो पर्यासंधेतावच्छेदकत्वविशि ×

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२

३३ ला ध्यविषयतानिरूपितत्वोपादानेन तादृश२७ वस्तुतस्तादृश२साध्यविषयतानिरूपिततयातादृश१२

योजक [redacted] पत्किंचिद्दूषपिताकवर्णसमुदायत्वंवाच्यंतत्रचप्रकृतपक्षविशेषणतापन्नप्रकृतसाध्यान्वितप्रकृतहेतुविशिष्टहेतुत्वविषयि

२२ ति तानिवेशान्नपञ्चाद्यघटकहेत्वर्थबोधकभागेऽतिव्याप्तिः।यद्वि [redacted] कृतानोक्तदूषणं कदापि [redacted] हेतुत्वविषयितानिकार्यतनुदयस्तन्मु तत्का२

ख्यविशेष्यतायाऽपिताहृश२हेतुत्वविषयतांप्रति प्रयोजकत्वा ऽभावात्।तादृशविषयताशालिबोधे प्रतिज्ञोत्तरहेतुज्ञानत्वेनहेतुत्वेपिहेत्ववयवस्यतत्प्र

योजकत्वंहेतुः स्वार्थविषयताप्रयोजकइतिव्यवहारात्हेतुविषयतायांव्याप्त्यादिविषयितानिरूपितत्वंदेयं तेननिगमनघटकतस्मात्संदेनातिव्याप्तिरित्यत

आह।एवमिति।वाक्यद्वयात्मकस्येति।वाक्यचतुष्टयात्मकस्येत्यर्थः।ननुसपक्षतावच्छेदकाद्यवच्छिन्नेहेतुसाध्ययो"शिक्षावशात्हिशब्दत्वपर्याप्तावच्छेदक

ताकजन्यतामाशंक्यार्थसमाजरूपबाधकेननिराकरोति।तादृशार्थद्वयेति।तथाचेति।उक्तरूपदृष्टाऽव्याप्यकथनात्रूढव्याप्यव्यापकभावानापन्नजनक

ताद्वयघटितत्वावच्छेदकविषयिताविशिष्टतादृशजनकतावत्वनिवेशेतथाविधयत्किंचिज्जनकत्वतदुपाधयद्विजनकतामान्यविषयसामेव्याप्तिपो

मितावच्छेदक [redacted] णितावच्छेदकजनकतामयपक्षसत्वंव्याप्यव्यापकभावेनेतिविशेषणार्थः।उदाहरणेचतथाविधंजनकताद्वयमेवंद्वित्वेनोदाहृ।एण

र्थबोधीयजन्यताद्वयनिवेशात्तथाविधजनकताद्वयघटकस्थलपंचकनिवेशाद्धानाव्याप्तिः।प्रतिज्ञाहेतुज्ञानताविच्छिन्नजनकतद्वयंचनयनेपाक्यमितिना

निव्याप्तिः।स्वानवच्छेदकेत्यादिविशेषणंचद्वित्वेनोदाहरणार्थबोधजन्यतेप्रवेशनतदीयजनकतेत्यपदेनोपादेये।तादृशजनकतापावोदाहरणज्ञानी राम०

यजनकतायोभेदोनिवेश्यइति।द्वित्वेनेति।उदाहरणाबृहत्कवाक्यचतुष्टयविषयकप्रत्येकज्ञानचतुष्टयनिष्ठजनकताऽऽदायतन्निष्ठचतुष्टयावच्छि

तथाविधत्वेपारिभाषिकमितिभावः॥३

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

९ हेतुके ध्ये तथाविधजनकतावच्छिन्नभेदाप्रतियोगितावच्छेदकधर्मपर्याप्त्यधिकरणतावच्छेदकविषयतामेत्यादिक्रमेणानिवेशे तुदा
हरणे मानाभावः तदेकदेशे नास्ति व्याप्तिश्च भेदाप्रतियोगितावच्छेदकहरणप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धिजनकताद्वयभेदनिवेशा[illegible] तः यद्यप्र

न्न भेदस्यैवान्यतमत्वकुक्षौ निवेशान्नातादृशजनकतावच्छेदकविशिष्टानिरूपकवर्णसमुदायत्वस्य संग्रहे एवकारस्यानेकदेशेऽतिव्याप्तिरिति भा
वः। घटपदादिहितेन निवेशोपि वाक्यचतुष्टयसमुदायत्वसंग्रहः। तथापि तथा निवेशे तस्य वाक्यद्वयघटितसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वमिति चतुष्टया
नुधावनं। दुर्वारतादिति। अन्यतमत्वस्याव्याप्यवृत्तितया पर्याप्तिविवक्षायाः असंभवात्। ननु दीधितिकृन्मते घटपदघटकमागद्वयघटितत्वस्यैकदेशसाधा
रणतया ऽतिव्याप्तिर्दुर्वारैवेत आह। पूर्वेति। ननूदाहरणत्वस्य पूर्वचरमाकथं तद्भेदानुयोगितावच्छेदकत्वमित्याशयेन शंकते। नचेति। [illegible]। इत एव
यवानन्वितस्वार्थबोधकत्वं नेहोदाहरणत्वमात्माश्रयात्। अतः आप्तताभिमतत्वानिष्टव्यापकताभिमतसंबंधबोधकत्वमुदाहरणत्वमिति मूलोक्तलक्षणप
रिष्कृतेति। स्वघटकेति। स्वं वाक्यं। स्वघटकपक्षसदोपस्थाप्यतावच्छेदकदृष्टांततावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुप्रकारताशालिशाब्दबोध
जनकतावच्छेदकत्वं तथाविधतद्वच्छिन्नभेदावच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुप्रकारताशालिशाब्दबोधजनकतावच्छेदकत्वोभयवत्प्रकारताश्रयानुपूर्वी
घटकवर्णत्वव्यापकं जन्यत्वव्याप्याधिकरणकालध्वंसोत्पत्तिकरणाक्षणाध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तिः स्वघटकतत्सदोपस्थाप्य वृत्ति
तावच्छेदकदृष्टांततावच्छेदकधर्मेतद्वच्छिन्नभेदावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यप्रकारताद्वयशालिशाब्दबोधजनकतावच्छेदकप्रकारता
श्रयानुपूर्वीघटकवर्णत्वव्यापकसमुदायत्वमित्यर्थः। स्वमानुपूर्वी महानसत्वचरमत्वादिना मानेतु तादृशभेदानुयोगितावच्छेदकावच्छिन्नविशेष्यतानिवे
शणात्तु चितानुपूर्वीकिहेतुसाध्यविशिष्टधर्मिबोधकद्वयकसमुदायत्वमप्येतदेवेयविप्रकृतहेतुविशिष्टतत्तदन्यप्रकृतसाध्यविशिष्टतत्तदन्यधर्मिविषयक

वेदान्ति ४

तावच्छिन्नजनकतानिरूपितप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नजनकतानिरूपिततादृशत्वे नानिवेशपदतन्निरूपितजनकतावच्छेदक
विषयतानिरूपकवर्णसमुदायत्वोदाहरणत्वमन्यतरवत्वं लक्षणं उदाहरणत्वं चाग्रिमग्रन्थानुगतमिति न कोपि दोषः ३

१ ननु स्वघटकपदपदोपस्थाप्यत्वं पर्वतमहानसत्वादिकं [illegible] यानि स्यादावतिव्याप्तेः एवं न स्वपदोपस्थाप्यत्वानुक्तौ वादान महानसत्वेनेति [illegible] अन्यदपि
व्याप्तिस्यादावतिव्याप्तिः। न च स्वत्वनिवेशादन [illegible] वच्छेदकाद्यवच्छिन्नविशेष्यतानाप्रयोजकता [illegible] पद
दिन्नमवच्छिन्नजनकतावच्छेदकताद्वयवत्प्रकारताश्रयानुपूर्वीत्यादिक्रमेण निवेशात्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

३८

35

हेतुमत्ताबोधकेत्वत्र ५

समूहालंबनबोधीयपावकारणतावच्छेदकयत्किंचिद्विषयताश्रयवर्त्तित्वव्यापकसमुदायत्वमाधायानामुदाहरणत्वं संभवति तथापि स्ववह्निमान्यो
योधूमवानिति वाक्य वारणाय पक्षाश्रयीभूतसाध्यविशिष्टबोधकवाक्याव्यवहितोत्तरत्वस्य हेतुविशिष्टबोधकवाक्ये दर्शितं तत्समुदायत्वं तद्भिन्नत्वनिवेशे गौ य
रवात्तन्नोक्तम् । इदं तु बोध्यम् । स्वघटकयत्पदोपस्थाप्यधर्मितायो हेतुमत्त्वबोधः पक्षे हेतौ तादृशधर्मिबोधः तदव्यवहितोत्तरबोधजनकं यद्वाक्यं पञ्चपदं तं तत्प्रयुक्तं स्व
घटकतत्पदोपस्थाप्यधर्मितासाध्यवत्ताबोधः पक्षे साध्ये तादृशधर्मिबोधस्तदव्यवहितबोधजनकं यद्वाक्यं तदुभयत्वमुदाहरणत्वं तेन पत्रधूमत्तत्वाग्निरित्युदा
ध हरणे नाव्याप्तिः । पाकछ्तीतरभेदादौ साध्ये तूँ[illegible]मावत्तत्तद्धर्मिविषयतानिरूपितहेतुविषयताकत्वेन बोधयोरनुगमः तत्तद्धर्मिविषयताया हेतुतावच्छे
दकसंबंधावच्छिन्नाधेयता संबंधानवच्छिन्नप्रकारतान्यत्वनिवेशाद्धूमोपद्वानितिबोधस्य हेतुतावच्छेदकसंबंधानवच्छिन्नप्रकारतान्यत्वनिवेशाद्धूमेपो
दर्वं पद्दितिबोधस्य चानुदासः । [redacted]साध्यवत्ताबोधको[redacted]साध्यतावच्छेदकसंबंधावच्छिन्नाधेयतासंबंधानवच्छिन्नप्रकारता
न्यत्वं साध्यतावच्छेदकसंबंधानवच्छिन्नप्रकारतान्यत्वे विषयितयोर्विशेषणमिति विशेषः । यो यो धूमवान् स तत्र वह्निरित्यादेर्वारणाय पत्वे तु न तत्समुदायत्वमेदो निवे त
श्यः । न तु प्रत्यक्षादेर्थवत्त्वे तु पत्पदोपस्थाप्यधर्मिहेतुमद्घटितानां तत्पदोपस्थाप्यतादृशधर्मिसाध्योभयघटितानां च यादृशयादृशविशिष्टार्थानां बोध राम०
कानुदाहरणघटकानि सांप्रदायिकानि । तादृशतादृशविशिष्टार्थबोधानामेव निवेशः । ननु यादृशपक्षसाध्यहेतुकानि यादृशेयादृशेधर्मितायादृशयादृशवि
शिष्टार्थवत्त्वसमूहालंबनबोधजनकानुदाहरणानि तादृशानि तावद्बोधानां प्रक्रमोक्तस्वघटकभागकसमुदायवारणाय तत्तत्समुदायत्वमेदकूटस्य नि

च तथाविधसाध्यविषयताकबोधत्वेनानुगमः तत्र ५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७ विशिष्टेत्यत्र समूहालंबनत्वस्यार्थविशेषणत्वं तया समानिशादिकार्यतावच्छेदकत्वमितिविशिष्टवैशिष्ट्यबोधत्वाभिमानो दर्शितः सर्वत्रस्याद्यार्थसमूहालंबनमनुपपन्नं प्रत्येका
वयवज्ञानबोधानुपादायःलक्षणास्यदुष्क

पत्थाः १ स्लोकाः ७

वेद्यानीयतापत्तेः। एवंत्वद्घटकपत्यद्वैष्प्यधर्मिणिसाध्यसामान्याभावसाध्यवद्भेदवोधौताहशाभावेताहशाभेदेधर्मिवोधंचनिवेश्यपूर्वप्रयोगार्हतद्घटकंत्वताह
शरीतोन्नप्रयोगार्हंचतद्घटकंनि[redacted]अतिरेकुदाहरणलक्षणंकार्यं। असंताभावसाध्यकेतुताहशाधर्मिणिप्रतियोगितावच्छेदकावच्छिन्नवत्ताबोधः
प्रतियोगिनिताहशाधर्मिवोधस्याधिकोनिवेश्यः। भेदसाध्यकेचताहशधर्मिणिप्रतियोगितावच्छेदकवोधः प्रतियोगितावच्छेदकेचताहशाधर्मिवोधोऽ
धिकः॥ मनुप्रतत्पन्नमादेर्यथवत्वपक्षेतूं[redacted]इतरभेदादिसाध्यके[redacted]। व्यतिरेकिण्यापत्तेर्व्यतिरेकावयवत्वं[redacted]भिन्नमेवेतिद्वतमधिकेन। ननूदाहरणेक
देशवारणायमयाप्रतिज्ञाघटकत्वंनिवेश्यतइत्यतआह। नापीति। न्यायजन्यज्ञानस्येत्यादौ पक्षांकामिसंतस्योक्तगुरुत्वलक्षणाद्वयमपेक्ष्यपरामर्शप्रयोज
कवाक्यत्वंन्यायत्वं तथाविधवाक्यघटकवाक्यत्वमवयवत्वमितिक्रमेणन्यायावयवलक्षणेलाघवात्प्रतिज्ञादिपंचवाक्यजन्यमहावाक्यार्थबोधस्यैवन्याया
र्थविषयकत्वेनपरामर्शरूपत्वाभावादोक्रमेणलक्षणासमन्वयइत्याशंकामिसर्थः। निराकरोतीति। निराकर्तुंस्वीयलक्षणद्वयस्यातिव्याप्तिनिराकरोतीत्यर्थः। त
थाचमूलस्यातिव्याप्तिपदस्यपरामर्शप्रयोजकवाक्यत्वस्यन्यायत्वमतेवह्निव्याप्यधूमवानयमितिवाक्येऽतिव्याप्तिः। एवंताहशवाक्यघटकत्वस्यावयवलक्षणत्व
मतेतदेकदेशेऽतिव्याप्तिरित्यर्थः। स्वमतेऽतिव्याप्तिंशंकेवनास्तीत्याह। मूलेतेनेति। ननुतेनेत्यादिमूलमसंगतंपूर्वोक्तलक्षणासत्त्वस्यालाभादित्यतोमात्रपदंपूर
यति। परामर्शमात्रस्येति। विशेषाविति प्रयोजकांतपरिचेयावितिशेषः। तथाचपूर्वोक्तलक्षणेसत्त्वलाभः॥ तत्स्येति। तथाचव्यवहर्तव्यतावच्छेदकसत्त्वानिवं
धनोव्यवहारोऽप्युपेयइतिभावः। लाघवतः। संग्राहकलाघवात्। न्यायएव। न्यायव्यवहारविषयएव। सोपीलस्योपनयेपीत्यर्थोऽतः परामर्शनीयंपूरयति।

गुर्विति नव[illegible]रुपाध्यायानामुदाहरणाघटकत्वमात्रं दीधितिकर्तांनुप्रतिज्ञाघटकत्वचतुष्टयमधिकं एवमुभयघटकेत्यत्रजनकतास्पृष्टतत्समुदायत्वंताह
कं। गुर्वाध्यायानांतुतदेकमेवोत्तविपरीतगौरवं स्वावच्छेदकेत्यादिविशेषणघटकस्यविषयितानांतस्यभेदपूर्वात्मकत्वनिमत्वस्यचतन्तानांनचतुष्टयस्यभेद
द्वयात्मकत्वतन्नत्वस्यैवचव्यापकताघटितावच्छेदकविषयितानांहिसमुदायत्वसमकालंरूपप्रत्वादितिवाच्यंतानवच्छेदकत्वात्रयत्वस्यघटकतावशेषणस्यतुष्ट
वस्यान्यतमजन्यतानविषयितविशेषनागौरवस्यदुर्वारत्वात् ७ विशेष्यघटकस्य २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

४

३५ वह्नीति। अवध्यपेक्षां निरस्यति। वा केति। तथा च विशेषः न्यायव्यवहार्यताया वर्तकत्वदवच्छिन्नभेदस्याप्यः। भेदे प्रतियोगित्वरूपपंचम्यर्थोऽन्वयबोधः। अ
35 न्यादृशन्यायव्यवहारविषयासत्त्वे दूषणासंगतिरतो यादृशेतिनियमत्वं भयितुं विशेषयं पूरयति। निग्रहेति। [illegible]
[illegible]। तद्धेताविति। जिज्ञासोद्देतीत्यनुवर्तते। एवमग्रेऽपि। उपनयप्रयोगानुपपत्तिं निरस्यति। अत्रापीति। नन्वाकां
व क्षाविरह इति मूलासंगतिः। चक्षुरादेर्वह्निव्याप्यवत्ताबोधकत्वाभावस्यैव जिज्ञासितविषयकत्वादिसत्तत्त्वन्मूलमवतारयति। नन्विति। अवतारणानुसारेणार्थमाह
कांक्षानिवृत्तीति। ननु विजातीयबोध[illegible]जनकत्वमेव न्यायत्वं विजातीयबोधजनकत्वमेव प्रतिज्ञात्वादिकं। एतादृशवैजात्यस्य [illegible]नुपरामर्शादा च
स्थापय वकत्वनान्नोपनयेऽतिव्याप्तिरित्यस्येपाम तमनुपपन्नयति। अथेति। विजातीयबोधजनकत्वस्य न्यायपदशक्यतावच्छेदकत्वपात्तु क्षितिनिक्षिप्तत्वेन वैजात्यसि
द्धिः। एवं पर्वतो वह्निमानिति वाक्यनिष्ठं यद्विजातीयबोधजनकत्वं तदेव प्रतिज्ञादिपदशक्यतावच्छेदकमित्याशयः। अत्र प्रतिज्ञापदवाच्यानां पर्वतो वह्निमानि
त्यादिवाक्यानां तत्तद्व्यक्तित्वेन कारणत्वे [illegible] व्यभिचारात् अनुगतानतिप्रसक्तरूपस्य दुर्भिलतया विजातीयबोधजनकत्वस्यैवासंभावितत्वेन तत्सप्रति
ज्ञापदशक्यतावच्छेदकत्वाभावेन तद्घटकतया वैजात्यसिद्धेरसंभवात् तद्घटितलक्षणासंभव इत्यभिसाशयेन दूषयति। तत्तज्ज्ञानेति। ननु दुर्निरूपमिति मूलम
संगतं जनकतानिरूपणेऽनुगतरूपानपेक्षणादतो व्याचष्टे। असंभवीति। तथा च किंचिद्धर्मावच्छिन्नजनकतानिरूपितकार्यतावच्छेदकतयैव वै[illegible]क राम
[illegible]च्छेदकस्य दुर्निरूपत्वे वैजात्यसिद्धेरसंभवे न लक्षणासंभव इत्यभिमतिभावः। तत्तज्ज्ञानस्येति। तथा च तादृशरूपग्रहमंतरेण जनकत्वं दुर्ग्रह

अवच्छेदकासत्त्वे कारणताया असत्त्वेन तन्निरूपितकार्यतावच्छेदकतया।

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

४ शब्दत्वस्यैव ... वैजात्यघटितस्य ... लक्षणत्व ... च्छेदः ... ॱ्नायाः ... अभावोपि ... मितिभावः ... इत्यादि ... एवंच ४

मितिमूलार्थः॥ इदमापाततः। तादृशरूपग्रहमंतरेणापि जनकतायाः सुग्रहत्वात् तद्धर्मावच्छिन्नत्वविशिष्टजनकताग्रह एव विशेषणाज्ञानविषयात द्धर्मि
ग्रहस्य हेतुत्वात्। अत एव दंडत्वाग्रहेपि दण्डो घटकारणतात्वग्रहनिर्वाहः। ननु पर्वतो वह्निमानित्यानंतरवाक्यनिष्ठानुपूर्वीमहत्त्वैवानुगतानतिप्रसक्तस्य सुमिल
मायादि तयात दूषेणा विजातीयबोधं प्रतिजनकतासंभवात्तथाविधजनकत्वस्यै[redacted]प्रदर्शकस्य तावच्छेदकत्वं भविष्यतीत्यत आह। तच्छीकारे इति। तथैव तादृशा
नुपूर्व्या [redacted] एवलक्षणा ... वैजात्यघटितलक्षणे वैतिॱ्ननुलक्षण ... नतादृशकत्वयोगबोधप्रतिबन्धकतानिति चेत्तत्राह अनुगतानुपूर्वीक
[redacted] कत्वेन तस्या एव लाघवेन प्रतिज्ञापदशक्यतावच्छेदकत्वसिद्धेः विजातीयबोधजनकत्वस्य तथात्वेनोपगम्यते [redacted] तद्घटकतया वैजात्यसिद्धि[redacted] इति
प्रत्यादि [redacted] तद्वैजात्यघटितलक्षणमसंभवदुक्तिकमितिभावः। ननु विजातीयबोधजनकतानुपूर्वीरूपधर्मयोरुभयोरपि विनिगमनाविरहेणशक्यतावच्छेदकताया पतिताः दोषः
कलेवरेण आवश्यकत्वया वैजात्यसिद्धिर्दुर्वारैवेत्याशंका[redacted]वाधकं[redacted] अन्यथेति। [redacted] वैजात्यस्यनानात्वस्वीकारे [redacted] प्रतिज्ञाहे २
तूभयजन्यबोधे प्रतिज्ञाजन्यतावच्छेदकवैजात्यस्वीकारापत्तेः। अन्यथा तत्तादृशप्रतिबंधकांतर्कल्पनारूपगौरवापातात्। [redacted]
[redacted]। एतद्दूषयेन गुरुभूतमपि प्रतिबंधकत्वमुपगम्यते तत्र वैजात्यानुपगमेतत्प्रतिज्ञायामव्याप्तिः। नच तादृशबोधे तादृशवैजात्यानुपगमेपिनक्ष
तिः। विजातीयबोधजनकतारूपलक्षणे जनकत्वं न फलोपधानमपि तु स्वरूपयोग्यतेति केवलप्रतिज्ञाजन्यतज्जन्यबोधं प्रति एतत्प्रतिज्ञाया अकेः फलोपहि
तत्वाभावेपि स्वरूपयोग्यतासद्भावेन लक्षणासमन्वयो[redacted]ति वाच्यम्। स्वरूपयोग्यता[redacted] तादृशवैजात्यावच्छिन्नबोधजनकतावच्छेदकधर्मवत्त्व एवं चकारणताव
ताथतातद्बोधानुपधानेपि ... हारसिद्धेश्चे १
पुनरन्तरस्यप्रवृत्तिनिमित्ततानुपपत्तिभिन्नयुक्तेः मानाभावोपयुक्त भावः ... प्रतिज्ञाहेत्वादीत्यादि ... उभयादीति १

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

मत्विनामावश्यकतयान्तत्रे १ दि १ नतानां २ दि पाए पातलि [illegible] प्रतीतिनिमित्त

३६ [redacted] छेदकत्वे नाभिमत [redacted] धं [redacted] वलाघवेन लक्षणात्वस्य प्रतिज्ञापि दशाकन्तावच्छेदकत्वस्य च संभवा [redacted] वैजात्यावच्छिन्न बोधजनकता [redacted] पपामः १

36 [redacted] या [redacted] नद्वटकतया वैजात्यसिद्धिर्भावैति वैजात्य [redacted] स्वीकार संभ [redacted] वइतिभावः यत्तु तत्स्वीकारे त्विति [redacted] पद पदि २

तादृश शक् [redacted] तावच्छेदकतया सिद्धवैजात्यादेः कारणतावच्छेदकस्य सुनिरूपतया नानुगतरूपस्य दुर्निरूपते तिभावइति तन्न। तथासति तस्यैव लक्षणात्वादिस्य तथा

चसाधकाभावइति दीधितिसंगतेः। उक्तरीत्यां [redacted] शक्ततावच्छेदकतया सिद्धवैजात्यस्यैव शाब्दनिष्ठवैजात्यसाधकत्वसंभवात्। केचित्तु तस्यैवेति। तथा

च सुनिरूप्यत्वे तस्यैव लक्षणात्वापत्तिभयेन सुनिरूपितत्वस्य वक्तुमशक्यतया तद्दुर्निरूपमेवेतिभावः। [redacted] कारणतावच्छेदकस्य दुर्निरूपत्वे पि जातिसिद्धि

वदेति स्वीकारे बाधकमाह। अन्यथेति। एतदेव दीधितिकृताकेचित्तित्यादिनाऽभिधास्यते। [redacted] मा नाभावइत्यस्य तात्पर्यान्तरं वदतां मतमुत्थापयति। अननुगमेनेति वैजात्यस्यै कोऽनुग

तलक्षणांस्यात्तदेवत्तुनेत्यर्थः। अयं च असंभवे हेतुः। एकै [redacted] एकैकेति। अनेकावयवजन्यतावच्छेदक

तोन जातिघटितलक्षणादावव्याप्तरन्यत्वप्रवेशो गौरवं वा [redacted] अंतिपसंजकजातिघटितावयवान्तरलक्षणे [redacted] राम ०

[redacted] तिवोधं। कदाचित्। क्वचित्। स्यादिति। संभावनामात्रान्नव्यभिचारित्वलाभइत्यनोवैनेतिति। कस्यचिन्मन्नश्चादेः। तादृशस्यातिप्रसक्तत्वेप्यनुगतत्वस्य। तादृश

कजन्यतानानावयवजन्यतोपाधात [illegible] भेदेनाननुगमो बोध्यः

उनाननुगमः १

प्रतिसादृश्यं [illegible] तस्य [illegible] प्रतिसाभेदेन जातिभेदेत्वेकवैजात्यघटित [illegible] लक्षणास्या [illegible] प्रतिसाधारण [illegible] भार

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तार्त्त्यचेन द्वित्र्यादिव्याप्यतावच्छेदकसमावेशानुपगमे तु व्यभिचारः स्यादिति ६

जातिः। जातिविशेषः। अनुगतेति। उत्रिरूपमिति। दूषणे इति शेषः। अपि त्विति। तथा चानयैत्यादिदूषणे एवमशक्तं तं निर्भरं इत्यर्थः। प्रतिज्ञाद्यवयवादिति
मूलस्य प्रतिज्ञादिलक्षणपरत्वं दीधितिकारोक्तं तज्जनकेति मूलपाठमालंव्य खंडयति। इत्यादिना। तेनैवेति। दोषमेदप्रयुक्तापौनरुक्त्यशंकानिराकर
णाय। किंत्विति। न्यायपदादेर्नानार्थत्वेमानाभावाज्जगतीतलेयावंतो विभिन्नपक्षसाध्यकहेतुकन्यायास्तेषां सर्वेषामनुगतलक्षणं कार्यं। तच्च न्यायसामान्या
वयवैर्मिलित्वा एकः समूहालंबनात्मको बोधो जायते। तत्र एकं वैजात्यं स्वीकृत्य तादृशवैजात्यावच्छिन्नबोधजनकत्वं न्यायसामान्यलक्षणं एवं जगति विद्य
मानावयवसामान्यलक्षणमपीति मूलकृदाशयमभिप्रेत्य। अत्र प्रत्येकमित्यादेर्वैयर्थ्यमाशंक्य सार्थकथनपूर्वकं परिहरति। प्रत्येकमिति। नन्वेवं न्यायादिसा
मान्यलक्षणस्यान्यत्येत्यादिना न दूषणं भवतीत्यत आह। एवंचेति। नरेति। एवं रीत्या सामान्यलक्षणे सिद्धे वैजात्यं तर[illegible]सीकृत्य न्यायविशेषल भप
क्षणमपि कार्यमिति विशेषलक्षणानुरोधेन भिन्नभिन्नवैजात्यस्वीकारे संकरः। एवमवयवसामान्यलक्षणस्योक्तत्वेन तद्विशेषेपि संकर इत्यर्थः। जातिस्वी
कारेऽसंकीर्णेत्यादिः। अनुचितमिति। एवंचेदानीं प्रतिज्ञासामान्यलक्षणस्यानुक्तत्वेनाग्रे तल्लक्षणोक्तौ न पौनरुक्त्यमिति भावः। कथंचिदिति। तथा च मूलकृतामेव
ननर निरूपणं पुनः कथनं वीजं न तु [illegible] परमालोचयतां दीधितिकृणामिति भावः। विषयो विधेयः। अवयवांतरे। धूमादिति हेत्ववयवांतस्यापि हेतुत्वोद्देश्यकधूमवि रो
८ धेयकबोधजनकत्वात्। तद्विशेषपरत्वं। साध्यवत्पक्षपरत्वं। बोधे [illegible] तदेकदेशे बोधे विषयितासंबंधेन साध्यवत्पक्षान्वयः एवं च साध्यवत्पक्षविषयक
बोधजनकत्वे सतिन्यायावयवत्वमिति निष्कर्षः। नतत्रेनेति। तथा सतिन्यायत्वघटकप्रतिज्ञायां विशिष्य तन्निवेशेपि अवयवांतरेऽतिव्याप्तिः। पक्षतावच्छेदक

ति २ क्वचित्पुस्तके न पाठः २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१० तथापि पक्षतावच्छेदकनिवेशेऽप्युक्तदोषतादवस्थ्यमित्यत आह । अनुगमपक्षेऽपि अन्वयव्याप्तिज्ञाने तत्र उपनयार्थघटकनिगमनार्थघटकसाध्यवैशिष्ट्यावगाहि ज्ञानजनकत्वस्योपनयस्याभावेऽपि न्यायावयवविशेषितत्वादुपनयघटितनिगमनस्यैव न्यायत्वमिति । इदानीं च तथापि घटा किञ्चि
उक्तानुमितिविषयवर्णसमुदाय एवं तदिच्छति इत्याशयः । प्रकृतानुपपत्तिः सार्थक्यमप्रतिगमनस्य तथा प्रतिज्ञाया अपि पक्षतावच्छेदकमात्रविशेष्यकनिर्णये तु व्यर्थत्वमिति
तन्मते व्यर्थत्वमते । अथ यासामपि तत्सार्थक्यमते । प्रतिज्ञायां पक्षांशे साध्यवत्पक्षविशेषणत्वेन साध्यविशेषणत्वेन भानम् । परं तु समानधर्मे किंचिद्धर्मविशिष्टपक्षविशेषण

३८
पक्षविर
37

त्वादेः केवलान्वयित्वात् । अतो विशिष्टवैशिष्ट्यावगाहित्वावच्छिन्नजनकतानिवेशनमिति । तत्र प्रतिज्ञास्थले हेत्वादिजन्यतात्पर्यबोधे पक्षस्य
व्यभिचारवारणाय कार्यतावच्छेदकतया न विषयित्वनिवेशसंभवः । तादृशशाब्दत्वसम्पूर्णहेत्वादिकायाः कार्यतावच्छेदकत्वेन विवक्षितत्वात्
हेतुद्वितीयहेत्वर्थघटितप्रतिज्ञास्थलीयहेतावतिव्याप्तिः । तत्सम नियतायाः साध्यविशिष्टपक्षविषयकबोधात्तत्र तस्या निवेशोऽप्रसिद्धिः । तादृशपक्ष
विषयकतानवच्छिन्नतया तस्या निवेशो तत्र यवांतरे तिव्याप्तिः । तज्जन्यतायां अपि विषयविषयितानवच्छिन्नत्वात् । तादृशपक्षविषयतावच्छेदकविषयितावच्छि
न्नबोधोक्तावपि हेत्वर्थभागघटितप्रतिज्ञादौ हेत्वादावतिव्याप्तिः । तत्र तादृशपदानुपूर्व्यवच्छिन्नतानस्य पक्षनसाध्यविशिष्टपक्षबोधकत्वं तत्रानुत्तरता ष्यि
वच्छिन्नजन्यतासु तत्समजन्यतानिवेशेन । वस्तुतस्तु तादृशतादृशानुपूर्वीविषयितान्यनमविषयिताशालित्वेन जनकतोपगमात्रकारणं तत्र निवेशना
प्तिरिति तादृशविशिष्टवैशिष्ट्यावगाहिन्यादत्वावच्छिन्नजन्यतानिवेशः सम्यक् । नन्वेवमेकदेशार्थबुद्धित्वावच्छिन्नजन्यतावारणोनेकदेशवारणीयापत्ते त
तत्त्वमेवास्तु तत्त्वमत आह । न्यायेति अतिव्याप्तेरिति । पर्याप्तिनिवेशेन पर्वतो धूमाद् वह्निमानिति वारणम् । [redacted] प्रमादिनिगमनान्तभागेऽतिव्याप्तिः ति
संभवति अत्र
अनुगमपक्षानुरोधेन विशिष्य चाचकपदानामुपनयनिगमनोभयघटकभागद्वयघटितत्वस्य गौरवात् । वस्तुतस्तु एतन्न्यायावयवलक्षणशरीरे प्रतिज्ञादेरुभयघ मम
या
टकभागद्वयघटितत्वमात्रं निवेश्यं न तु न्यायतो [redacted]
४ [redacted] व्याप्तिः । साध्याधिकरणत्वेन साध्येनैव वा हेतोरधिकरणस्य निवेशात् [redacted]
साध्यस्य पादादानविशेषणत्वं तन्निवेशे तु पूर्वार्थ्यपि [redacted] निगमनेति व्याप्यस
त्वेनशुद्धवैयर्थ्यमिति । एतत्तु शब्देतासाध्यरूपतावधारणाय । तत्पक्षविषयत्वेन साध्यविषयत्वं तु नातिरिक्तं मतु पुनरर्थं कथमिति चेत् अन्यथानुपपत्तिविधर्मिवि
शेषणत्वेनैतु व्यवधाय कारणात् [illegible] किंचिद्वर्मविशिष्ट [illegible] १०
४ संभवात् निगमनेति नच मतुवोनिरर्थकतया केवलनिगमनान्तसाध्यवैशिष्ट्यावगाहि बोधसंभवः । पृष्ठ ४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१ अनुषंगपक्षे इति पक्षतावच्छेदकांशमपि विषयीकृत्य ... साध्यतायाः ... पक्षतावच्छेदकसाध्यतावच्छेदक ... मुख्यवि
२ पतत्वद्वयशेनेत्यादिः ... करणांशे ... विषयता ... तदर्थस्य ... तथा च

आतिव्याप्त्यादिनाव्याप्त्यादेः साध्यतावच्छेदकत्वेनू ह्य। साध्यतावच्छेदकतावच्छेदकताविशिष्टेत्यादि =)६

साध्यत्वधर्मितावच्छेदक

[redacted]ौ ननु दाहरणस्य व्यापकत्वेन साध्यवैधकतया शुद्धत्वनिवेशादेववा। यो किं पक्षतावच्छेदकनिवेशेनेत्यत आह। तदपीति। स
कलेति। [redacted]। नन्वत्र शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं न तावत्साध्यतावच्छेदकनिष्ठनिरवच्छिन्नप्रकारतावच्छेदकताकत्वं। तथा सति नि
गमनेऽतिव्याप्तेर्वारणापत्तेः। तत्र साध्यतावच्छेदकनिष्ठावच्छेदकतायाः निरवच्छिन्नत्वात्। नापि साध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रकारताकत्वं उपनये च व्याप
कतावच्छेदकसाध्यतावच्छेदकभानादेतदक्षतमिति तियत्किंचिद्धर्मविशिष्टइत्युक्तमिति वाच्यं। तथा सति धूमवान् धूमव्यापकवह्निमानित्युदाहरणजन्यबोध
मादायाव्याप्तिव्याप्तेः संगमयितुमशक्यतया पक्षतावच्छेदकनिवेशो नुतत्परीहारस्य सुकरतया च प्राचीनमताननुधावना संगतेरिति चेन्न। अत्र केचित्। साध्यता
वच्छेदकताविशिष्टप्रकारताकत्वं तद्विवक्षितं। वैशिष्ट्यं च स्वपर्याप्त्यनवच्छेदकधर्मावच्छिन्नावच्छेदकतानिरूपकत्वस्वसमानाधिकरणावच्छेदकतानिरूपक
त्वोभयसंबंधेन। स्वं साध्यतावच्छेदकता। निगमने च स्वपर्याप्त्यनवच्छेदकधर्मो व्याप्यत्वमेवेति नातिव्याप्तिः। साध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यप्रकारताक
निवेश त्वनिवेशे लाघवेपि प्रकृतपक्षविद्वेषिभिरुदाहरणे व्यापकतावच्छेदकत्वविशिष्टसाध्यतावच्छेदकभानमते तदुदाहरणार्थमगत्या गौरवस्याप्यंगीकारात्। [redacted]
नसाध्यतावच्छेदकतायामवच्छेदकतानिरूपकप्रकारतानिवेशासंभवाच्च एवं चोदाहरणेऽतिव्याप्तिसंभवमनार्षप्राचीनमतानुसरणमावश्यकमिति। तेन धीन
एतेन तत्वं धूमीयमिति यो धर्मः साध्यवृत्तिपरत्वे ... निवेशः। एतेन पर्वतो ज्ञानविषयवानित्यादिस्थलीयनिगमनेऽतिव्याप्तिः। साध्यतावच्छेदकविषयत्वस्य
विषयतात्वेनेवभानात्। अवच्छेदकतानिरूपकत्वदले साक्षात्परंपरासाधारणावच्छेदकतानिवेशेन प्रकारतायास्तादृशजन्यतादिधर्मावच्छिन्नावच्छेदकतानिरू
पकत्वेन तदतिव्याप्तिवारणे च पर्वतो वह्नित्वावच्छिन्नवानिति प्रतिज्ञायां वह्निप्रकारतायास्तादृशवह्नित्वघटकधर्मावच्छिन्नावच्छेदकत्वनिरूपकत्वादव्याप्तिः।

मध्यस्थो धर्मितावच्छेदकप्रकारभावनिरूपकः एतेनोपनयार्थे व्यापकतामात्राधिकरणपरत्वव्याप्तिप्रवेशे ... तस्य ... तत्र साध्य ... त्वप्रवेशेऽपि च व
स्त्रिया ... ... घटितो दाहरणस्यैव ... ८.२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१

४ यत्र तत्र आदि हेतुम द्वच्या यत्र तत्र योगितासामानाधिकरण्येन वीपत्ता

३ एवं चोदाहरणे ऽतिव्याप्तिसंगमनार्थं प्राचीनमते तानुसरणमावश्यकमिति॰ यत्तु शुद्धस्यादेरवच्छेद [redacted] कतावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकताकप्रकारत्वमर्थः॰

तेन २ अवच्छेदकताविशिष्टत्वं च स्वनिरूपितप्रकारतानिरूपितत्वस्वभिन्नत्वोभयसंबन्धेनेति [redacted] निरूपकत्वात्तं [redacted] उपनये व्यापकतावच्छेदकत्वेन साध्यतावच्छे

निरन्त दकधानादि व्याप्ति रत्नः यद्धर्मविशिष्टे त्वस्य साध्यत्वं ये ऽदाहरणेन मे यत्साध्यतावच्छेदकमानेन निव्याप्तिहं तनेः प्राचीनमतानुयायित्वं च व्यर्थं॰ ... व्यापकत्वधर्मितावच्छे

दक [redacted] तत्रामं ... यदि योगितायां धर्मि दोषव्यापायकत्वादनं व ... व्यापकत्वयोर्नयोदितधर्मावच्छिन्नधर्मविशिष्टे सत्त्ववैयर्थ्यं॰ ... व्यापक

३८ स्वानवच्छेदकेसत्त्वापिसाध्यत्वं परामर्शाधारतावच्छेदकतानिवेशेनुपर्वतो धूमज्ञानज्ञाप्यवान्धूमादित्यादिस्थलीयनिगमने ऽप्यंपरानुपगपक्षे ऽतिव्याप्तिर्दुर्वा

रैवेतिप्रत्युक्तं। तादृशाव्याप्यत्वावच्छिन्नावच्छेदकतानिरूपकता तत्साध्यतावच्छेदकतापर्याप्त्यनवच्छेदकधर्मावच्छिन्नावच्छेदकतानिरूपकसाध्यतावच्छेद

कावच्छिन्नप्रकारताकत्वं शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमित्यर्थः। नन्वेवमुपनयार्थस्य व्यापकसामानाधिकरण्यरूपव्याप्तिघटिततया व्यापकता

वच्छेदकतायां साध्यतावच्छेदकांशविशेषणत्वेन शुद्धत्वनिवेशादेवोपनयस्यापि वारणसंभवात् यत्किंचिद्धर्मविशिष्टस्य वैयर्थ्यं। न चाननुगमपक्षे शुद्धत्व

स्य साध्यपराततस्ये उपनयवारणार्थमेव तेनावश्यकमुपनयस्यापकस्यापि वारणीयत्वादितिवाच्यम्। अग्रे तस्यागमस्य चिंतनीयताभिधानादितिचेन्न। उपनया

र्थे साध्यवदन्यावृत्तित्वरूपव्याप्तिर्घटिते से त्वभिप्रायेण तदुपादानात्। [redacted] हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुवारणाय साध्यतावच्छे

दकसंबंधस्य निवेशनीयत्वात्। उपनयार्थे साध्यसंबंधितावच्छेदकरूपवत्त्वव्याप्तिर्घटिते केचित्। नन्वेवं विपक्षव्यावृत्तत्वस्योदाहरणार्थतायाः पूर्वमभिधाने

नसाध्यवदन्यावृत्तित्वस्यैवोदाहरणार्थघटकतासंभवाद्धृत्राचार्यैस्तस्य प्राचीनमतरीत्योदाहरणादरणं व्यर्थमितिचेन्न। उदाहरणार्थव्याप्तिघटितकाकिंरूपनया

र्थ एव तत्र तज्ज्ञाने धूमवान्वह्निमद्भिन्नो नवेति संशयापसरणार्थविशिष्टोपस्थितसकलहेतुविकरणे वह्निमत्त्वावोधस्यावश्यकः उदाहरणार्थे व्याप्तिप्रवेशे तद्वा

नार्थमुक्तवोधस्यान्यतोऽपेक्षणीयतापत्तेरिति प्राचीनमतादरणं सम्यगेवाप्यथापि वह्निमत्कालीनपर्वतपक्षके उपनयार्थे व्यापकसामानाधिकरण्यरूपव्याप्तिभाने

पि यत्किंचिद्धर्मविशिष्टस्य सार्थकं। न च साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यतानिवेशेन तत्प्रयोजनं गतार्थं। ननु विशेष्यतायां किंचिद्धर्मी

६ नचैनमतेवाक्यमात्रेण मवानिष्ठ उदाहरणजन्यबोधे व्यापकत्वं तथा नाप्रमस्य ... उदाहरणजन्यबोधे व्यापकत्वं नभासते हेत्वादित्यादिरवनात्तत्ताने॰ यत्र ... पटितो

दाहरणं यादृश मते ननु व्याप्तिः व्याख्याय मतामते वाचकाभावात्॰ ननु साध्याभाववद्वृत्तित्वरूपाव्याप्तिः अभावत्वरूपताध्यधर्मितावच्छेदकप्रवेशात् अनुयोगि

तायामेवतात्पर्यं पवनिवेशनम्॰६

पा॰ १ ५ वह्निमाने वधाप्यव्याप्तिसुदाहरणभारी ... ५

[illegible]

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

(पक्षतावच्छेदकावच्छिन्नत्वोपादाने पि ज्ञानं जन्यं तद्व्यक्तित्वादित्यादौ व्याप्यतायाः पंचम्यर्थतया तत्र प्रकृतपक्षे शुद्धसाध्यतावच्छेदकांशे भवेशि-
ष्टस्यावश्यं निवेश्यत्वात्। इदं तु शुद्धत्वप्रयोजनं मुख्यं नेनान्यथासिद्धं)

तस्य साशयपूर्तिवाच्यम्। तथासति साध्यवदन्यावृत्तित्वरूपव्याप्तिभानेपि तावत्स्ययं न प्रयोजनालाभात् तथापि प्रसिद्धस्यलदर्शित
व्याप्तिनिवेशेनैव प्रयोजनमिति बोध्यम्। वह्निमन्महानसकालीनपर्वतपक्षकोपनये त्वगतिरेव। महानसत्वावच्छिन्ने शुद्धवह्नित्वाव-
च्छिन्नप्रकारकबोधजनकत्वात् यद्वा व्यापकसामानाधिकरण्यरूपव्याप्तेर्नैवाप्युपनयार्थघटकता। तथा चोपनयसामान्ये नाप्ति
व्याप्तिरित्याशयः। वस्तुतस्तु यत्किंचिद्धर्मावच्छिन्नत्वेन निर्भरः निर्भरस्तु मुख्यत्वरूपवाएवं चोपनये साध्यवदन्यावृत्तित्वभानेव वह्निम
न्महानसस्यपक्षघटकत्वेवानक्षापिदोषइति अम्भववदिति। उपनयवाक्याद्व्यापकत्वस्य व्यापकतावच्छेदकत्वविशिष्टसाध्यतावच्छे
दकस्य भानेपि साध्यतावच्छेदकपर्याप्तावच्छेदकताकसाध्यप्रकारताकबोधजनकत्वं तत्रास्त्येव व्यापकतावच्छेदकताया अव
च्छेदकतावच्छेदत्वात्। उदाहरणवाक्यात्तादृशव्यापकत्वभानेपि पक्षतावच्छेदक[illegible]निवेशेनैव तद्वारणमिति प्राचीनमतानु
सरणं व्यर्थमिति। वस्तुतस्तु इयं वह्निव्याप्यधूमवानयमित्युपनयवारणाय यत्तु तादृशसाध्यतावच्छेदकं तत्त्वतादृशसाध्यतावच्छे
दकपर्याप्तप्रकारतावच्छेदकताकबोधत्वमेव शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधत्वं वा वाच्यं तथा च प्राचीनम
तानुसरणमावश्यकमिति। केचित्तु महानसं तद्भिन्नं च धूमवद्वह्निमच्चेति बोधः परं तु नव्यमते अभेदेन संबंधिनः प्रकारता भाति
व्याप्तिरतः प्राचीनेत्युक्तमित्याहुः। संबंधस्वरूपसंबंधरूपहेतुमत्त्वावच्छेदकत्वं भासमन्ते इत्यर्थमप्याहुः। [illegible]

CC-0. Dharmartha Trust J&K. An eGangotri Initiative

षंगपक्षे नाति व्याप्तिः२

साध्ये२ वच्छेदका

ग०टी० धर्मस्य मानसत्त्वावच्छिन्नस्य नन्वेवं विशेषणांशे मानानुषंगपक्षेऽपि पक्षतावच्छिन्ने तस्य सानिवेशे यत्किंचिद्धर्मावच्छिन्ने साध्यतावच्छेद

३९ चे कावच्छिन्नसाध्यावगाहित्वनिवेशे शुद्धत्वानिवेशेऽपि निगमनेनुमितेरननुषंगपक्षस्यावलंबनीयत्वात् केवलनिगमनाच्छाब्दबोधस्यैवन

39 जायते निर्धर्मितावच्छेदककशाब्दबोधानंगीकारात् पर्वतो वह्निमानित्यादिप्रतिज्ञादौ मतुपो निरर्थकत्वेऽपि पर्वतपदेन मेरकांशानिर्वाहात् तत्र शा २

ब्दबोधोपपत्तेरित्युदाहरणमात्राभिधानमितिवद [illegible] नामतमाह। निगमनइति। शुद्धत्वानिवेशे पर्वतश्चार्द्रेन्धनप्रभववह्निमानिति वाक्येऽनिष्या

तत्र प्तिमाशंक्य निराकरोति। विशेषणांतरेति। प्रतिज्ञायामिति। नचैवं यो यो धूमवान् स आर्द्रेन्धनप्रभववह्निमानित्युदाहरणवाक्ये न तथा च नानित्याप्तिः।

पद्द्यावच्छिन्नसाध्यकोदाहरणादिघटितन्यायांतर्गतत्वशुद्धतद्रूपविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वरूपप्रतिज्ञात्वस्य शुद्धत्वा

निवेशेप्यक्षतेरिति वाच्यं। पर्वत आर्द्रेन्धनप्रभववह्निमान् धूमात् यो यो धूमवान् स वह्निमानित्यादिप्रपंचवाक्यांतर्गतप्रथम

वाक्यस्य प्रतिज्ञापदेनोक्तत्वात्। प्रकृतेति। तद्धर्मावच्छिन्नसाध्यकोदाहरणादिघटितन्यायशरीरघटकशुद्धतद्धर्मावच्छिन्नवैशि

ष्ट्यावगाहिबोधजनकवाक्यत्वरूपप्रतिज्ञात्वनिवेशात् तादृशन्यायांतर्गतत्वाभावेनेत्यर्थः। तावतैवाति प्रसंगवारणे दलां ग

तरे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वनिवेशाद्यर्थ इति भावः। चिंतनीयमिति। अननुषंगपक्षे केवलनिगम

नात्तु शाब्दबोधो नेत्यसिद्धार्थकत्वमेवेति भ्रमनिरासाय तन्निष्पादितसंसर्गादिप्रतिकारसंभवानुसरणं स्यादित्यनुसारमनर्थकमेव।

भायेप्युपनये न समं मिलित्वा सोत्पेय०तत्र२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

४ न च मतेव्याप्तिविशिष्टहेतुवैशिष्ट्यबोधतेयतमतोऽव्यासंभवसमीक्षणागवाद्वि तोमे ४ ... यावन्न च व्याप्ति ... व्याप्तत्वमिति यावत् २

उक्तेरिति केचित् अन्ये त्वनुपनये न सम्भवत्येव एवं च निगमनेऽपि व्याप्तिसंबंधेदीत्यपि ... साध्यमनर्थकस्यादिति चिंतायां ... पक्षवार्थधि ... शाब्दबोधत्वावच्छिन्न ... तावच्छेदकविषयतानिरूप ... पक्षवर्णसमुदायत्वउपनयानुत्पन्नवर्णेन परं ... यावयवत्वविशेषणेन तद्वाक्य

प्रागुक्तादिदोषः ... इति

[illegible]पक्षे केवलनिगमनाद्भुमाहृद्विरिस्येवंशाब्दबोधः मनुपंकथकसंप्रदायानुसारेण[illegible]

मात्रस्य निगमने तिव्याप्तिः अप्रयुक्तमपि विषयक ज्ञानस्यैव हेतुत्वात्तथा अनुपनयज्ञानान्तर निगमनज्ञान ... व्याप्तिर्भवत्येवेति

चिंतायां जनको[illegible]साधारणं रूपं सा कल्प्यं तत्वतत्समानाधिकरणीभूततयावृद्धमर्षश्रयत्वेहेतुमत्त्वेवा पथामतंवोध्यं। उपनयेति। व्याप्यः पक्ष

न वेत्याकांक्षाविरहात्। अनाकांक्षितत्वादिति। कोवह्निमानित्याकांक्षायामसंभवात्। शब्दजनकतामतेपक्षतावच्छेदकमवेश्यवेयर्थ्यं

शंकते[illegible]जनकतायाः प्रत्येकपर्यवसायिनयानादृशजनकताश्रयवर्ण[illegible]समुदायत्वं विवक्षणीयं तथा चोदाह

रणे निव्याप्तिर्दुर्वारे वास्तुनिष्टन्यूनवृत्तितानिरूपकत्वनिवेशे तद्वारणे तु उभयघटकेत्यादिविशेषणवैयर्थ्यापातादिति वाच्यं।

उभयघटकेत्यादिविशेषणस्यदर्ज्यत्वात् अत एव समाधाने तन्निवेशयिष्यति। एतन्मतेयत्किंचित्वाघनिवेशे [illegible]संभवो

[illegible]शरस्यहेतुत्वादतत्स्वरूपामाणिकत्वाभिप्रायेणसमाधत्ते। जनकत्वस्ये

ति। तादृशवर्णवृत्तिसमुदायत्वमर्थः न तु तादृशवर्णत्वसमनियतसमुदायत्वं उभयघटकेत्यादिविशेषणे प्रतिज्ञाहेत्वादिसमुदायस्ये

कदेशस्यप्रतिज्ञाघटकत्वेन च वारणात्। यत्किंचित्वं च प्रत्येकप्रतिज्ञाव्यवहारसिद्धये। अन्यथासमानानुपूर्वीकेसकलप्रतिज्ञासु एक

जनकताश्रययज्ञानविषयतयाएकप्रतिज्ञाव्यवहारापत्तेः। अप्रसक्तेरिति। तद्वारणाय च पक्षतावच्छेदकावच्छिन्नत्वनिवेश आवश्य

प्रतिज्ञा

मान

न

न

... एवं ... प्रतिज्ञा ... अवयव ... घटकभागद्वया ... निवेशे ... तत्पक्ष ... घटकत्वस्य ... निवेशः ...

एवं सत्वमवारीलोपनयोऽधिकेदोषः ... इति तत्त्वचिंतामणौ प्रथमः ...

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२

ग०शी०

४०

50

कऽइति शेषः। अथैतत्कल्पे उभयघटकभागद्वयाघटितत्वं यर्थं समानानुपूर्वीकमतित्वाद्‌द्वयगतसमुदायत्वावच्छिन्नेऽतिप्रसंगवा
रणाय तादृशयत्किंचिच्छारत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयीभूतयत्किंचिज्ज्ञानविषयितानिरूपकवर्णस[illegible]मु
दायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वस्यावश्यकतया नैनैवमतिज्ञाहेतुसमुदायेऽतिव्याप्तिवारणसंभवात्। प्रतिज्ञामात्रजन्यवो
धीयकारणताश्रयीभूतयत्किंचिज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वस्यैवप्रतिज्ञाहेतु
समुदायत्वेसत्वात्। न चवस्तुभयघटकभागद्वयाघटितत्वं तदीयतामिति वाच्यम्। तथा सति पक्षतावच्छेदकनिवेशवैयर्थ्या
त्। किंचिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दबोधत्वावच्छिन्नकार्यता[illegible]रूपितकारणताश्रयी नि
भूतयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वस्य सवह्निमानिति समुदायनिष्ठस्य न्यूनवृत्तित्वनिरूपक
तायाउदाहरणगतसमुदायत्वेसत्वात्। इत्थं च जनकत्वस्य तादृशअतिप्रसक्तेरित्यं तत्संदर्भोऽसंगतिः। न च निरुक्तावयवत्वेन रू व
पंपतादृशशारत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयीभूतयत्किंचिज्ज्ञानविषयितानिरूपकवर्णसमुदायत्वंतन्निष्ठ
न्यूनवृत्तित्वानिरूपकत्वनिवेशान्नासंगतिः सवह्निमानिति समुदायत्वेनिरुक्तावयवरूपत्वाभावेन तथाविधसमुदायत्व त्व
निष्ठन्यूनवृत्तित्वानिरूपकत्वस्योदाहरणसत्वेनपक्षतावच्छेदकनिवेशावश्यकतादिति वाच्यम्। न्यायावयवत्वात्मकं तादृ

समुदायत्वे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

शसमुदायत्वविशेषणं प्रवेश्य तन्निष्ठन्यूनवृत्तितानिरूपकत्वेनातिव्याप्तिं संपाद्य पुनस्तद्वारणाय पक्षतावच्छेदकनिवेशस्य
प्रक्षालनाद्धीतिन्यायपराहतत्वात्। तथाविधैकदेशत्वनिष्ठन्यूनवृत्तितानिरूपकतयाऽसंभवस्य वर्णत्वव्यापकत्वविवक्षैव स्त
यैववारणात्। प्रतिज्ञामात्रघटकतानवच्छेदकं यत्तादृशसमुदायत्वं तन्निष्ठन्यूनवृत्तित्वानिरूपकत्वं वा वाच्यं। न च पक्षता
वच्छेदकावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारकयत्किंचिच्छाब्दबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणताश्र
यीभूतयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वमेव न्यायावयवत्वं तथा च न संदर्भासं
गतिरिति वाच्यम्। दीधितिकृतैव प्रतिज्ञाहेत्वित्यादिना स्वपमुभयपदार्थस्य दर्शितत्वात्। वस्तुतस्तु उभयघटके सादिविशेष
णं नैव प्रवेश्यते किंतु किंचिद्धर्मावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारकयत्किंचिच्छाब्दबुद्धित्वावच्छिन्न
कार्यतानिरूपितकारणताश्रयीभूतयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनत
वृत्तितानिरूपकत्वरूपलघुतरविशेषणमेव तेनैव सकलदूषणवारणात्। एतेन प्रतिज्ञाद्यात्मकसमुदाये प्रतिज्ञात्व
व्यवहारेण तस्यापि लक्ष्यतया तद्वारणाय तादृशविशेषणं न देयमिति समाधानं परास्तम्। अथेदं समाधानं न तथा स
ति वह्निमन्महानसकालीनपर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिः। यत्किंचिद्धर्मावच्छिन्नविशेष्यकवह्नित्वावच्छि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

५ पक्ष उक्तव्याप्तिवारणाय यान्निरूपकत्वांतं घटकशब्दबोधे पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वोपादाना सत्यवह्निमानिति भासवृत्तिसमुदायत्ववारणाद्युदा
विषयिता—

ग०टी० न्नप्रकारकशाब्दत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयीभूतयत्किंचिज्ज्ञानीयनिरूपकवर्णत्वव्यापकं वह्निमन्महा

१४१ नसमितिसमुदायत्वं तन्निष्ठजनकतानिरूपकत्वस्य तादृशप्रतिज्ञात्वे सत्त्वात्। तद्घटकीभूतशाब्दबोधे पक्षतावच्छे

दकावच्छिन्नविशेष्यकत्वनिवेशेपि वह्निमत्पर्वतकालीनपर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिरतो निरूपकत्वां

५१ तं परित्यज्य उभयघटकेत्यादि विशेषणवृत्तिन्यायावयवत्वनिवेशेउदाहरणेऽतिव्याप्तेः पक्षतावच्छेदकानुसरणासंग

तिरिति। नन्वत्र भट्टाचार्यैर्जनकताश्रययत्किंचिज्ज्ञानमेवोक्तं तथा च तेषां विषयितायां तादृशजनकतावच्छेदकता

पर्यंतं न विवक्षणीयं प्रयोजनाभावादित्यभिप्रायो लक्ष्यते इदं तु चिंत्यते प्रतिज्ञासहकारेणावयवांतरस्यापि तादृशशा

ब्दबोधत्वावच्छिन्नजन्यतानिरूपितजनकताश्रयीभूतसमूहालंबनज्ञानविषयतया हेत्वावयवेऽतिव्याप्तिरतो विष

यितायां जनकतावच्छेदकत्वमावश्यकं तादृशजन्यतानिरूपितजनकतावच्छेदकविषयिता च प्रतिज्ञानिरूपिता न

हेत्वंशयवनिरूपिते तेन नत्रातिप्रसंगः। इत्थं च पक्षतावच्छेदकानिवेशेपि नोदाहरणेतिव्याप्तिः॥ किंचिद्धर्मावच्छिन्नवि

शेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दत्वावच्छिन्नजन्यतानिरूपितोदाहरणज्ञाननिष्ठजनकतायां सवह्नि

मानित्येकदेशविषयितैवावच्छेदिका न तूदाहरणविषयितेति तादृशविषयितानिरूपकवर्णत्वे सति समुदायत्वस्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्र मनुपक्षतावच्छेदकमि २

तन्त्राभाववद्देवं सत्युभयघटकेत्यादिविशेषणं त्यज्यतां। यद्वा तादृशविषयितानिरूपकवर्णसमुदायत्वप्रवेशेनोदाहरणत्वस्य ता-
दृशवर्णवृत्तित्वेनातिव्याप्तिरिति साध्यसाधनविशिष्टधर्मिबोधकवाक्यद्वयघटकभागाघटितत्वमपि विशेषणीयं तथा स-
ति जनकतावच्छेदकत्वपर्यन्ताविवक्षणेप्युदाहरणवारणमिति चेत्। अत्र केचित् जनकतावच्छेदकत्वं विषयतायां न
देयमेव। किंतु यत्किंचिज्ज्ञानत्वेनावयवान्तराविषयकज्ञानमेव ग्राह्यं तेन हेत्ववयवेनातिव्याप्तिरिति न तुच्छं तथा सत्यु-
दाहरणज्ञानस्याप्यवयवान्तराविषयकत्वात् घटितं किंचिज्ज्ञानशब्देनाग्रहणादेवातिव्याप्तिवारणे पक्षतावच्छेदकवैयर्थ्यस्य तत्र
लेपत्वात् अवयवान्तरशब्देन हेत्वग्रहात् तेनोदाहरणमित्येकशेषस्य कर्तुमशक्यत्वात् उभयघटकेत्यादिविशेषणवैय-
र्थ्यापाताच्च। वस्तुतस्तु प्रतिज्ञाभेदोदाहरणभेदद्वयानुयोगितावच्छेदकान्यत्वमेव प्रतिज्ञाघटकत्वमिति न दोषः। अन्ये
तु जनकतावच्छेदकत्वं न प्रवेश्यमेव। किंतु हेत्वव्यवारणाय तादृशजनकताश्रययत्किंचिज्ज्ञानीयसंसर्गतान्यविषयता- जात्यवृत्ति
पर्याप्त्यधिकरणपर्याप्तसमुदायत्वमेव विवक्षणीयं प्रतिज्ञाघटकत्वं तु प्रतिज्ञात्वव्यवच्छेदकतावच्छेदकत्वं तत्समुदायत्वभि-
न्नधर्मवत्त्वं मतंगजो नील इति प्रतिज्ञाघटकगजो नील इति भागप्रतिज्ञायां देशप्रतिज्ञाभयसमुदायवारणाय उभयघटके-
त्यादिविशेषणसाफल्यमुदाहरणातिव्याप्तिश्च यथास्थितैवेत्याहुः। अत्रापाध्यायाः। प्रतिज्ञासहकारेणावयवान्तरस्यापि

जनकतावच्छेदकत्वं विषयितायां हेतुवारणाय निवेश्यं तादृशविषयितानिरूपकवर्णवृत्तिसमुदायत्वपक्षे उभयेत्यादिविशेषणसार्थक्यमिति के-
चित्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तादृशशाब्दबोधकारणतानतिप्रसक्तेरिति भावः ४

गदा० तादृशबोधजनकतायास्तथानतिव्याप्तिवारणाय पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशा
४२ ब्दबोधत्वावच्छिन्नकार्यतानिरूपितकारणतायाश्चानुपूर्वीप्रकारकज्ञानत्वेनावच्छिन्नत्वे अवयवतावच्छेदकता तादृशा व
नुपूर्वीमत्त्वं प्रतिज्ञात्वमित्येव सम्यगर्थो ऽभ्युपेयः। अन्यथावच्छेदकत्वमनतिरिक्तवृत्तित्वं। पर्वतो वह्निमान् पर्वतो द्रह न वा नित्या न्यता ४
दिवाक्यज्ञानानां विभिन्नकारणतापक्षे एकैकानुपूर्वीप्रकारकज्ञानत्वस्याव्यापकतया ऽसम्भवश्चेत्येतत्प्रकारेण तात्प
र्यो ऽवसेयवनीयः। तथा च निगमनानुपूर्वीसाधारणान्यतमप्रकारकज्ञानत्वस्य प्रकृतपक्षे प्रकृतसाध्यशाब्दबोधज
नकताव्यापकतया निगमने ऽतिव्याप्तिरतो ऽनतिरिक्तवृत्तित्वनिवेशः। तथा च प्रतिज्ञामात्रवृत्तिसकलानुपूर्व्यन्यतम
प्रकारकज्ञानत्वस्य तत्समनियततया तादृशान्यतमवत्त्वमादाय लक्षणसमन्वयः। पक्षतावच्छेदकानिवेशे निगमने यत्किं स ५
चिद्धर्मावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दबोधत्वावच्छिन्नकारणतायाः सत्त्वेन प्रतिज्ञाज्ञानत्वासत्त्वेन चा
ऽसम्भव इत्यतः पक्षतावच्छेदकप्रवेशः। एवं साध्यतावच्छेदकानुसरणस्यापि फलं बोध्यम्। अनुषङ्गपक्षे तु शुद्धसाध्यता
वच्छेदकावच्छिन्नप्रकारकत्वमावश्यकं तेन निगमनज्ञानमादाय नासम्भवः। अथवा ऽवच्छेदकत्वं स्वरूपसंबन्धविशेष एव
परं त्वन्यूनानतिरिक्तवृत्तिधर्म एव स्वीक्रियते एवं च पक्षतावच्छेदकाद्यननुसरणे प्रतिज्ञानुपूर्वीप्रकारकज्ञानत्वापे ४२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

४ वाच्यं तदतिरिक्तं ... अन्यतमप्रकारकज्ञानत्वनियेशात् ... कोटी ... तद्भावापेक्ष्य ... अन्यतमे ... तथा त ... च्छेदावरहात् ... तु ... निरी ... त्वानि ... च्छेदकत्वम

आर्यातरतिलेसति २ स्यात् २ तत्र २

स्यता तादृशकारणतायाः अतिप्रसक्तत्वेनं तत्र स्वरूपसंबंधरूपावच्छेदकत्वं न संभवतीत्यसंभववारणाय तदनुसरणमित्या
हुः। अत्रेदं दूषणम्। न्यायावयवत्वम् त्रं प्रतिज्ञाघटकत्वमात्रं न तु भयघटकभागद्वयाघटितत्वं प्रयोजनाभावात्। प्रतिज्ञाहे
तु समुदायनिष्ठानुपूर्वी प्रकारकज्ञानत्वस्य तादृशकारणतान्यूनवृत्तित्वेनाऽनवच्छेदकत्वापत्तिव्याप्तेर भावात्। तादृशका
रणतायाः प्रतिज्ञामात्रज्ञानेपि सत्त्वात्। प्रतिज्ञाघटकत्वमपि मतंगजो नील इति प्रतिज्ञैकदेशवारणाय। ~~...~~
मतंग जो नील इति प्रतिज्ञायां ~~...~~ स्याघ्नि वभा ... गजो नील इति भागज्ञानेपि तादृशकारणतायाः सत्वेन त
त्र मतंगजो नील इति प्रतिज्ञामात्रवृत्त्यानुपूर्वी प्रकारकज्ञानत्वस्यैव सत्त्वाद् ... । अत्र हेत्वाद्यवारणाय विषयि
तायां तादृशकारणतावच्छेदकत्वप्रवेशेपि न पक्षतावच्छेदकानुसरणं वैयर्थ्यम्। तथा हि अवच्छेदकत्वमनतिरिक्तवृत्तिता
च कारणतानतिरिक्तवृत्तिविषयितानिरूपकवर्णसमुदायत्वं तत्त्वमिति फलितं प्रतिज्ञाहेतुसमुदायनिष्ठानुपूर्वीविषयितायां
स्तादृशशाब्दत्वावच्छिन्नकार्यतानिरूपितकारणतानतिरिक्तवृत्तित्वात्तत्रातिव्याप्तिवारणाय भयघटकत्वादिविशेष
णमावश्यकं। उदाहरणविषयितायाश्च किंचिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नशाब्दत्वावच्छि
न्नकार्यतानिरूपितकारणतानतिप्रसक्तत्वात्तत्रातिव्याप्तिरतः पक्षतावच्छेदकानुसरणमावश्यकम्। मतंगजो नील इति प्रतिज्ञायामपि

६ आतिरिक्तत्वादारणं ... तत्र साध्यमिवभाती ... इति ... ६

... तादृशकारणतानतिरिक्तवृत्तित्वात् ...

... कारणतावच्छेदकानुपूर्वीप्रकारकज्ञानत्वव्याप्तेः ४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग०टी०
४३
43

नाव्याप्तिः। तद्विषयितास्तादृशाकारघातानतिप्रसक्तत्वात्। न देकदेशे गजो नील इत्यत्रातिव्याप्तिस्तु प्रतिज्ञामात्रावृत्तकत्वं प्रवेश्य
वारणीयेति भट्टाचार्याणामाशय इति सूक्ष्मदर्शिनो विदांकुर्वन्तु। न चैवमपि प्रतिज्ञाघटकत्वं यथा भागवारणाय लाघवेन ता
दृशवर्णत्वसमव्यापकसमुदायत्वस्य वाच्यत्वात्। एवं पर्वतो वह्निमानित्यनंतवाक्यघटितसमुदायस्यैव तादृशसमुदायत्वेन प्रति
ज्ञामात्रस्येत्यसंभवोऽतो ज्ञानेयत्किंचित्त्वनिवेशः एवं च यादृशप्रतिज्ञात्वानं हेत्वादिविषयकमेव तज्ज्ञानविषयितायाउभयत्रापिस
त्वा तून केवलप्रतिज्ञामात्रवृत्तिसमुदायत्वस्य तद्व्यापकतासंभवतीत्यनाप्तस्याजनकतावच्छेदकयत्किंचिज्ज्ञानीयविषयितायाः
अप्रवेशे निवेश्यतयानोदाहरणातिव्याप्तिप्रसज्य ते इत्यत उदाहरणादित्युस्यत देकदेशादित्यर्थमभिप्रेत्य स वह्निमानित्येकदेश
तादृशविषयितानिरूपकत्वसत्वादतिव्याप्तिं प्रदर्शयति। एवमिति। उभयेति। यत्तु पर्वे कल्प एतत्कल्पे चोभयेत्यादिविशेषणा
मननुषंगपक्षे एव अननुषंगपक्षे तु साध्यतावच्छेदकावच्छिन्ने शुद्धत्वापादानादेव वारणादिति तन्न। अनिरूपितत्वांतनिवेशस्य दू
क षितत्वात्तस्य स्वतावच्छेदकनिवेशान्तरप्रयोजनाभावेन तथापि तत्मात्रस्य हेयत्वात् केवलप्रतिज्ञाजन्यबोधमादाय केऽपि दूषयेऽपि प्रति
ज्ञाहेतुसमुदायानुषंगपक्षेऽपि उभयेत्यादिविशेषणस्यैवावश्यकत्वात्। अननुषंगपक्षे तु अयमादिनिगमनां तभागवारणाय
शुद्धत्वनिवेश आवश्यकः। विशेष्यवाचकपदान्योभयवृत्तिकभागद्वयाघटितत्वादिति। वस्तुतस्त्वतल्लक्षणे पक्ष विशेष्यकसा ४३

यवारणाय २ वा २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ध्यप्रकारकशाब्दबुद्धित्वपर्याप्तजन्यतावच्छेदकतानिवेशः नत्वङ्गे विशेष्यवाचकपदान्यतरस्यैवेयर्थ्यात्त्वयिस्याङ्गोवेत्तिनतादृश
भागेऽतिव्याप्तिरितिदिक्। ननुप्रतिज्ञाघटकत्वनिवेशेपिसवह्निमान्निरुक्तभागोवार्यतइतिपदजन्यतावच्छेदकंव्यर्थमित्यतआह।
नत्विति। एवंचगुरुतरप्रतिज्ञाघटकत्वनिवेशोऽन्याय्यइतिभावः। अथान्यायावयवशब्देनन्यायांतर्गतत्वेसतिउभयघ
टकभागद्वयाघटितत्वमात्रंनिवेशेरमाधवःपूज्यःसदाशिवोवंद्यइतिप्रतिज्ञैकदेशेमाधवःपूज्यःशिवोवंद्यइतिभागेऽ
तिव्याप्तिःरमाधवादिप्रतिपाद्यस्यैवमाधवादिप्रतिपाद्यत्वात्तादृशशाब्दत्वावच्छिन्नजनकतावच्छेदकविषयिताकत्वस्य
तादृशभागेसत्वात्। नचैतल्लक्षणमेवपदजन्यतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकशाब्दत्वा
वच्छिन्नजन्यतानिरूपितजनकताश्रयसमुदायएवप्रतिज्ञात्वव्यवहारेणतादृशसमुदायेपिनियामकसत्वेनतद्व्य
वहारस्येष्टत्वादितिवाच्यम्। तस्यलक्ष्यत्वेतत्रावयवलक्षणलक्ष्यतायाआवश्यकतयाऽवयवलक्षणाव्याप्तिःरमा
धवःपूज्यइत्यादिसमुदायत्वावच्छिन्नभेदस्यमाधवःपूज्यइतिभागेसत्वेनस्वस्मिन्स्वभेदासत्वेनप्रतिज्ञान्यतम
षयित्वानिरूपितत्वाद्वितीयविषयितायास्तुतन्निरूपितत्वादिति। एतच्चोपेक्षावीजंव्युत्पादयितुमेवअनति
रिक्तपदोपादानेतुनवीमानिष्प्रयोजनत्वात्। नापिसामान्यपदार्थविवक्षातथासतितथात्वेधूमादालो पि
कवानित्यत्रिमग्रंथासंगतेः। सामान्यांतःपातिप्रतिज्ञाज्ञानत्वावच्छिन्नजनकतायाहेत्ववयवविषयित्वा
तत्रच व्यापकत्वाव्यापकत्वात्। अनतिरिक्तवृत्तित्वरूपं[redacted]स्वरूपसंबंधरूपमे
वव एतदभिप्रेत्यैवातएवेत्याद्युपष्टंभकाभिधानं। तत्राद्येहेत्वर्थविशिष्टवैशिष्ट्यबोधजनकतायाः
प्रतिज्ञाहेत्वानुपूर्व्यवच्छिन्नविषयिताव्यापकत्वेपिअन्यूनातिरिक्तबोधजनकतायांप्रतिज्ञानुपूर्व्यवच्छि
न्नविषयिताव्यापकत्वसन्दावेनताहृशविषयित्वासमनैयत्यान्नातिव्याप्तिः। द्वितीयपक्षेतुअंतिमोन्यू
इतिनाति व्याप्तिः१ नविषयकत्वावच्छिन्नजन्यत्वनिवेशनिराकरणग्रंथोहेयःहेत्ववयवविषयितायास्ताहृशजनकता २

वद्धेरकत्वं८ विषयक

यत्किंचित्तानविषयतायांस्वसामानाधिकरण्यनिवेशाच्चालनीन्यायेनन प्रतिसात्वस्यनतदज्ञानविषयताश्रयत्वेपिना

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

द स्वरसा

६२ नवच्छेदकत्वात्। यद्वा हेतूपेक्षाबीजं प्रागवत्। अनतिरिक्तपदोपादाने तु अन्यूनानतिरिक्तविषयकशाब्दबोध
62 जनकतानतिरिक्तवृत्तिविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वमेवार्थः। अनतिरिक्तपदानुपादाने
चप्रतिज्ञाहेतुजन्यबोधमादायैवातिव्याप्तिरतस्तन्निवेशः। यद्यपि तदुपादानेपि प्रतिज्ञामात्रजन्यशाब्दबो
धजनकताप्रतिज्ञाहेतून्यविषयिताव्यापिकेति पुनरतिव्याप्तिस्तथापि एतद्दोषवायमादिनिगमनान्ताति
व्याप्तिवारणफलकत्वं अनतिरिक्तपदस्य। हित्वं तद्वारणं तु तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपक
निवेशादेव। महाचार्याणां सम्मतेयत्वाभिधानं च यथाश्रुताभिप्रायेणेति प्रतिभाति। नन्वेवं पक्षवत्त्वं न्यायां तन्मतैदंपर्यं
तर्गतत्वघटितं तत्पर्याप्त्यवच्छेदकं च न पर्वतो वह्निमानिति वाक्यत्वं तस्योदासीनसाधारणत्वात्। किंतु
तत्तत्कर्मकत्वं तथा च तत्तत्प्रतिज्ञाविषयतानामिव तद्व्यापकत्वान्नात्। तन्निरूपकान्यज्ञानवृत्तित्वस्यो
दासीनज्ञानसाधारणकारणतायां सत्त्वादसंभव इत्यत आह। अवयवत्वं चेति। प्रतिज्ञाद्यघटक
त्वदलसत्त्वेन धूमादिरूपैकदेशसमुदायत्वस्यावयवत्वपर्याप्त्यवच्छेदकत्वेपि तद्व्यावृत्तिः। न चोदासीनवाक्यवृत्ति

तर

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विषयतायाअपितादृशानुपूर्व्यवच्छिन्नविषयतात्वेनव्यापकत्वसंभवान्न्यायांतर्गतत्वोपादानेपिनक्षतिरि
तिवाच्यम्। एकदेशविषयतायाविषयतात्वेनप्रतिज्ञाघटकधूमादित्वभागविषयतायायातादृशानुपुर्व्य
वच्छिन्नविषयतात्वेनव्यापकत्वादतिप्रसंगइतिस्वविषयतात्वेनव्यापकत्वनिवेशात्तुवाक्यभेदेनविषय
ताभेदात्तु केचित्तुतादृशजनकतायामेवावयवाघटकत्वंतत्तत्तादृशबोधवृत्तियत्किंचि[illegible]जन्यताश्र
यज्ञानवृत्तिजन्यता। निरूपकत्वंप्रतिज्ञैकदेशधूमादित्वपदज्ञानवृत्तिजनकतायांतादृशजन्यताश्र
यधूमविशिष्टहेतुत्वमात्रज्ञानवृत्तिजन्यतानिरूपकत्वान्नातिप्रसंगइतिप्राहुः। नत्वेवमस्येपक्षतावच्छे
दकविशिष्टसाध्यवत्तावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमित्यत्रतन्निविषयकत्वविवेचनविरोधइत्यत
तआह वस्तुतस्त्विति। विशेष्यदलेति। अनयघटकेत्यादिदलेत्यर्थः। अवलंबतानुपयुक्तत्वमिति। तथाचावय
वाघटकेत्यपिव्यर्थमेव। परंतुइदानीं उभयघटकेत्यादिदलवैयर्थ्यकथनेनव्यावृत्तिःसंभवतीतिअवयवा
घटकत्ववैयर्थ्यसंभवेपितत्कथनमिदानीमनुपयुक्तंतदकथनेपिव्यावृत्तिसंभवादित्यर्थः। अरिति।पु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२ [illegible]मतंगजोनी।लडूनिवाक्याद्भेनी।तत्त्ववोधोजायतामितिवक्तृतात्पर्यं वाच्यं तथाच त्वाश्रयत्वप्रकारकयत्किंचिद्विषयत्वोभयसंबंधेनपक्षतावच्छेदकावच्छिन्ने प्रकृतसाध्यप्रकारकत्वावच्छिन्नबोधजनकतावच्छेदकताविशिष्टायायत्किंचिल्लानीयविषयितानिरूपकवर्णपर्याप्तसमुदायत्वमर्थः मतंग[illegible]विषयितानिरूपि नागजत्वविषयितैयोभयसंबंधेनावच्छेदकताया आश्रयः नतु नदीनिरूपितगकारादिविषयितेति-नतुगजोनी।लडूनिवाक्याद्ग[illegible]वोधोजायतामितिवाक्यमतंगजोनी लडूनिमद्योगाभवत्वेवविनादिवाक्ये शुकादेः प्रयोगादर्शनात् अपगजोनीलः मतंगजोनीलः इतिवाक्यघोनीं ... मतंगशब्दघट

६३ 63 त्ववतीत्यादौ दिक्ति पुत्ववतीत्वाद्येकदेशावार(णा)यसमानेति। रमेश्वरः पूज्यः सौदामिनीद्रव्यमित्यादौ मेश्वरःपू

ज्यः दामिनीद्रव्यमित्यादि। तथाविधबोधजनकतावच्छेदकत्वेनवाक्ये च्छाविषयविशेषणतानिवेशं दूषयति।

प्रतिज्ञेति। बुद्धिमेश्वरः पूज्य इतिवाक्यान्नात्पूज्यबोधोजायतामितीच्छायामपिरमेश्वरःपूज्य इतिप्रतिज्ञा

तत्रतत्सार्थकत्वसंभवोनिरासर्वो[illegible]विनिवि[illegible]त्यायत्वानंगीकारादिति। तथाचावयवाघटकत्वंव्यर्थमे अस्मत्पादानिय हापन्ने ४

वेतिभावः ननु तत्परत्वानिवेशे तत्सार्थकं स्यादित्यत आह तस्त[redacted]स्यावश्यकतमाह। अप्रकृतार्थपरेति

तत्र नानार्थकहर्यादिपदघटितं तल्लक्षणयाजलाद्यर्थकवह्न्यादिपदघटितं च [illegible]मूतमागेति। प्रति दू

ज्ञाघटकहेतुसमानार्थकमागस्यार्थः। तथाचान्यूनानतिरिक्तविषयकेत्यादिनिरुक्तौ तादृशविषय

कत्वावच्छिन्नजन्यत्वोपादानस्यावश्यकतयानतिरिक्तविषयकत्वानुपादानेन कुत्रापि हेतावतिव्या

प्तिरित्यर्थः। ततत्वागेत्यस्यत्ततद्वृत्तित्वमितिवार्थः। एतच्च प्रतिज्ञाघघटकत्वकथनं निरुक्तान्यूनविषयक

त्वावच्छिन्नजन्यतानिवेशलाभायैव। तत्र पर्याप्तनिवेशान्नानतिरिक्तत्वापदवैयर्थ्यमितिभावेन। अन्यू

अं॰ वच्छेदकत्वमघितादृशविषयितानिरूपितत्वमानिरवविषयित्वानिरूपितगकारविषयितापटितविषयितात्वेनगजोनीलडूनिवाक्यविषयितासाधा रणोनैव-यद्वानीलपदस्यगजपदस्यमध्यहारेविशेषाद्यापिकपाजगोनीलडूत्यानुपत्यमितंगजोनीलडूत्यादिसाधारणाकांक्षात्वं एवंचदर्शितात्पर्य त्वानतादृशगकारासास्तानयोरादिपरस्परसहकारित्वसंपन्न[illegible]कथंचिदिति-मतंगजोनीलडूनिवाक्याधीनेशाब्दबो धोपधिकाकांक्षायावाच्य ते। सदर्वजं तकं २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

जन्यतानिरूपित
एतद्भावतानिरूपकपुनरुक्तं·२

नविषयकबोधवृत्तिजनकत्वानिवेशेचतादृशप्रतिज्ञार्थबोधवृत्तिहेतुविशिष्टहेतुत्वबोधत्वावच्छिन्नज
नकतामादायहेत्ववयवेहेतुविशिष्टहेतुत्वविशिष्टसाध्यमात्रबोधत्वावच्छिन्नजनकतामादायनिगम
नेचातिव्याप्तिःस्यादित्यर्थः॥ सर्वमभिधेयंप्रमेयमिति दीधितिकृदुक्तसर्वपदवैयर्थ्यंशंकते। यद्यपीति। अ
नुमितिविषयातिरिक्ताविषयकत्वस्ययत्किंचिदनुमितेर्विषयत्वाभाववन्निष्ठविषयताकत्वस्यानुमि
तेर्विषयत्वंयच्चत्किंचित्तदभाववन्निष्ठविषयताकत्वस्यवाऽभावरूपत्वेविषयतायाःस्वरूपसंबंधरूप
६ त्वेनासंभवइति तत्सामान्याभावनिवेशेसर्वपदवैयर्थ्यमित्यर्थः। केवलेति। अभिधेयत्वसामानाधि
करण्येनतत्तदभिधेयेनानानुमितिसंभवेपितादृशानुमितिविषयत्वसामान्याभावस्याप्रसिद्धिरित्यर्थः
स्फुटीकर्तुंसामान्याभावपर्यंतविवक्षणेपिविशिष्यग्राहयितुं। सर्वमभिधेयमित्यत्राभिधेयपदस्यप्रयोज
नमाह। सर्वेभ्यइति। पुत्रपौत्रादिस्वर्गपश्वादिसर्वफलोद्देशेनेत्यर्थः। कर्त्तव्यावितिशेषः। प्रक्रांतेति। पूर्व
वाक्यजन्यशाब्दबोधविषयत्वंपूर्वोपस्थितत्वंवाप्रक्रांतत्वं। यद्यपिमिलितानांतावत्फलानांनदर्शपौ
र्णमासकर्त्तव्यताप्रयोजककामनाविषयत्वंसर्वपदेनमिलितत्वेनफलानुपस्थापनात्। तथापियावद्

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६४ र्मावच्छिन्नाः प्रक्रांताः प्रत्येकं तावद्धर्मावच्छिन्नानामेवोपस्थितौ वाक्यभेदप्रसंगइतितावत्समुदायत्वरूपसर्व
64 त्वेनोपस्थितिमात्रंफलतान्नुप्राप्तिस्विकीतिवोध्यं उद्देश्यतावच्छेदकव्यापकसर्वत्वतात्पर्यासंभवस्सूचनायक
तिपयेतिविधेयव्याप्यत्वाव्यभिचारितासंबंधेनविधेयप्रकारत्वं उद्देश्यतावच्छेदकव्यापकसर्वत्वमात्रबोध
कत्वेसर्वो[illegible]घटः सुंदर इति प्रयोगप्रसंगः निखिलघटवृत्तिसर्वत्वस्य घटत्वव्यापकत्वादिति विधेयव्याप्यत्वमु
क्तं तथाचतत्र सौंदर्यव्याप्यत्वाभावान्नतत्प्रयोगः एवं व्याप्यत्वमात्रोक्तौ घटचतुष्टयमात्रवृत्तिसर्वत्वमा विधेय
दायदर्शितप्रयोगप्रसंगतादवस्थ्यमितिउद्देश्यतावच्छेदकव्यापकत्वनिवेशः तादृशसर्वत्वस्य चोद्देश्यताव
च्छेदकघटत्वाव्यापकत्वान्नोक्तापत्तिः प्रकृते चाभिधेयपदसमभिव्याहृतसर्वपदस्याभिधेयत्वव्याप
कसर्वत्वबोधकत्वमुक्तंव्युत्पत्तेरितिजगन्मात्रवृत्तिसर्वत्वमेवाभिधेयत्वव्यापकं न तु कतिपयमात्र [illegible]
वृत्तिसर्वत्वमितितादृशसर्वपदस्य न कतिपयवृत्तिसर्वत्वबोधकत्वमितिभावः यद्यपि सर्वं गगनं शब्दवदिति
व्यवहारवारणाय तद्धर्मसमानाधिकरणभेदप्रतियोगित्वमपि प्रवृत्तिनिमित्तशरीरप्रवेश्यं भेदस्य सामानाधि
करण्यं निरूपकत्वाभयसंबंधेन प्रतियोगिताविशिष्टान्यो ग्राह्यः। तेनद्रव्याघवच्छिन्नभेदसत्वेपिनक्षतिः। एकधर्मे परिस्थ्यच

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विशिष्यसर्वत्वस्यप्रवृत्तिनिमित्तेप्रवेशपक्षः=२

च्छिन्नतात्पर्येणतादृशप्रयोगः तथापितद्धर्मव्यापकविधेयव्याप्यपर्याप्तिकधर्मत्वेनप्रवृत्तिनिमित्तत्वपक्षएव
तत्प्रवेशः। नत्वेतविशिष्यसर्वत्वस्यप्रवृत्तिनिमित्तेप्रवेशपक्षत्यक्षइत्याशयः। द्विधानुमितिविषयतानिवेशे
गौरवादाहा स्वेति। स्वंशाब्दबोधः। अनुमितिविषयताव्यापकत्वसंपत्तयेप्रकृतेति। समूहेति। पर्वतोवह्निमान्
सर्वंप्रमेयमित्याकारकेत्यर्थः। समूहालंबनशाब्दबोधविषयतायास्तत्समनेयत्वेप्याह। वाक्यांतरसहि
। यदिति। ततदितियत्किंचिदिति। असमूहालंबनाप्रकृतानुमितिः। प्रतिज्ञाजन्यशाब्दबोधसामान्यपरंतेनतत्तच्छाब्द
बोधविषयतायाःपरामर्शजन्यतावच्छेदकविषयतात्वाव्यापकत्वेपिनक्षतिः। तादृशपरामर्शजन्यताव
च्छेदकविषयताव्यापकतावच्छेदकस्वनिरूपक विषयतात्वकत्वोक्तौवा एकैकशाब्दबोधपरांइदं
तुचिंत्यतेपरामर्शवैशिष्टस्यैवकार्यतावच्छेदकत्वंनतुविषयविषयकत्वस्यापितत्रप्रवेशः। पत्तुपक्षताका
र्यतावच्छेदकविषयतात्वेनसमनेयत्वमितितन्न। धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमिति
त्वस्यैवतत्कार्यतावच्छेदकत्वात्तत्रापितदप्रवेशात् बाधाभावजन्यतावच्छेदकविषयतात्वेनसमने
वत्वमितिकेचित्तन्नवस्तुतस्तुव्याप्यवत्तापरामर्शे तिलिखनस्वरसात्व्यापकसामानाधिकरण्यस्यव्या
केवलान्वय्यनुरोधेनचेत्सर्वत्राप्यसाध्येपक्षनिष्ठाभावप्रतियोगित्वादेर्बाधस्यदा २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

एवं लिंगभेदान्निर्णीतेन पक्षताकत्वे पक्षतत्कार्यतावच्छे सं४ दकत्वं संभवति ४ संबंधान्तर२

ते

त्तिहेतुतावच्छेदकधर्मसंबंधभेदेपि स्वावच्छिन्नव्यापकसामानाधिकरण्यस्वाश्रयत्वोभयसंबंधेन धर्मवत्वं
६५ 65 व्याप्यत्वमनुगतं साध्याभाववदवृत्तित्वस्य व्याप्तित्वे च हेतुतावच्छेदकसंबंधान्यहेतुप्रतियोगिकसंबंधाव
च्छिन्नत्वस्य परिचायकतया हेतुतावच्छेदकसंबंधविषयतायाः कारणतावच्छेदककोटिनिवेशप्रयोजना
भावान्नकोपि दोष इति। सकलाभिधेयेत्यनेन गगनस्यापि संग्रहः। विश्वस्यैवेति। व्याप्तिघटकाभावत्वादीनाम
पि अभिधेयत्वेनानुमितौ प्रकार[illegible]त्वमिति सूचनाय दृष्टांतकथनं। ~~[illegible]~~
~~[illegible]~~ विशेषणानवच्छिन्नेति विशेषणपदं अवच्छिन्नत्वसामान्यमा
वलाभायतिष्वा अभावत्वादीनां। ननु निरवच्छिन्नप्रकारतासमनैयत्यनिवेशपक्षेऽत्यंताभावाप्रतियोग्यप्रका
ह शाभाववत्वेन पक्षत्वेपि उपनयातिव्याप्तिसंभवोऽसकलाभिधेयनिष्ठेति व्यर्थमेवा। केवलविषयतानां समनैय
त्यपक्षेऽप्युपनयातिव्याप्तिं वक्तुं तदुपादानं। प्रमेयत्वानुषंगत्यागबीजमाह द्रव्यमिति। अन्यूनविषयकत्वं॥
अनुमितिविषयताव्यापकविषयताकत्वं समनैयत्यघटकं। ननु निरवच्छिन्नप्रकारतानां समनैयत्यनिवेशप
क्षे कथमुक्तोपनयेऽतिव्याप्तिः। तस्य व्याप्तिबोधकत्वेन तद्घटकहेतुसामानाधिकरण्यसाध्यसामानाधिकर

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

५ इदंत्वस्य स्वरूपतस्तत्पक्षतावच्छेदकत्वेऽउद्देश्यविधेयभावस्फोरकत्वेन पक्षापघटकत्वे वा तस्य हेतुत्वेत्स्वरूपत इदंत्वत्वस्य इदंत्वस्य वाऽनुमितावभानात् ५
एयघटकाधिकरणानां हेत्वधिकरणत्वेन साध्याधिकरणत्वेनैव निवेशेत्ताद्दृशाधिकरणत्वस्याधिकरणतात्वस्य
नय वास्वरूपतउपर्या ज्जन्यबोधेभानेनानुमितौत्वभानेनिरवच्छिन्नप्रकारतासमनैयत्याभावादित्याशंकांसाध्येनसाध
नेनैव चाधिकरणप्रवेशं स्वीकृत्य निरस्यति व्याप्तीति। अत्रसकलाभिधेयनिष्ठात्यंताभावाप्रतियोग्याकाशाभा
ववदिदं द्रव्यमित्यत्रा अनुमितौ द्रव्यत्वं स्वरूपतो न प्रकारः साध्यतावच्छेदकरूपेणैव प्रकारत्वादित्याशयेनेदंत्व
मुक्तं साध्यतावच्छेदकीभूतद्रव्येतरावृत्तित्वघटकत्तयास्वरूपतो द्रव्यत्वं भासते इति द्रव्यं हेतूकृत्तं। द्रव्यत्वं न हेतुः
सिषाधयिषयान्यथापि साधनेः द्रव्यत्वं न हेतुः सिषाधयिषयान्याभाप्रयोगाप्रसक्तेः कथितेति।। कस्मि अनुमितौस्व
रूपतोगुणत्वाद्यभानेन उपनयबोधे चत्तथात्वेनानातिव्याप्तिरलग्नकतापत्तिरिति भावः उपनयेऽतिव्याप्तिं नि
रसितुं शंकते। न चेति। एवं चानुमितिविषयत्वोपनयजन्यबोधविषयत्वयोर्निरूप्यनिरूपकभावभेदेन महान्भे
द इति न सम नैयत्यमिति नातिव्याप्तिरिति भावः। हेत्वर्थेति। धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिन्याय
स्थलीयहेतुजन्येत्यर्थः। अन्यूनेति। निगमनार्थबोधस्य सर्वस्यापि अनुमितिविषयताशालित्वे वाधकाभावादन्यू
नविषयकत्वमात्रोपादानेनिगमनवारणासंभवात् अनतिरिक्तविषयकत्वमावश्यकमित्याशयेनान्यूनविष

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६६ यकत्वमात्रवैयर्थ्याभिधानंबोध्यम्।प्रतिज्ञार्थहेत्वर्थसमूहालंबनमादायहेत्वंतवारणायवानतिरिक्तविषयकत्वस्यार्थ
66 कत्वंबोध्यं।समूहेति।हेतुजन्यबोधमादायदीधितिरीत्याऽतिप्रसंगंदर्शयितुंसमूहालंबनाऽनुधावनं।अनतिरि
ष क्तविषयकत्वोपादानेपिप्रतिज्ञाजन्यबोधंहेतुविषयकत्वावच्छिन्नजन्यतामादायदोषोऽस्तीतितस्यामःप्र
क्तेति।यद्यपियत्किंचिदनुमितिविषयतात्वसमव्यापकस्वविषयितात्वनिवेशान्नान्यूनविषयकत्ववैयर्थ्यंहे त्यक
तुप्रतिज्ञार्थसमूहालंबनमादायहेत्वंतवारणायानतिरिक्तविषयकत्वस्यावश्यकत्वादित्येतदारंभोव्यर्थः —
तथापिसमूहालंबनानुमितिशाब्दबोधावादायधूमादालोकवानित्यादौहेतावतिव्याप्तेस्तदुपेक्षितं।असं
भवःपूर्वोक्तसमूहालंबनानुमितिमादायान्यूनतामंगाय अन्यूनविषयकत्वव्याख्याबीजंपूरयति।उपनयेति।दोष
द्वयमपियथाश्रुतनिष्कृष्टानतिरिक्तविषयकत्वकल्पयोर्बोध्यम्।हेत्ववयवजन्यबोधविषयत्ताआलोकाद्यव्य या
प्तित्वाद्धूमादालोकवानित्यादिप्रसिद्धहेत्ववयवापेक्षा।पूर्वोक्तसमूहालंबनबोधमादायदूषणांतरमाह।ए
वमिति।प्रमेयवानित्याकारकहेतुवाक्यजन्यकप्रमेयद्रव्येकदेशेद्रव्यत्वर्थः।प्रमेयमादित्यादाविति।हेत्ववयवइत्यने
नान्वयः।प्रतिज्ञार्थबोधमादायदोषस्तुफलोपधाननिवेशेपिसुवारइतिसमूहालंबनानुधावनंप्रतिज्ञा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१ प्रमेयादित्यादाविति हेतुत्वघटकेत्यनेनान्वयः प्रमेयादित्याकारककृत्तवाक्यघटकप्रमेयइत्येकदेशेइत्यर्थः १

जन्यबोधे हेतुत्वर्थविषयकत्वावच्छिन्नाजन्यतावर्त्तते इति द्योतनायेत्यन्ये। तज्जन्यबोधे च पंचम्यर्थेप्रमेयमा
नेप्रमेयत्वस्यापिभानेन साध्यतावच्छेदकीभूतप्रमेयत्व। त्वविशिष्टप्रमेयत्वस्वरूपसाध्यस्यप्रमेयरूपपक्षे
वैशिष्ट्यावगाहिबोधजनकत्वस्य प्रमेयादितिवाक्यघटकप्रमेयेतिभागे सत्त्वान्नव्यतिव्याप्तिरितिभावः।
वस्तुतस्तु तादात्म्येन प्रमेयस्य साध्यत्वे प्रमेयादितिहेतावतिव्याप्तिः। अन्यूनविषयकत्वदले संबंधानिवेश
स्यवक्ष्यमाणत्वात्। ननु हेतुजन्यबोधस्य प्रमेयांशे निर्धर्मितावच्छेदकतया किंचिद्धर्मावच्छिन्नविशेष्य
कत्वनिवेशेपि हेतावतिव्याप्तिः शक्यते वारयितुमित्यतः स्थलांतरेव्याप्तिमाह। किंचिदिति। घटान्यत्वं क
पालेवर्त्ततेतत्र कपालरूपं घटश्चवर्त्तते एवं स्वरूपसमवायोभयघटितसामानाधिकरण्यसंबंधेनघ
टान्यत्वविशिष्टं रूपं न्यतरत्त्कपालीयरूपघटान्यतरदेव ताहृशान्यतरत्वावच्छिन्नज्ञानज्ञाप्यघटान्यत्वस्यसा
मानाधिकरण्यसंबंधेनपक्षतावच्छेदकघटकत्वाबाधवारणाय समवायस्वरूपघटितसामानाधिकरण्यस्य
साध्यताघटकसंबंधत्वं। साध्यतावच्छेदकसंबंधेनप्रकृतसाध्यावगाहित्वपर्यंतसत्वेपिव्याप्तिदानायवक्ष्यमा
णानतिरिक्तविषयकत्वरक्षणाय च तस्य हेतुघटकसंबंधत्वं। स्वरूपासिद्ध्यादिवारणायतस्यैवहेतुताघटकसंबं

च
घटा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६७ घत्वं चोक्तं। तादृशहेतुमेव दर्शयति। रूपघटान्यतरत्वावच्छिन्नांशेइति। हेत्ववयवे घटान्यत्ववद्रूपघटान्यतरस्मादित्या
67 दौ। ननु केवलरूपघटान्यतरस्यैव सामानाधिकरण्यसंबंधेन हेतुत्वमस्त्विस्याशंक्य घटादिरूपस्याप्यन्यतरांतर्ग
ततया सामानाधिकरण्येन तस्य घटत्वादौ सत्त्वेन व्यभिचारमाह। घटत्वादाविति। घटान्यत्वरूपविशेषणाप्रवेशे
च तद्वैशिष्ट्यं कपा॰ रूपस्यैव तस्य सामानाधिकरण्यसंबंधेन घटत्वादावसत्त्वान्न व्यभिचारः। ननु घटान्यत्व
स्यैव घटान्यत्वविशिष्टरूपस्यैव वा स्वरूपसमवायोभयघटितसामानाधिकरण्यसंबंधेन हेतुतास्तु किं विशे
ष्यदलप्रवेशेनेत्यत आह। धर्मिभेदेनेति। रूपभिन्नस्य घटस्यापि प्रवेशेनेत्यर्थः। विशेष्यस्य रूपघटान्यतरस्य
घटमात्रविशेष्यत्वे घटान्यत्वं व्यर्थं। रूपमात्र मात्रविशेष्यत्वे पक्षविशेष्यकत्वनिवेशेनापि वारणासंभवती
त्यन्यतरदुपात्तम्। तथा च व्यभिचारावारकत्वेपि वह्निमान्वह्निमदन्यावृत्तेरितिवद्धर्मिभेदान्न वैयर्थ्यमि
त्यर्थः। घटान्यत्वं तु न हेतुः सिषाधयिषाया अनुसरणापत्तेः। ननु सामानाधिकरण्येन घटान्यत्वविशिष्टस्यै
व हेतुत्वमस्तु एवं च रूपघटान्यतरस्यैव घटान्यत्ववैशिष्ट्येन रूपेण हेतुत्वसंभवे किमन्यतरत्वेन रूपेण हे
तुत्वेनेत्याशंक्य तथा सति सत्ताया अपि कपालांतर्भावेण घटान्यत्वविशिष्टतया तस्या घटत्व घटरूपादौ

घटान्यत्वविशिष्टरूपत्वस्य तद्विशिष्टताद्दशान्यतरत्वघटकतामस्तीति न्यायः ३

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

सत्त्वेन व्यभिचारः स्यादिति मनसि कृत्य परिहरति। घटान्यत्वेति। घटान्यत्व विशिष्टस्यैव हेतुं सामानाधिक
रण्यसंबंधेनापि न घटरूपादौ व्यभिचार इति उपलक्षितस्य हेतुत्वं बोध्यं। विशिष्टहेतुके च न प्रयोजनमिति त
स्याशः। विशेष्यतावच्छेदकस्य रूपघटान्यतरत्वरूपस्यावृत्तीति। सामानाधिकरण्यसंबंधेन साध्यत्वे व्याप्ति
रेव न संभवति तस्य वृत्त्यनियामकतया हेतुसमानाधिकरणाभावीयतत्संबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेरि
त्युदाहरणाभावान्न न्याय इत्याशयः। साध्यतावच्छेदकसंबंधेन प्रसक्तीति वृत्त्यनियामकसंबंधस्य
प प्रतियोगितावच्छेदकतावच्छेदकत्वात् तियोगिवैयधिकरण्यघटिताया व्याप्तेर्निष्कृष्टतया तत्कल्पे उदाहरणं
संभवतीत्याशयेनाह। व्यापकत्वाघटकत्वेइति। विशेष्यतावच्छेदकतापर्याप्तिपर्यन्तव्यावृत्तिदानायाह
वह्निमदिति। पक्षमुख्यविशेष्यतानिविष्टत्वाशयः हेत्ववयवे हेत्ववयवैकदेशेन नु नित्यावृत्तिधर्मशून्य
त्वादित्यस्यैव सम्यक्त्वे द्रव्यपदमनर्थकं। एवं वह्निमद्वृत्तिधर्मशून्यत्वादित्यस्यैव सम्यक्त्वे पर्वतपदमनर्थ
कमित्यत आह। अखंडेति। प्रमेयाद्वाच्य वदिति। अत्र वाच्यस्यैव साध्यत्वं न तु वाच्यत्वस्य तथा सति जन्य
त्वपक्षकोक्तसाध्यहेतुस्थले इत्यनेन वाच्यत्वसाध्यकस्थलस्यैव परामर्शेत्तत्स्थलीयहेतौ व्यावृत्तिदानासं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६८
68
गतेः [illegible] प्रमेयादित्यत्र प्रमेयपदस्य लक्षणया प्रमेयज्ञानबोधकतया वाच्यत्वबोधकत्वासंभवात् । वाच्य
स्य साध्यत्वे तु प्रमेयज्ञानस्यापि वाच्यत्वया साध्यबोधकत्वं संभवतीति भावः । अत्र प्रमेयाद्वाच्यत्वसमाना
धिकरणो धर्मः साध्यः अन्यथा हेत्वेकवाक्यत्वाभावेन न्यायानवतारात् । प्रमेयाद्वाच्यत्ववदित्यत्र पाठे वाच्य
त्वे प्रमेयादित्यस्यान्वये पितद्वृत्ततादात्म्यसंबंधेन साध्यं तत्रैव च हेतुवाक्यार्थान्वय इति तादृश धर्मस्य सा
ध्यत्वानुपगमेपि न क्षतिरित्यपि संभवति । पक्षतेति । प्रमेयं हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुवारणाय निरू निष्ठ
प्य निरूपकभावनिवेशः । नन्वत्र साध्यतावच्छेदकवैशिष्ट्यानिवेशो व्यर्थः स्वरूपसंबंधेन वाच्यसाध्यकस्थ
ले हेतावतिव्याप्तिवारणाय साध्यतावच्छेदकसंबंधेन साध्यप्रकारतायास्तवनिवेश्यत्वात् । न चोक्तसंबंध
निवेशेपि पंचम्यर्थे प्रकृत्यर्थस्य निरूपितत्वसंबंधेनैवान्वयाज्जेन संबंधेन प्रमेयाद्वाच्यसाध्यके प्रमेया
दितिहेतावतिव्याप्तिः तस्य प्रकृतपक्षे साध्यतावच्छेदकीभूतनिरूपितत्वसंबंधेन साध्यवत्त्वबोधकत्वादि
ति साध्यतावच्छेदकनिवेश आवश्यक इति वाच्यम् । तत्संबंधस्य वृत्त्यनियामकतया तत्संबंधावच्छिन्नप्रति
योगित्वाप्रसिद्ध्या न्यायस्यैवाऽभावादित्याशंकां निरस्यति । संबंधविशेषश्चेति । प्रकृत्यर्थं साध्यं । ननु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पक्षमुख्यविशेष्यतोपादानेपिव्यावृत्तिरित्यभिप्रायं निरस्यतीति नास्तीति ६

ज्ञाप्यत्वंप्रमेयंप्रमेयत्वादित्यादौस्वरूपसंबंधकालिकविशेषणताभ्यांसाध्यसाधनभावेहेतावतिव्याप्तिः।
नचस्वरूपासिद्धिःविषयतायाअनित्यत्वात्।समानकालीनत्वस्यसाधनताघटकसंबंधत्वादेतिसाध्य
तावच्छेदकसंबंधनिवेशआवश्यकइतिचेन्न।उत्तरदलासत्त्वात्।ननूक्तस्थलीयहेतौसाध्यतावच्छेदक
वैशिष्ट्यनिवेशव्यावृत्तिर्नसंगच्छतेयतःप्रमेयादित्यत्रप्रमेयपदंलक्षणयाप्रमेयज्ञानपरंजन्यज्ञान
विषयत्वंपंचम्यर्थस्तदेकदेशेजन्यत्वेप्रमेयज्ञानरूपसाध्यवैशिष्ट्यबोधकत्वेपिपक्षतावच्छेदकीभूत
विषयतात्वावच्छिन्नेसाध्यवत्त्वाबोधकत्वादित्याशंकते।यदिचेति।परंपरासंबंधेनस्वजन्यज्ञाननि
रूपितस्वसंबंधेन।व्यावृत्तिरिति।केचित्तुपूर्वंप्रमेयाद्वाच्यत्वमेवसाध्यंप्रमेयादित्येवहेतुस्तत्रप्रमेयप
दस्यप्रमेयज्ञानपरत्वेपिधर्मिपारतंत्र्येणप्रमेयस्यजन्यत्वेप्यन्वयइत्यभिप्रेत्येदमित्याहुः।इतरेति।सा
ध्येत्यर्थः।पक्षतावच्छेदकेविशेष्यतावच्छेदकतापर्याप्तिसत्त्वेनेदंतद्भिन्नत्वेनपक्षनिष्ठविशेष्यताभि
न्नत्वेन।प्रकारतायाविशेष्यतान्यत्वनियमात्।तादृशेति।पक्षतावच्छेदकप्रकारतानिरूपितविशेष्य
तायाअतिरिक्तत्वमतेतद्भेदोपिनिवेश्यः।अन्यूनविषयकत्वावच्छिन्नजन्यतायां तादृशमुख्यविशे

यत्कृतस्कृ [illegible] विषयतात्वावच्छिन्नपक्ष [illegible] न·एकप्रसरता [illegible] तत्रजन्यज्ञाना [illegible] साध्य [illegible] दितिस्वरूपमा
येत स्पष्टः·एवंचतादृशविशिष्ट [illegible] निर्णीतौ [illegible] एवानिर्भरिता· ३

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ति

६९ व ष्यकत्वानवच्छिन्नत्वं वानिवेश्यं। पूर्वं मनतिरिक्तविषयकत्वानुपादाने ऽयं यदानुषंगपक्षे निगमनेव्या[redacted]त्तेरुक्त

69 त्वादिशंनीतन्निवेशितदोषतादवस्थ्यमेवेत्याहुः। तादवस्थ्यादिति। ननु प्रकारतावच्छेदकतापर्याप्तिनिवेशा

न्निगमनव्याप्तिरित्यत आह। अन्यूनेति। निगमनवारकं प्रकारान्तरमपि निरस्यति। एतेनेति। अनंतःपाति

नाश्रय त्वं अघटकत्वं स्व[redacted]प्रतीतिघ्रतितद्विषयिताकत्वं अव्यापकत्वमिति यावत्। [redacted]अ

तथात्वात्। अनंतःपातित्वात् जन्यतानवच्छेदकत्वाच्च। न च तादृशविषयताशून्य[redacted]स्य तादृशप्रति

त्राजन्यबोधस्यैव स्वरूपयोग्यतादायहेतावतिव्याप्तिरिति तादृशावगाहित्वात्मकान्यूनविषयकत्वा

वच्छिन्नजन्यतानिवेश आवश्यक इति वाच्यं। जन्यतायां गुरुतरतादृशावच्छिन्नत्वनिवेशमपेक्ष्य लाघ

वेन तादृश[redacted]विषयत्वानवच्छिन्नत्वनिवेशेनैव विषयताख्येन मुख्यविशेष्यतावच्छिन्नजन्यताकहेतु

वारणसंभवात् यथासन्निवेशे वैयर्थ्यापितदलस्य अनतिप्रयोजनकतया न्यूनतानुद्धारादिति। यत्र

सकलाभिधेयवृत्तिधर्मवदित्यादौ। विलक्षणं यन्निरवच्छिन्नं तथा च तादृशविषयतानिरूपितनिरवच्छिन्ना

वच्छेदकत्वशून्यधर्मनिष्ठानिरवच्छिन्नावच्छेदकताकविषयताशून्यत्वमर्थः। प्रमेयावच्छिन्नविषयता

लक्षणेति।वै२ त्व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

सत्वात्तत्कल्पाधिवेयनिष्ठाभावाज्ञानियोग्याकाथाभावयदित्वादिनिगमनेच तान त्वादिविषयता ~

वारणायद्वितीयवेलक्षण्यनिवेशः।नचताद्दशधर्मेनिष्ठनिरवच्छिन्नविषयताशून्यत्वमेवास्तुपर्वतत्वप्रकारतानिरूपितविशेष्यतामादायासंभवात्। धूमादालोकवानित्यादिस्थलीयनिगमने व्याप्त्यादिविषयतासत्त्वादाह।द्रव्येतिानैगमने बोधे अबाधितत्वादिमानंनास्तीत्याशयेनेदं।नचनिगमनवारणयत्तयाविधविषयता ताव च्छेदकतान्यावच्छेदकताकविषयताशून्यत्वमेवास्तुधूमव्यापकतावच्छेदकत्वावच्छिन्नवह्नित्वविषयतायास्ताद्दशद्रव्यत्वविषयतान्यत्वादितिवाच्यम्।अन्यूनविषयकत्ववैयर्थ्यात्।उक्तेतिधूमादालोकवानित्यादिस्थलीयेत्यर्थः।यदिविषयविशेषेप्रतिज्ञाजन्यबोधानांनसर्वेसंशयविरोधिविषयतातदाताद्दशनिश्चयानिवर्त्त्यसंशयप्रसिद्धेराह।इत्थंचेतिनान्यूनपदव्यावर्त्त्यसंगतिरिति।अत्रेदंबोध्यं।पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबंधकतानिवेशनेधूमादालोकवान्पर्वतोवह्निमानितिप्रतिज्ञायामव्याप्तिः।हेतुत्वंधूमोपंनचेत्यादिसंशयस्यतन्निरूपितप्रतिबध्यताशून्यत्वात्।उत्तरकल्पेचपर्वतोवह्निमानित्यादिप्रतिज्ञायामपिपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निसंबंधावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबंध

मनुष्यार्थक्यमते=२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७०
70

कृतायाः एवंलक्षणघटकतया संबंधो वह्निमान्नवेति संशयस्य तन्निरूपितप्रतिबध्यताशून्यत्वात्। एवं साध्यता
वच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतावच्छिन्नप्रतिबंधकत्वाद्युपादानेपू र
त्वां। एतादृशदोषवारणायैव व्यापकत्वरूपमवच्छिन्नत्वं निवेश्यं न त्वन्यूनपदव्यावृत्त्यसंगतिपरिहारायेति।
अथ दीधितिकारोक्तान्यूनपदव्यावृत्त्यसंगतावपि नक्षतिः धूमादालोकवानित्यादौ प्रतिज्ञाहेत्वोरपार्थबो
धनिष्ठ[redacted]हेत्वर्थविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूप
कवर्णसमुदायत्वमादाय हेतुमात्रेऽतिव्याप्तेर्वारणाय स्वयमन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशला
भार्थं तया तस्य दोपादानस्यावश्यकत्वादिति चेन्न। एवमपि स्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकतानि
वेशने धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तेर्दुर्वारत्वात्। निरुक्तावच्छेदकतानिवेशे
केवलप्रतिज्ञार्थबोधवत्प्रतिज्ञाहेत्वोरयार्थबोधस्यापि तद्घटितानतिरिक्तविषयत्वाभावेन दर्शिता
तथापि तिव्याप्तेरसत्त्वाच्च। ननु तादृशविषयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यताशून्यसंशयप्रतिबं
धकतावच्छेदकविषयिताशून्यत्वमेव कुतो न कृतं। अवच्छिन्नत्वं स्वरूपसंबंधविशेषः तथा सत्यनाहा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न

र्याप्रामाण्यज्ञानानास्कंदितनिश्चयत्वानिवेशेनलाघवात्धूमादालोकवानित्यादिप्रतिज्ञाया[redacted]संग्रह
र्थविषयितायांस्वाश्रयत्व स्वानाश्रयविषयित्वानिरूपकत्वोभयसंबंधेनप्रतिबंधकतावच्छेदकत्ववत्त्वस्यैवनि
वेश्यत्वादित्यन्यूनविषयकत्वव्यर्थमितिचेन्न।तथासतिनिगमनेऽतिव्याप्तेः।वह्निज्ञानज्ञाप्योनवेतिसंशय
स्यताद्दशाप्रतिबंध्यत्वेपिउक्तसंबंधेनतत्प्रतिबंधकतावच्छेदकत्ववत्याविषयितायाअभावात्।धूमज्ञानज्ञा
प्यवह्निमान्नवेतिसंशयप्रतिबंधकतायाश्चताद्दशविषयत्वानवच्छिन्नत्वात्।यदिचप्रतिबंधकतायांताद्दशवि
षयित्वानंतःपाति विषयित्वावच्छिन्नत्वंविशेषणमुच्यतेतदासिद्धमन्नमितिन्याया[redacted]द्दंयकारोव्यापकत्व
रूपमवच्छिन्नत्वमन्यूनविषयकत्वावच्छिन्नजन्यतांचव्याचकारेवेतिनकिंचिदेतत्।तन्निवर्तकतानवच्छे
दकविषयित्वोक्तो[redacted]वच्छिन्नविशिष्यतायाःसत्ताद्विति[redacted]ननिगमनवारणमितिदिवच्छेदकविष
यिताशून्यत्वमुक्तं।व्यापकत्वेति।ताद्दशनिश्चयत्वव्यापकप्रतिबंधकत्वस्यस्त्येत्यर्थः।समुदायस्येति।केवलपक्ष
विषयकत्वस्यद्रव्यत्वपृथिवीत्वमेयत्वादिनापक्ष[redacted]ज्ञानसाधारणतयाताद्दशपक्षविषयकनिश्चय
त्वव्यापकप्रतिबंधकत्वाप्रसिद्धिरित्यर्थः।इत्यंचेन्ने[redacted]दूषणस्याभिधानीयत्वेचास्वपदंयाद्दशशाब्दबोधमादा

म

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नियमभमादिति २

७१

71

यल्लक्षणासंगमनीयंताहृशशाब्दबोधपरंनिगमनजन्यबोधवृत्तित्वविशिष्टताहृशप्रकारतामादायदूषयतिताहृ
शेति।निगमनजन्यबोधीयसाध्यादिविषयतायाअन्यत्राभावात्व्याप्यविषयकत्वकस्येहहेतुत्वंतेःतिव्याप्तिशंकां
परिहर्तुंतंकल्पमवतारयति।सत्यंतस्येति।निगमनेचेति।तथाचान्यूनविषयकत्वनिर्वाहः।यद्रूपेति।नचयद्रूपाव
च्छिन्नप्रकारतानिरूपितप्रकृतहेतुप्रकारतानिरूपितप्रकृतपक्षविशेष्यत्वं ताहृशजनकतायाःस्वरूपसंबंधरूपा
वच्छेदकत्ववदित्येवोचितंनिश्चयत्वाघनिवेशेनलाघवादितिवाच्यम्।वह्निसमानाधिकरणधूमकालीनपर्वतो
वह्निमान्धूमादित्यादौतथाविधांसाध्यसामानाधिकरण्यत्वावच्छिन्नहेतुप्रकारतानिरूपितपक्षविशेष्यतामा
दायातिव्याप्तेः।अभावद्वयं।अन्वयव्याप्यविषयकत्वव्यतिरेकव्याप्यविषयकत्वोभयं।केचित्तुप्रकृतपक्षविशेष्य
तानिरूपितसाध्यतावच्छेदकावच्छिन्नधर्मितानिरूपितयत्किंचित्प्रकारताशून्यत्वमनतिरिक्तविषयकत्वं।नच
पर्वतोधूमाद्धूमप्रागभावाद्वावह्निमान्धूमादित्यादौवव्याप्तिस्तज्जन्यबोधस्यताहृशज्ञाप्यत्वप्रकारताकत्वादि
तिवाच्यं।साध्यतावच्छेदकपर्याप्तधर्मितावच्छेदकतानिवेशात्।एवंचताहृशधर्मितात्वेनतन्निरूपितप्रकारता
निवेशान्नाव्याप्तिः।पक्षपिनिगमनेज्ञाप्यत्वप्रकारतानिरूपकत्वंसाध्यधर्मितात्वेनैवनतुपक्षविशेष्यतानिरूपि

५ एतत्कल्पेत्रौपाधिकांतवेपर्थ्यमाशंक्याह एवमिति ५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६

तसाध्यधर्मितात्वेन। किंच पक्षविशेष्यतानिरूपितसाध्यधर्मितात्वमप्रसिद्धं तथापि पक्षविशेष्यतानिरूपितनि

ष्ठसाध्यधर्मितात्वनिवेशान्न दोषः। निगमने चैकत्र द्वयमिति रीत्यान वह्नित्वव्याप्यत्वयोर्भान संभव इति वदं

ति। हेत्व न्यत्वघटितनिरुक्तौ तेनोदाहरणादिष्वुदासइति मूलानुरोधाद गत्याव्यापकत्वमेवानुगमनीयं। अ

त्र तु व्याप्त्यनुगमेपि तन्मूलसंगतिं स्फुटयति यद्यपीत्यादिना तिप्रसंगइत्यंतेन। तथा चैतत्कल्पे यो यो धूमवान्

स वह्निमान् यथा पर्वत इत्युदाहरणं न स्वीकार्यं। अन्यथा तस्य निरुक्तान्यूनविषयकत्वेन व्याप्ति बोधकतेतात्पर्यो लवो धकत्वेन चा

धर्मिषा दति व्याप्तेर्दुर्वारत्वापातादिति। अत एवानुपदं सिषाधयिषान्यापप्रयोगानुपगमेवक्ष्यति। इति

तदुपगमे तु अनायत्याउदाहरणाघटकत्वं अनुगतव्यापकत्वाविषयकत्वे सत्यन्यूनविषयकत्वं वा नि

वेश्यमिति भावः। न्यायांतर्गतत्वोपेक्षाबीजमाह हेत्वंतेति। तस्य शुद्धपर्वतवृत्तित्वलाभेन प्रकृतपक्षवृत्ति पि

त्वलाभइत्यतो विशिष्टेति। तद्वृत्तिर्विशिष्टालोकवृत्तिर्न तु शुद्धालोकवृत्तिः। शाब्दबोधे तुल्यवित्तिवेद्यत्वात् प्र

सरेपि मानसस्तद्बोध इत्यावेदनाय यार्थ इत्युक्तं। अर्थ इति। प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वं

चतादृशगमकत्वाभावव्यावर्तकतया तथाविधगमकतामानसेप्युपयुज्यते तदनुपलक्षणं तादृशस्थले संदे

तस्याः प्रतिज्ञाया इति । प्रयुक्तहेतुसाध्यकत्वा ४ कशा दृ ज्ञानजनक दे रनुमित्योपयिकत्वघटकतया तत्र प्रयोजनेतात्पर्यम् २

ट्याभावाद्व्याप्त्यासंभवेऽपिदृष्टव्याप्त्या।सधर्मेतिएतेन व्याप्तिविशिष्टस्यालोकादेर्विशिष्टपक्षावृत्तित्वशंकानुच्छे
दादुक्ताकांक्षेतिसूचितं।तस्याआकांक्षायाःउत्तरीत्योपनयाकांक्षास्मत्त्वादाह।उदाहरणमात्रेतिव्या
प्तिमानस्यैयुक्तत्वयोज्यत्वात्।एतेनएकदानव्याप्तिद्वयाभिधानमितिदीधितिकारोक्तेनअन्वयेति।अ
न्वयव्यतिरेकोदाहरणाकांक्षाजनकावयवत्वरूपं।तल्लक्षणं।हेतुलक्षणं।पक्षसपक्षसत्तोविपक्षा
सत्तोहेतोर्वचनमित्येवंरूपं।अन्यथेत्यादिनादोषकथनेनात्तएवेत्यादिनादोषांतरकथनमसंगतमि
त्याशंकांवारयति।अतएवेति।नन्विति।अयंगौरितिप्रतिज्ञायागोसाध्यकत्वंयदुक्तंतदेवदीधितिकारःस्व
यमेवदूषयतीनन्वित्यवतारणतात्पर्यं।यादृशप्रतिज्ञावाक्यकोत्वत्वोपस्थितिस्तत्रगोत्वस्यसाध्यत्वसंभवाद्गोत्वा
देरित्यसंगतमित्याशंकांनिरस्यतितत्रेति।ननुप्रतिज्ञापदःसाध्यतावच्छेदकरूपेणसाध्यबोधकत्वनियमोऽसंग
तःयत्रसमवायेनरक्तरूपविशिष्टदंडादेःसाध्यतावच्छेदकत्वंतत्स्थलीयायाःप्रतिज्ञायारक्तरूपसंबंध्यभिन्नदंड
बोधकत्वात्।अन्यथानामार्थयोरितिव्युत्पत्तिभंगापत्तेः।तादृशदंडस्तुनसाध्यतावच्छेदकदूत्याशयेनत्रांक
तेयद्यपीति।प्रतिज्ञायादृतिरक्ताभेदावगाहित्वेनएवबोधजनकत्वेयातिरेषः।अनुमानेविलंबान्मानसानुधाव

प्रकृते

नं। ईदृशस्य च तत्तासर्वथैव विषयीभूतसाध्यतावच्छेदकोपस्थितिमादाय तत्प्रयोजकस्यापि जिज्ञासानिवर्तकत्वमुपे
यं। अनन्यगतिकत्वात् पदार्थान्तरज्ञानत्वाप्यत्वोक्तेरपदार्थप्रकारकशाब्दबोधं प्रति स्वातंत्र्येणोपस्थितेः कारणा
त्वेपि ससंबंधिकस्यत्ववदनुभवानुरोधेन तादृशस्यत्वेपि कथंचिदुपस्थितेरुपयोगादित्युक्तावप्याह। इदमिति। तथा प
दार्थान्तरान्वयित्वासंभवप्रयोजकं। अन्यथा बाधाप्रतिबध्यतापत्तिः। तथा च गोत्वस्य जातिरूपत्वेन स्वरूपतो भानेस्वरू
प तो भासमानपदार्थे पदार्थान्तरस्य ज्ञानत्वाप्यत्वस्यान्वयो न संभवतीत्यर्थः। इदं तु बोध्यं पदार्थतावच्छेदकजातौ इति जाति
पदमुपाददताद्दीधितिकृतैव स्वरूपतो भासमानतयेत्यत्र पदार्थान्वयो दुर्वच इत्युक्तमिति भट्टाचार्याणां पुनस्तत्क
नमनुचितमिति। नहि जातेः किंचिद्रूपेण भानमप्रसिद्धं येन जातावित्युक्तिमात्रेण स्वरूपतो भासमानत्वलाभेप्येत्ते
तात्पर्य त्तिभट्टाचार्याणां न तत्कथनासंगतिः। एकवाक्यतायातज्ञानहीनं प्रत्येव व्याख्यानादेरुपयोगादित्यन्ये। वह्निमत इति
। प्रतिज्ञोपनययोरेकरूपावच्छिन्नसाध्यबोधकत्वनियमात्। हृदयमित्यस्वरसस्सूचनाय। स च तदस्यास्त्यस्मि
न्निति मतुप्इतिसूत्रे स्यास्मिन्निस्पनेननार्थो विकल्प्यते येन रुक्त्य प्रसंगात्। न च संबंधवान् संबंधावच्छिन्ना
ति धिकरणत्वं वाश्चेष्ट पगर्थो त्तादृगाधिकरणतायाः संबंधरूपत्वात्। तस्मान्मतुपो भेदसंबंधेनान्वयप्रयोजका

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७२ कांक्षाघटकतामात्रस्यापितन्नामावास्मिन्निति तन्नोक्तं। तदर्थश्च समभिव्याहृतपदोपस्थाप्याधिकरणे भेदसंबंधे
नान्वय्यर्थबोधकान्मतुप् स्यादिति। चैत्रो धनीत्यादावस्येत्यर्थे मतुपूनास्मिन्नित्यर्थे इति प्रवादश्च संबंधसंसर्ग
73 शब्द कं मानानुपगमपरः। अन्यथा चैत्रो न धनीत्यादौ स्वस्य नियामकसंबंधावच्छिन्नाभावप्रत्ययापत्तेः प्रतियो
ग्यन्वयसत्वात्। यत्तु संबंधपारतंत्र्येण तत्संबंधेन वह्निमानमभिप्रेत्यैवमलिकृतानिरुक्तान्यूनानतिरिक्तविष न
तथापि यकत्वनिवेशे नैदृशपूर्वपक्षानवतारणेति। तन्न। पर्वतो वह्निसंबंधीन वेति संशयस्य पक्षे साध्यतावच्छेद
कसंबंधेन साध्यवत्तानिर्णयानिवर्त्यस्य निवर्तकत्वादव्याप्तेः। यत्र विषयविशेषे नियमतः संयोगसंबंधाव
च्छिन्नतदंकुराभावरूपबाधग्रहो तत्र एव पक्षे तदंकुरसंबंध्यभेदबोधस्तत्र प्रतिज्ञायामन्यून विषयकबोध
जनकत्वासत्वेनाव्याप्तेश्च एतेन व्याप्यविषयकत्वरूपानतिरिक्तविषयकत्वनिवेशेपि न शंक्यः। एवं पाकज
तिमानित्यादौ भावव्रततो निरर्थकत्वमत्यमभेदस्य विशेषणताविशेषेणापक्षांशे विशेषणत्वादित्यन्वयः। ए
वं तत्स्येत्यादावपि। शाब्दबोधस्य भेदाश्रयत्वप्रकारकतयानुमित्यपेक्षया एकं वैलक्षण्यं परं च पंचम्यर्थो
न्वते तरप्रतियोगिकत्वप्रकारकतयेत्यादिकमत्यमा एवमन्याभेदवतो इतरेभ्यो भेदवत्तीत्यादिप्रतिज्ञा

तत्रैवती १
१ भेद=

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

र्थबोधः। अनुषंगपक्षेनेतराणीति प्रतिज्ञार्थबोधश्चद्रष्टव्यः। यादृशपक्षोपादानप्रयोजनंपूरयति। इदमिति। प्रति
ज्ञाजन्यबोधजनकत्वस्यप्रतिज्ञात्वेआत्माश्रयादाह। अत्रचेति। बोधेति। प्रतिज्ञाजन्यत्वेनतादृशबोधपरिचयस्तज्ज
नकत्वंप्रतिज्ञात्वं। तथाचदीधितिस्थयादृशपक्षकेत्यारभ्यसंप्रदायसिद्धइत्यंतंपरिचायकमितिभावः। एवंचेति। भि
न्नेति। भिन्नमित्यादौप्रतिज्ञार्थबोधानांविशिष्योपादानेचेत्यर्थः। अन्यतमत्वेनानुगमः सफलोभवतीति शेषः
अन्यथाप्रतिज्ञार्थत्वेनानुगमप्यतादृशार्थविषयकशाब्दबोधानिवर्त्यसंशयानिवर्त्तकप्रतिज्ञार्थबोधज
नकत्वमित्युक्त्यैवसम्यक्त्वे। अन्यतमत्वनिवेशोव्यर्थएवस्यादितिभावः। एकेति। विभिन्नसाध्यादिस्थलीयप्रतिज्ञा
साधारणमनुगतं लक्षणंतुनास्त्येवइदानीमेकधर्मावच्छिन्नसाध्यकनिखिलप्रतिज्ञासाधारणलक्षणमप्यनु
गतंनिर्वक्तुमशक्यमेवस्यादतोऽन्यतमत्वनिवेशनमित्यर्थः। कूटघटितधर्मस्येति। तादृशकूटवत्संशयप्रति
बंधकत्वसामान्याभावविशिष्टबोधनिष्ठस्यतादृशबोधनिष्ठवक्ष्यमाणजन्यतानिरूपस्यवान्यतमत्वस्य
त्यर्थः। तादृशेति। नचोक्तरीत्यातादृशान्यतमबोधनिष्ठनिवर्त्तकताकत्वसामान्याभाववत्संशयस्याप्रसिद्धिः
एवंतादृशान्यतमत्वव्यापकप्रतिबंधकतानिवेशोपिनसंभवतीतिवाच्यम्। तादृशत्तादृशविशिष्टार्थे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७४

75

निश्चयत्वव्यापकतान्यतमव्यापकताश्रयप्रतिबंधकत्वसामान्याभावस्यपर्यवसितव्यापकताभेदकूटवद्भि
न्नत्वघटितस्यकिंवातादृशनिश्चयत्वव्यापकप्रतिबंधकतान्यतमनिवर्त्तकताकत्वसामान्याभावस्यप्रतिबं
धकताभेदकूटवद्भिन्नत्वघटितस्याभिप्रेतत्वात्॥नचैवमपितादृशबोधभेदकूटवद्भिन्नत्वस्वरूपेतिग्रंथासंगति तादृशे
रितिवाच्यम्॥अन्यतमत्वस्यस्वप्रतियोगितावच्छेदकभेदप्रतियोगितावच्छेदकरूपत्वात्॥निवर्त्यत्वसामान्या
५ प्रसंगस्य भावस्यनिवर्त्यत्वनिष्ठान्यतमत्वावच्छिन्नाभावरूपत्वात्॥वस्तुतस्तुतादृशतादृशबोधःप्रतिज्ञार्थमात्रबोध
भावात् ५ स्तद्व्यक्तित्वेनैवान्यतमस्यघटकइतिअन्यतमनिरूपितनिवर्त्यत्वसामान्याभावइतियथाश्रुतमेवसम्यक्॥नच
स्वनिवर्तकतान्यूनवृत्तितादृशतादृशनिश्चयान्यतमत्वंनिवर्त्यत्वसामान्याभावतार्थःसंशयविशेषणं॥ए
वंचतत्तद्व्यक्तित्वेनसंशयानामनुपादानात्ततदनिवर्तकत्वकूटनिवेशान्नाननुगमइतिवाच्यम्॥तथापिसंब न
धीवह्निमान्नवेतिसंशयस्यस्वपदेनोपादानसंभवादव्याप्तेः॥तादृशेति॥तादृशतादृशनिश्चयत्वव्यापकप्रतिबं
धकतानिरूपितप्रतिबध्यत्वाभावकूटस्यैवेत्यर्थः॥अन्यतमेनापीति॥अन्यतममध्येकेनापीत्यर्थः॥तादृशकूट
लाभः॥एतेनतादृशबोधनिवर्त्यत्वेसतितादृशशाब्दबोधनिवर्त्यत्वंयद्यन्यतमेनिवर्त्यत्वंतदासकलसंशयसं

बोध

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

५ अन्ये निरूप्यनिरूपकभावापन्नानूकूलविषयकत्वनिवेशनं तु तदुभयपत्रतत्प्रयोजनत्वभिप्रायेण निरूप्यनिरूपकभाव प्रपंति निवेश प्रयोजनस्य धूमादालोकवानित्यादावपि संभवादिति ध्येयम् ५

पर्वतस्तथेति न प्रतिज्ञेति भावः शब्दाभेदस्येति ८

भा

महेणासंभव इत्यपास्तम्। तेनेति। व्युत्पत्तिवलादेव सामान्याभाववल्लौंदपि कारवैयर्थ्यं प्रचेत्स्यपि वोध्यम्। अ

न्यतमत्वघटितलक्षणं तु भेदादिसाध्यकस्थल एवादरणीयं न तु वह्न्यादिसाध्यकस्थलेपि तत्र तादृशानव बोधा ग्रा

निवर्त्यसंशयानिव[र्त]र्त्तकबोधजनकत्वस्यैव सम्भवात्। अन्यथा तादृशबोधान्यतमत्वाप्रसिद्ध्याऽव्याप्ति

रित्याह। विशेष्यदले इति। अन्यतमबोधदले इत्यर्थः। धूमादालोकवानित्यादौ प्रतिज्ञार्थविषयकनिश्चयस्य व्या

एवंच ५ पककप्रतिबंधकताकत्वाभावेन वनिवेश्यं न तु तत्कूटं पर्वतो वह्निमान् धूमादिसादौ विषयकत्वमपि हेयमि

तिबोध्यम्। अत्र यादृशपक्षसाध्यका इत्यादि परिचायकघटकस्य प्रकृतपक्षसाध्यकार्थकत्वे एव तत्र यादृ

शरूपावच्छिन्नपक्षे यादृशरूपावच्छिन्नप्रकारकबोधलाभान्निवर्तकतान्वयिनां जनकतान्वयिनां च बोध

नां तादृशरूपावच्छिन्नसाध्यपक्षविषयकत्वलाभ इति प्रथमतः परिचापकप्रविष्टयोः प्रकृतपक्षसाध्ययोः प्र

त्येकं प्रयोजनमाह वह्नित्वेति। पक्षतावच्छेदकावच्छिन्नत्वानिवेशे घटवद्भूतलसमानकालीनः पर्वतो वह्नि

मानिति साध्यतावच्छेदकावच्छिन्नत्वानिवेशे पर्वतो घटवद्भूतलकालीनवह्निमानिति च बोध इत्यर्थः। सं

शयोपीतीति संशयाप्रसिद्धौ हेतुः। ननु प्रकृतपक्षसाध्ययोरेकतरस्यानिवेशे तादृशशाब्दत्वावच्छिन्ननिव

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७५ 75 त्तकतानिवेशे अवच्छिन्नत्वं व्यापकत्वमेववाच्यं एवंच ताहशबोधत्वव्यापकनिवर्त्तकताया अप्रसिद्धिरेवाभिधा
नीयान्नतु संशयाप्रसिद्धिरितिचेन्न। निवर्त्तकतायां स्वरूपसंबंधरूपावच्छिन्नत्वं निविष्टमित्यभिप्रायात्। प्रागु
पदर्शित एवातिप्रसंगइतियोजना। वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकप्रतिज्ञार्थबोधजनकत्वा
द्वह्निसाध्यकन्यायांतर्गतत्वाच्च प्रतिज्ञात्वापत्तिरूपोऽतिप्रसंगः इत्यर्थः। ननु ताहशान्यतमबोधजनकत्वमे
वास्तु इत्यत आह। अधिकंत्विति अक्षततत[illegible]येति। पर्याप्त्यनिवेशादिति भावः। निगमनादीत्यादिनाऽनति
रिक्तविषयकत्वघटकसाध्यतावच्छेदकसंबंधनिवेशव्यावृत्तिस्थलस्य हेतुलंप्रमेयंप्रमेयादित्यादौ हेत्वव
यवस्य परिग्रहः। संशयाप्रसिद्धिरिति। नचैवं निगमनातिव्याप्तिशंकायाः अनवकाशइति वाच्यम्। दत्तोत्त
रत्वात्। यत्तु। पर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतानिरूपितसंबंधप्रकारतानिरूपितवह्नित्वा
वच्छिन्नप्रकारत्वावच्छिन्ननिवर्तकताया उपादाने निगमनजन्यबोधीयताहशवह्नित्वावच्छिन्नप्रकारता
या अपि वह्नित्वावच्छिन्नविशेष्यतात्वेन स्वरूपसंबंधरूपनिवर्तकतावच्छेदकत्वमिति। तन्न। निगमनार्थ
घटकव्याप्त्यादिघटकैकपदार्थे तथाविधापरपदार्थाभावसंशयस्य (वह्निसंबंधी वह्निमान्नवेति संशयस्य)

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

चैतादृशनिश्चयत्वावच्छिन्नानिवर्त्यत्वात्।विशेष्यदलं।तादृशगुणवद्बोधान्यतमदलं।वह्नित्वादीति।पूर्वमेकतर
धर्मावच्छिन्नविषयताकत्वनिवेशेदोषउक्तः।अयंचधर्मेद्वयस्यप्रत्येकावच्छिन्नविषयतयोर्निवेशइतिभेदः
यद्वा।पूर्वमेकतरधर्मावच्छिन्नविषयताकत्वावच्छिन्ननिवर्तकतायाइदानींचतादृशविषयताकत्वव्यापकनि
वर्तकतायानिवेशइतिभेदः।नन्वभेदसंबंधेनसाध्यवद्विशिष्टपक्षविषयकत्वरूपंविशिष्टविषयकत्वमेवानति यादृश
रिक्तविषयकत्वघटकबोधविशेषणमिति।व्यवसायात्म निरूप्यनिरूपकभावापन्नविधेयिताशालित्वेन
बोधानांनिवेशस्यपक्षेयादृशविशिष्टवत्त्वबोधिकाइतिग्रंथेनदीधितिकृतांप्रदर्शनवैयर्थ्यमित्याशंकते
यद्यपीति।यादृशविशिष्टार्थबोधजनिकाइत्युक्त्यावास्तवविशिष्टविधेयिताशालिबोधप्रदर्शनेजनकता
त्वयिबोधेपिवास्तवविशिष्टविधेयिताशालित्वलाभादसंभवंवक्तुंभूमिकामारचयति।तथापीत्यादिना
हेत्वर्थमात्रविषयकबोधोपादानेतस्यवास्तवप्रतिज्ञार्थाविषयकत्वेनान्यतमांतर्गतत्वाभावइतिसम
हालंबनानुसरणं।न्यायावयवत्वमुभयघटकेत्यादिविशेषणघटितमित्याशयेनहेत्वंतेतन्निवेशम
भिप्रेत्यचहेतावित्युक्तम्।एकदेशेप्यतिव्याप्तिमाह।प्रतिज्ञाजन्येति।एकदेशेचेति।प्रतिज्ञाघटकेधूमादिति

अग्निमदित्यादेहेतुघटितविशिष्टसाध्यवैशिष्ट्यावगाहिबोधस्यतादृशातिरिक्तविषयकत्व
मितिच २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२ तस्यामपिस्वरूपसंबंधरूपावच्छेदकतानिवेशसंभवात्‌ एवंचदर्शितरएवा २ [illegible] नोघवादस्यावच्छेदकतानिवेशप्रयासयकत्वाद्य २

७६ 76 भागेआलोकवानितिभागेवह्निमानितिभागेचेत्यर्थः। अनतयात्त्वादित्तियेनरूपेणविषयितायाअवच्छेदकत्वंत
स्यात्तेनैवरूपेणस्वरूपसंबंधरूपावच्छेदकत्तयौनिवेशः अन्यथाविशिष्टविषयितानिवेशेकथंतास्यात्‌। स्यागे
[redacted]निमायायोग्यतायानिर्वह्निपर्वतपरपर्वतोवह्निमानितिवाक्यवारणायावश्यकत्वादित्तिवोध्यं।
वैयर्थ्यमित्तिपर्योस्तुपादानेचनिगमनजन्यवोधस्याधिकावगाहित्वात्तद्वैयर्थ्यंस्यादितिभावः। ननुपर्यात्यनि
वेशेधूमादालोकवान्पर्वतोवह्निमान्‌धूमादित्यादौप्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिर्दुर्वारैवताहृशवाक्यद्वयज
न्यविशिष्टवैशिष्ट्यावगाहिवोधनिष्ठहेत्वर्थविशिष्टप्रतिज्ञार्थविषयकत्वावच्छिन्नजन्यतायांप्रतिज्ञार्थविषय
कत्वावच्छिन्नतयातन्निरूपितजनकताशालित्वात्तन्नचताहृशविशिष्टवैशिष्ट्यवोधोनानतिरिक्तविषयकः
वह्नि धूमज्ञानज्ञाप्योनवेत्तिसंशयस्यैवप्रतिज्ञाद्यर्थवोधानिवर्त्यत्तयातन्निवर्त्तकत्वादित्तिवाच्यम्‌। एवमपि
धूमाद्वह्निमतःसधर्मापर्वतोवह्निमान्‌धूमादित्यादौहेत्त्वंतेऽतिव्याप्तेःविशिष्टवैशिष्ट्यावगाहिवोधनिवर्त्यत्वस्यव
ह्निधूमज्ञानज्ञाप्योनवेतिसंशयेसत्वेनतदनिवर्त्यसंशयानिवर्त्तकत्वस्याक्षतत्त्वादितिचेन्न[illegible]। एवमपिता
हृशप्रतिज्ञार्थविषयकनिश्चयत्वव्यापकनिवर्त्तकतौन्यस्यपर्वतोधूमज्ञानज्ञाप्यवह्निमान्नवेत्तिसंशयस्य

का

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

निवर्त्तकतयैवादोषादितिनपर्याप्तिनिवेश आवश्यक इति। ननुधूमाद्वह्निमत्पर्वतसधर्मोपर्वतोवह्निमान्धू-
मादित्यादौहेत्वंतेऽतिव्याप्तिः तत्रविशिष्टवैशिष्ट्यावगाहिबोधनिवर्त्त्यतायाउक्तसंशयेऽक्षतत्वादितिचेन्न।
हेत्व३ उपनयोत्थानेनतादृशप्रतिज्ञायाएवासत्त्वात् ननुपर्वतोवह्निमान्धूमादित्यादौहेत्वर्थविशिष्टप्रति
ज्ञार्थविषयकबोधजनकेहेत्वंतेऽतिव्याप्तिरेवनास्तिसाध्यतावच्छेदकेप्रकारतावच्छेदकतापर्याप्तिनिवे
शादितिचेन्न। अनतिरिक्तविषयकत्वदलेनैववारणात्तत्पर्याप्तिरपिननिवेश्यतइत्यभिप्रायात् अव्याप्तिरपी।
ति। सिषाधयिषाविरहकालीनबोधजनकेइत्यादिः। सिद्धेः प्रतिज्ञाजन्यबोधस्य अप्रतिबंधकत्वेपि। अनुमि
त्यप्रतिबंधकत्वेपि पुनः संशयत्वनिवेशवैयर्थ्यशंकते। नचेति। तस्याः अनुमितेः। तस्यापिप्रत्यक्षस्यापि।
प्रतिज्ञार्थनिश्चयसत्त्वेपितद्भेदव्याप्यवत्तानिश्चयादिनाजनितेतद्भेदप्रत्यक्षेतादृशप्रतिबंधकताकान्यत्वं
बोध्यं। ननुप्रतिबंधकत्वाभावस्यैवनिवेशः सम्यक्। प्रतिबंधकतावच्छेदकविषयतापर्यंतनिवेशेऽसंभवात्
वह्निमत्त्वावच्छेदेनघटाभावावगाहिग्रहेणवह्निमत्त्वादौघटव्याप्यत्वावगाहिग्रहेणवासहितस्यप्रतिज्ञार्थ
बोधस्यपर्वतोघटवान्नवेतिसंशयनिवर्त्तकत्वात्तत्राग्राह्यत्वस्यकेवलान्वयितयाग्राह्याभावावगाहित्वेनाम

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

७७
77

नुगमेन च तत्तदभावावगाहित्वेन प्रतिबंधकत्वनिवेशासंभवात् प्रतिबंधकत्वाभावनिवेशे तत्त्वावच्छेदकधर्मदर्शनोत्त्र दि
न्यकालीनप्रतिज्ञाजन्यबोधमादाय लक्षणासमन्वयसंभवादित्येवम्। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकता
याएवोपादानात्। परे तु तादृशसंशयप्रतिबंधकत्वाभावविशिष्टाप्रामाण्यग्रहाभावविशिष्टबोधजनकत्वमर्थ
अप्रामाण्यग्रहाभावनिवेशात्तादृशनिगमनव्युदासः। न चैवं प्रत्यक्षसामान्योपादानेपि तादृशबोधानिव
स्य र्त्यो विशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिबंधकं यद्विशेषदर्शनकालीनज्ञानं त[illegible]स्वरूपयोग्य
त्वसत्त्वेन लक्षणासमन्वयासंभवात्संशयपर्यंतानुधावनवैयर्थ्यमिति वाच्यम्। विशेषदर्शनकालीनस्वा
र्थबोधजनकत्वमादाय निगमनातिव्याप्तिरतस्तादृशप्रतिबंधकाप्रामाण्यग्रहाभावविशिष्टविशेषदर्श
नाभावविशिष्टबोधजनकत्वस्य वाच्यतया संशयपदसार्थक्यादिति प्रतिबंधकत्वाभावनिवेशपक्षं रो
चयंते। अत्र संशयांशे विशिष्टभेदकूटनिवेशमपेक्ष्य प्रतिबंधकतायां तादृशनिश्चयत्वानवच्छिन्नत्वनि
वेशे लाघवमादर्शयति अत्र चेत्यादिना। अनवच्छिन्नत्वमव्यापकत्वं तादृशतादृशनिश्चयनिष्ठभेदप्रति
योगितावच्छेदकत्वकूटं। कूटोपादानप्रयोजनं स्फुटमेव। स्वरूपसंबंधावच्छिन्नत्वाभावानिवेशे विशि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ष्यदलवैयर्थ्यापत्तेः।संबंधोवह्निमान्नवेत्यादिसंशयप्रतिबंधकताभावादायाव्याप्तेश्च।ज्ञानंबोधःहेतुत्वंता
दृशीति।निगमनघटकहेतुभागेवृत्तितुनार्थः।तत्रान्यूनविषयकत्वाभावात्।केचित्तुअप्रामाण्यग्रहाभा
वविशिष्टताहृशताहृशशाब्दत्वव्यापकप्रतिबंधकताकान्यसंशयाप्रतिबंधकत्वंनिरूक्तशाब्दत्वाव्याप
त्व कसंशयप्रतिबंधकत्वाभावोवायुक्तः।अनाहार्य्यैनिश्चयत्वयोरनिवेशेनलाघवादितिपरिष्कुर्वंतितेषा
मनुपश्यान्मितिर्ज्ञानमितिव्युत्पत्तिविरोधः।मितिपदस्यशाब्दत्वेनावाचकत्वात्शाब्दबोधादेरपिनव्यम
तेसंशयादिरूपतयायथास्थितस्यैवज्ञापयुस्त्वाच्च।उक्तेति।धूमादालोकवानित्यादिस्थलीयेस्यर्थः।अनुवो
धान्यमत्वनिवेशेहेत्वर्थबोधकभागघटितेप्रतिज्ञास्थलीयहेत्तावतिव्याप्तिरतस्तत्परित्यज्यजन्यतान्य
तमत्वंनिवेशयतिप्रकृतेति।पक्षेसाध्यवैशिष्ट्यावगाहित्वंनान्यूनविषयकत्वंकिंतुताहृशबुद्धित्वमि ताहृश
तिभावः।उक्तेतिधूमादालोकवान्पर्वतोवह्निमान्हेतुत्वंचधूमीयमित्युक्तेत्यर्थः।जन्यतायांताहृश
विषयत्वावच्छिन्न[illegible]त्वंनिवेश्यमितिपूर्वाभिधानेनैवजन्यतास्वन्यतमत्वमितिप्रायपदंनत्वन्यविध लब्ध
वृत्तिस्फुटीकरेणेदृशस्थलेऽन्यतमत्वंनलक्षणघटकमितिदीधितिकृतैवव्यंजितं।तादात्म्येतिकालिका

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्वेपि उद्देश्यविधेयभावेन बोधे उद्देश्यवाचकपदस्य विधेयवाचकपदपूर्वत्वस्यावश्यकत्वात्- अन्यथा शालादिपदादेकस्मादेकदो
शालादि बोधापत्तेः

७८ दिसंबंधसंग्रहाय। पक्ते तिपचतीत्यादौ कालो न भासते अतीतत्वाद्यविवक्षायामेव वर्त्तमाने लडित्यनुशासन

78 प्रवृत्तेः। अत एव पापाक्षीत् पक्ष्यतीति तत्र न प्रतिज्ञा। एवं त्वंपचसीत्यादिकामा भविष्यति न तु पचसीति। युष्मद

र्थकृत्यो मध्यमाद्युपस्यापितं [redacted] एवमेकविभक्त्यंतपदरू वि

ध्र पापिविभक्त्यंत पक्षीकृत्य क्रियानामार्थसाध्यिकापचतिराजन्नित्यादिका न सेतिवोध्यं। इतरेभ्योन्याइतरेभ्यो इतरेति

भिन्नाइतरभेदवती तरेभ्यो भेदवती[redacted]ति चद्रष्टव्यम्। भिद्यत इति। भिदधातोरकर्मकत्वायात्तदुत्तरभावा

स्त्र ख्यातेऽनर्थक इति तु न शंक्यं। भेत्स्यतेऽभेदि वा घटः इति प्रयोगवशात्तस्य सकर्मकत्वात्। एवं भेदप्रयोजको

व्यापार एव धात्वर्थः। भेदस्त्ववयवविभागः। अत एव भिद्यते कुसूलः स्वयमेवेति कर्मकर्तृप्रयोग इत्यपि न शंक्यं व्यावर्त्यव्या

वर्त्तकयोर्मिथ भेदकव्यवहारदर्शनेन अन्योन्याभावप्रयोजकव्यापारेपि तच्छक्तिसिद्धेः। अत एव भिद्यते हृदयग्रं

थिरिति वचने चिज्जडतादात्म्याभिमाननिवर्त्तकं ज्ञायमानभेदमपि व्यापारविशेषप्रयोज्यं धात्वर्थमेनिरे सां

ख्याः। व्यापारप्रयोज्यत्वांशस्तु प्रतिज्ञाजन्यबोधे न भासते तात्पर्यागोचरत्वात् न च फलमात्रतात्पर्ये

गम्यते ग्राम इति प्रयोगप्रसंगः। भिद्यत इत्यादौ व्याप्यादिविशिष्टहेतुमत्त्वरूपव्यापारस्य विषयितया भे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

भा

दावच्छिन्नजन्यताप्रयोजकत्वेनतत्प्रयोजकस्यापनयंतनिर्वाह्यतयाप्राक्तदर्शनेपिगम्यतइत्यादौतदभानस्य
निर्वीजत्वात्। व्यापाराविशेष्यफलवोधनेकर्मप्रत्ययोदुर्घटइत्यपिन। फलव्यापारयोःपृथग्धात्वर्थतामतेफलवि
षयकव्यापारविषयकवोधंजनयत्वितिशक्तिं निवेश्यफलवाच कालकर्मप्रत्ययमुपगम्यफलमात्रतात्पर्य
घटितसामग्र्यां धातुकर्मप्रत्यययोरानुपूर्वीज्ञानस्यप्रवेश्यत्वादितिदिक्। मतांतरमवतारयति। अनतीति।
पूर्वपदेवेति। तावद्बोधानिवर्त्त्यसंशयानिवर्त्तकेतियावत्पदघटितपादेसामान्याभावनिवेशएवला
दिनेऽस्या। घवेनेोचितःइतिवोध्यं। दर्शितहेत्वितिघूमादालोकवान्नित्यादिः। ननुतावद्भिर्वोधैर्निवर्त्याःसंशयायावंतः
इत्यर्थेवक्ष्यमाणदोषावाहततद्विशिष्टार्थेति। घटवद्भूतलादिसंशयानामपिघटवद्भूतलादिविषयकप्रति
ज्ञार्थवोधनिष्ठनिवर्त्तकताकत्वेनतत्संशयनिवर्त्तकवोधानांनातिरिक्तविषयकत्वं। निवर्त्तकतायांचान्य न
तमवोधत्वव्यापकत्वंनिवेशयितुमशक्यमेव अतोयत्किंचित्त्वमुक्तं। नचयत्किंचिद्बोधत्वव्यापकत्वनिवे
शेपिमेदसाध्यकयावत्प्रतिज्ञासुनलक्षणसमन्वयसंभवःपृथिवीतरभिन्नेतिप्रतिज्ञादिजन्यवोधस्यपृथि
वीतरेभ्योभिन्नेतिप्रतिज्ञादिप्रतिपाद्यार्थवोधनिवर्त्त्यसंशयानिवर्त्तकत्वादितिवाच्यम्। यत्किंचित्पदेना

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

बोध

७९ न्यतमघटकीभूतयावद्बोधानामपि प्रत्येकं संग्रहसंभवेन सकलप्रतिज्ञासंग्रहसंभवात्। यत्तु निरुक्तान्यूना
नतिरिक्तविषयकस्य सकलप्रतिज्ञार्थावगाहिसमूहालंबनबोधस्य तादृशत्वात् लक्षणसमन्वय इति तत्
79 तुच्छम्। तथा सति तावत्प्रतिज्ञार्थविषयकबोधत्वव्यापकनिवर्त्तकताकयावत्संशयनिवर्त्तकत्वेनैव घ
टवद्भूतलादिसंशयमादाय दोषवारणादन्यतमपदकिंचित्त्वयोर्वैयर्थ्यात्। समूहालंबनबोधाप्रसिद्धिस्थ अथ
ले लक्षणसमन्वयार्थं तथा कृतं। एवं तत्तद्बोधनिवर्त्यताकूटवद्यावत्संशयनिवर्त्तकत्वमपि समूहालंब
नसंशयाप्रसिद्धिस्थलग्रस्तत्वान्न कृतमिति चेन्न तर्ह्युक्तरीत्या कथं लक्षणसंगतिरिति। धूमादालोकवान् पर्व तत्र
तो वह्निमान् धूमादित्यादौ हेत्ववयववारणाय संशये यावत्त्वनिवेशः। नानाविधेति। घटवद्भूतलादिविषय
कनानाविधोदासीनसंशयानामित्यर्थः। इति केचित्। उदासीनविषयकत्वेप्यव्याप्ति [redacted] संभवात् गौरवमे
वेति। अत्र धूमादालोकवान् पर्वतो वह्निमानित्यादौ प्रतिज्ञाहेत्वर्थसमूहालंबनबोधस्य निरुक्तान्यूनानति
रिक्तविषयकतया तज्जनके हेत्ववयवेऽतिव्याप्तिः तस्य धूमीयहेतुताबोधतया हेत्ववयवस्यापि तज्ज
नकत्वात्। तत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नत्वस्य जन्यतायां निवेशेऽननुगमात्। अतोऽन्यतमत्वेन तादृश

तदस:४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

जन्यतानुगमस्यावश्यकत्वेनिरुक्तान्यूनविषयकत्वस्वरूपबोधविशेषणं व्यर्थमिति बोध्यम्॥ अत्र निष्कर्षोनु
सारिणः॥ तेन भेदत्तदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतपक्षसाध्यकप्रतिज्ञार्थबोधनि
वर्त्यतयातावत्संशयनिवर्त्तकतायाः प्रत्येकंप्रतिज्ञादिजन्यबोधेऽसत्वेपि सकलवाक्यजन्यसमूहालंब
नबोधस्यतावत्संशयनिवर्त्तकत्वात्॥ तत्रचनिरुक्तानतिरिक्तविषयकत्वसत्वात्तज्जनकत्वमादायैवप्र
त्येकंप्रतिज्ञासुलक्षणसमन्वयोबोध्य इतिपाठः॥ नन्वेवमपिधूमादालोकवान् पर्वतोवह्निमान्धूमादित्या
दौहेत्वंतेहेतौवातिव्याप्तिर्दुर्वारैव तस्यापि निरुक्तान्यूनानतिरिक्तविषयकप्रकृतप्रतिज्ञार्थहेत्वर्थोभय
विषयकसमूहालंबनबोधजनकत्वात्॥ न चान्यूनानतिरिक्तविषयकबोधस्यप्रकृतप्रतिज्ञाप्रतिपाद्या
र्थविषयकत्वावच्छिन्नजन्यतावच्छेदकविषयिताशून्यत्वेनविशेषणान्नदोष इतिवाच्यम्॥ तथासतिभे
दसाध्यकप्रतिज्ञासुतत्स्थलीयनिखिलप्रतिज्ञार्थविषयकसमूहालंबनबोधमादायैवलक्षणसमन्वय
स्यवाच्यतयातादृशसमूहालंबनबोधस्यनिखिलजन्यतामादायपरस्परानवच्छेदकविषयिताशून्यतासंभवे
भं। [illegible]नाव्याप्तेरितिचे[illegible] उक्तभेदादिसाध्यकस्य[illegible]लएवान्यतमत्वघटितंलक्षणंतन्नैवचतादृशविषयिता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न तु रूपभेदादिसाध्यके एतन्निवेशः वैयर्थ्यात् । तथापि धूमादालोकवानित्यादौ अन्यतम विषयित्वाप्रसिद्धेः ३

ऽन्यत्वनिवेशे न संभवति। धूमादालोकवानित्यादौ तु बोधे तादृशविषयिताऽन्यत्वमावश्यकं लक्षणस्यान्यतम

८० त्वाघटितत्वात्। गंधाद्रसवती पृथिवी इतरेभ्यो भिद्यते इत्यादौ तु तत्तत्प्रतिज्ञाप्रतिपाद्यार्थविषयकत्वान्य

80 तमावच्छिन्नजन्यतानवच्छेदकविषयिताऽन्यत्वं निवेश्यम्। उभयत्रापि विषयिताऽन्यत्वं विषयित्वानव

रूपं च्छिन्नत्वं जन्यताविशेषणं कार्यं तेन प्रतिज्ञार्थमात्रबोधमादाय धूमादालोकवानित्यादौ हेतौ नातिव्या

प्तिः। लक्ष्यभेदेन लक्षणभेदस्येष्टत्वात्। नन्वेवं विशेषणादाने निरुक्तान्यूनविषयकत्वनिवेशवैयर्थ्यमिति

चेन्न्यूनविषयकत्वदले नास्त्येव विशेषणोत्। स्वरूपसंबंधरूपप्रतिज्ञार्थविषयकत्वावच्छिन्नत्वनिवेशा

न्निगमनेऽतिव्याप्तिरतः निरुक्तानतिरिक्तविषयकत्वनिवेश इत्याहुः। वस्तुतस्तु निरुक्तान्यूनानतिरिक्त

यत्मा विषयकबोधत्वव्यापकमुख्यविशेष्यत्वावच्छिन्नजन्यतानिरूपितजनकताशालिवाक्यत्वमेव लक्षण

मिदं च सर्वानुगतं। धूमादालोकवान्पर्वतो वह्निमानित्यादिस्थलीयप्रतिज्ञाहेत्वर्थविषयकसमूहालंब

नबोधीयहेत्वर्थमुख्यविशेष्यता तु न तादृशबोधत्वव्यापिका केवलप्रतिज्ञार्थबोधे तदभावात् इति ता

दृशसमूहालंबननिष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यताया लक्षणाघटकत्वान्न हेतावतिव्याप्तिः। न

यत्र प्रतिज्ञार्थतोऽन्यतमात्वं तत्रान्यतमत्वाघटितं अनतिरिक्तविषयकत्वमध्ये तद्विशेष्यार्थविषयकत्वनिरूपितत्वावच्छिन्नविवक्षिताका

न्यतमरूपस्य न प्रवेशः किंत्वेकैकतादृशविषय [illegible] कैकविशेष्यतया व्याप्यतया ॥

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तस्यहेत्व

प

चैवमन्यूनविषयकत्वं व्यर्थं। [redacted]त्वादिति। ननु चैत्रः पचतीत्यादेरुपनयस्य दुर्वचत्वेन न्यायाभावात्प्र
तिज्ञात्वमेव न संभवतीति दीधितिकृतां तत्र लक्षणोपवर्णनमसंगतमित्यभिप्रायेणाशंकते। नन्विति। य

अर्थांतरेति

द्रूपावच्छिन्नसाध्यबोधिकाप्रतिज्ञा तद्रूपावच्छिन्नसाध्यव्याप्यस्यैव पक्षे उपनेयत्वादिति भावः। निपा
तार्थेनेति। निपातातिरिक्तनामार्थस्य तादृशनामार्थे भेदसंबंधेनान्वयो व्युत्पन्न इति न क्रो निपातत्वे
न तदर्थाभावे नेतरपदार्थान्वये बाधकाभावादिदृश्य मित्यस्वरसः। स चानुयोगितायाः संसर्गत्वा
दिनाऽनुयोगितानेतरीयेति भेदोऽनुयोगित्वाभाववानिति द्विविधबोधं प्रति तत्संसर्गकशाब्दसामग्र्याः
प्रतिबंधकत्वं कल्प्यमिति गौरवं तत्प्रकारताबादिना तु भेदानुयोगितासंबंधावच्छिन्नेतराभाववानि
त्येकविधबोधं प्रत्येवेति लाघवमिति। यः पाककृतिसामग्रीमान् स पाककृतिमानित्युदाहरणोपदर्शि
तपाकविषयकाभिन्नकृतिव्याप्यत्वविशिष्टपक्षधर्मत्वोपदर्शकः पाककृतिव्याप्यवानित्युपनयः सुव
चइत्याशंकां वारयितुं अस्य तत्रानुदाहरणत्वं सूचयन्नाह। प्रतिज्ञोत्थापितेति अस्य साध्येऽन्वयः। रक्तदं
डादिसाध्यकोपनयादिसंग्रहाय प्रकृतसाध्योपेक्षा। वितर्केति। यदि तथा शाब्दस्य प्रक्रांतं यद्विशेष्यंस

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

एवं ताद्दात्म्यसंबंधेन हेतौ तद्वानित्यबोधनयो न तु समवायमित्यनुमितौ मत्कीकृतं ६

८१ एवार्थस्त्वदोपनयजन्यबुद्धौ हेतुमत्त एव विशेष्यत्वात्तस्माद्धेतुमानित्यर्थः स्यात् । हेतुमति च हेतौ वा हेतुमज्ज्ञा
नव्याप्यत्वान्वयो न संभवति । अननुभवात् । यद्दि प्र- क्रांतप्रकारोर्थस्त्वदोपनयजन्यबोधविशेष्यस्य पक्षस्य
सामान्यतोऽन्वयव्याप्तौ प्रवेशेन प्रकारतयोक्त एव दोषः । यदि प्रक्रांतसादृश्यं तदा केवलान्वयिनि प्रक्रांतो य उप
बोध नयजन्यविशेष्यस्तत्सादृश्याप्रसिद्धिरिति निगमननिराकरणे प्रक्रांतं यद्दृष्टांतरूपं विशेषणं तद्भेदस्य बाधा न
त्केवलान्वयिनि तत्सादृश्याप्रसिद्धेश्चोपनयनिराकरणसिद्धेरिति । प्रक्रांतत्वादिति । व्याप्तिविशिष्टहेतुमत्त्व
स्य बोधकः स इत्येवोपनयः कुतो नेति तु न शंक्यं तथा प्रक्रमाभावात् । योग्यताया एकतरार्थबोधकत्वासंभ
वादाह । तात्पर्येति । वह्निरिति वह्निमतः सिद्धेः अर्थत एव वह्निसिद्धेर्वृत्त्यभावसंशयनिवृत्त्यादिसंभवात् । न च यद्रू
पावच्छिन्नप्रकारप्रदर्शिका प्रतिज्ञा तद्रूपावच्छिन्नप्रकारघटितार्थतात्पर्यक एवोपनय इति नियमात्प्रति
ज्ञाया वह्निसाध्यकत्वान्निराकरणेपि [illegible]उपनयस्य तथाकारत्वं निराकृतमेवेति वाच्यं । मतुपो निरर्थकत्ववादि
नं प्रति उक्तनियमानंगीकर्तृत्वं तत्सार्थक्यवादिनं प्रति च प्रतिज्ञायास्तथात्वनिराकरणेन च । वाक्यपद्धयाभिप्रा
येणाह । तज्जन्येति । यथाश्रुतार्थं निरस्यति नत्विति । ननु विप्रतिपत्तौ कोटिप्रदर्शनं किमर्थमित्यत आह तत्स आ

५ शाब्दबोधे हेतुं वह्निमत्तो भेदद्वयमितमतेः । एतनातिरिक्तविषयकत्वं यथाश्रुतमस्तीति ध्वनय । नेयदाधिक्ये केचित् विशुद्धं तद्वनारपीति । पर्वत इति । मतच्छिशिष्यार्थबोध
गार्थस्य पक्षतां तु प्रतिज्ञार्थानां नानात्वापत्तेरिति भावः ५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

दर्शनं चेति। तथा च साधारणधर्मो घसत्वेपि न क्षतिः। तस्य विप्रतिपत्तिकोटित्वस्यास्वातंत्र्येणेति। तद्धि शि
ष्टवुद्धैतन्मुख्यविशेष्यकज्ञानत्वेन हेतुत्वादिति भावः। ननु शाब्दबोधजनकवह्निपदार्थोपस्थितेरेव स्वातं
धु त्र्येण कोट्युपस्थितिरूपायाः सत्वात् कुतो न वह्निकोटिसंशय इत्यत आह। अथवेति। विप्रतिपत्तिकोटित्वं च तद्घ
टघटकपदजन्यस्मृतिकोटित्वं। परोक्षज्ञानं निश्चयात्मकं एवेति सिद्धांतमनुरुध्याह। वस्तुत इति। ननु तथा
पि वह्निमद्वेदं कोटिकत्वाद्वह्निकोटिकसंशयो नानुपपन्नो बाधकाभावाद्धूभावमहानसीयवह्निकोटिकसं
शयवदत आह। यद्वेति। ननु यया प्रतिज्ञयाऽवयवांतरसहकारिण्यैव बोधो जनितः तादृशप्रतिज्ञाया अतिरिक्त
विषयकबोधजनकत्वात्तत्राव्याप्तेर्दीधितावकथनान्न्यूनतेत्याशंक्य तत्संग्रहार्थमंतरापदस्यार्थमाह। हेत्व
र्थेति एवं च विशेषाभाववत्तामध्ये सामान्याभाववत्तोपि प्रविष्टत्वमिति अजनितान्वयबोधकप्रतिज्ञाया असं
ग्रहः न्यूनतां स्फुटीकरोति। एतेनेत्यादिना। निराकांक्षेति। ननु निराकांक्षत्वावच्छेदकधर्मं न्यायांतर्गतत्वमिति चे
त् उपनयघटकवह्निपदसंबंधिपदार्थपदानामेव न्यायांतर्गततया तेषां वानुपूर्वीक्रमस्याभिमतत्वात्। ए
तेन प्रतिज्ञाविषयकनिराकांक्षविषयकक्रमपरत्वं न संभवति निराकांक्षविषयतायाजनकतानवच्छेदक

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

८२ त्वादितिप्रस्तुतं ...क्तं। तच्छालित्वस्यांशस्य वर्णत्वघविश्रांतेराह। तच्छालित्वं चेति। आनुपूर्वीघटकवर्णत्वव्यापकसमु

ध दायत्वं च न प्रत्येकं प्रतिज्ञासुतया...विषयत्वं किंचिज्ज्ञानविषयवर्णत्वव्यापकत्वमेकदेशे पीत्यतः प्रतिज्ञाघटकव

शान ३ र्णतद्घटकवर्णत्वत्वमात्रकाकांक्षाकारणाय तन्मान्यत्वं प्रागुक्तरीत्या पर्यन्तं किंचित्त्वप्रकारतास्थाने विषयतां च नि

ति वेशयन्नगुरुतरमाकांक्षाघटकत्वं परित्यजति। तज्ज्ञानकैनमाव त्तित्वनिवेशे विशिष्टप्रतिज्ञाविषयितायाअ

प्यिन्नमच्यतित्वादसंभवइति। नमान्येति। यत्किंचित्त्वनिवेशाव्याप्तिः पूर्ववत्। अन्यूनविषयकत्वदलेवास्तव

वैशिष्ट्यनिवेशोप्यसमसाधारण जन्यताकप्रतिज्ञाप्यामसंभवमाह। अन्यूनेति। विशिष्टार्थबोधश्चप्रमात्मक

एव। तादृशवाक्यप्रतिज्ञासमानाकारवाक्ये। वाक्यपदेनाकांक्षादिमत्त्वलाभे शाब्दपदापेक्षादीधितिकृत्ते

बोपवर्णितातां स्फुटीकरोति। शाब्देति। स्वयं शाब्दपदस्य तल्लाभेवाक्यपदापेक्षांबुध्युत्पादयति। शाब्दबो

धंप्रतीति। ज्ञानादेः। ...योग्यताज्ञानादेः। एवं च भट्टाचार्यव्याख्यायां शाब्दवाक्यपदयोरुभयोरेवाकांक्षादि

मत्त्वलाभार्थकत्वं यत्त्विति मते च वाक्यपदादाकांक्षादिलाभः शाब्दपदाद्द्विजातीयशाब्दलाभ इत्येवं मतयो

र्भेद इति बोध्यं। जात्युपस्थापके निवक्तव्ये विशेषपदोपादानफलं दर्शयति। शाब्दपदस्येति। आकांक्षादिकं चो

अवश्येतिपद...पिवास्तववैशिष्ट्यघटितान्यूनविषयकेपिवेपिवाद्दशवि...शिष्टार्थविषयितानिरूपितयाद्दशविशिष्टार्थविषयितात्वेन स्वरूपसंबंधरूपाव

च्छेदकत्वसंभवतितथापिनद्दिवक्षायानव्युत्पत्तिवल...अन्यूनविषयक...दानदप्रतीतेः किंतु वा रसिकलक्षणादि...ध्येत्

चितानुपूर्वीकत्वघटकप्रतिज्ञायांवाविशेष्यदलेवानिवेश्यं।इदंतुबोध्यं।प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरो
पनयोत्तरनिगमनत्वावच्छिन्नभेदप्रतियोगितावच्छेदकत्वंनोचितानुपूर्वीकत्वं किंतुनिगमनपूर्वोपनय
पूर्वोदाहरणपूर्वहेतुपूर्वत्वावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वंहेतुपूर्वत्वांतंवाप्रतिज्ञा
त्वानिवेशेनलाघवात्।एवंचपर्वतोवह्निःसंबंधीतिनिराकांक्षवाक्यव्युदासइतिपंक्तिर्यथाश्रुतैवसंगच्छ
तेन्यायानंतर्गतत्वाद्दृश्यवाक्येप्युचितानुपूर्वीकत्वसंभवात्।नचप्रागभावानुपगमेतत्पूर्वत्वंतदुत्प
त्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वमुत्पत्तिघटिततयागुर्वितिवाच्यं।संसर्गतयातन्निवेशेनलक्षणग्रह
स्यतद्ग्रहंविनापिभावात्।सामान्यलक्षणायामुक्तस्यानुगमप्रकारस्यदर्शितत्वाच्च।तस्माद्विशेष्यदलेए
वतन्निवेशः॥ ७॥ ॥७॥ इतिमूलप्रतिज्ञाविवरणम्॥ ॥उक्तरीत्याकारणानंतर्यस्यजन्यताव
च्छेदककोटिप्रवेशमतेन्यूनविषयकत्वस्यापिनजन्यतावच्छेदकत्वमित्यनुशयेनान्यूनातिरिक्तपदंविहा न
येतिमूलं।अव्याप्तिरिति।अनुमितिर्ज्ञानमित्यादिप्रतिज्ञायांलक्षणगमनात्।अप्रयोजनंतरेति।लिंगाविषयक
त्वनिवेशात्सत्यात्इतिशेषः।पक्षतावच्छेदकनिवेशेपिलिंगाविषयकोक्तोदाहरणेऽतिव्याप्तेर्मुख्यत्वनिवेशे

स्वप्रतियोगिधर्मित्वसंबंधावच्छिन्नप्रतियोगिताकध्वंसाभाववविशिष्टप्रतियोगिकसमयसंबंधः —

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

एवंचनिगमनविशेषेपिनातिव्याप्तिरितिभावः ५

सि

८३ 83 तद्द्वयपर्याप्तेः। एतदर्थमेव निगमनातिव्याप्तिवारणार्थमेव। निगमने मत्वर्थसंबंधित्वेन पक्षभानमभिप्रेत्येदं उपन
यातिव्याप्तेरेतद्विवक्षया दुर्वारत्वसूचनायैवकारः। पक्षेति। इतरभेदाश्रयत्वेनैव बोधः आख्यातार्थाश्रयताएवया२
मुख्यविशेष्यत्वात्। ननु धर्मितो निवेशः उपनयसामान्ये त्वतिव्याप्तिर्न वत्स्यैवेति भावः। एवं निगमने ऽतिव्या
प्तिर्नास्तीति वक्तुं प्रयोजनांतराभावेपि एतद्वारणार्थमेव पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यत्वं देयमित्युक्तं इदानीं
पक्षतावच्छेदकवैशिष्ट्यनिवेशस्य प्रयोजनांतरं दर्शयन्नेव निगमनातिव्याप्तिर्नास्तीत्याह। वस्तुतस्त्विति। पक्षताव
न च्छेदकावच्छिन्नमुख्यविशेष्यत्वाभिरूपकत्वमेवेति। मुख्यत्वनिवेशफलं सुगमं। अत्रेदं बोध्यं। यत्र समवायसं
बंधावच्छिन्नगोत्वाभावः साध्यः कालिकसंबंधावच्छिन्नगोत्वाभावो हेतुस्तत्र यत्र गोत्वं तत्र गोत्वमित्युदाहरणे
ऽतिव्याप्तिः तत्रत्यमुख्यविशेष्यताद्वयस्य पक्षतावच्छेदकीभूतगोत्वत्वानवच्छिन्नत्वासंभवात्। ननु समवाया
वच्छिन्नगोत्वाभावस्य साध्यत्वे कालिकसंबंधावच्छिन्नगोत्वाभावो व्यभिचारीति व्यतिरेक्युदाहरणाभावात्का
तिव्याप्तिः नच कालिकसंबंधावच्छिन्नगोत्वाभाव एव साध्यः समवायावच्छिन्नगोत्वाभावो हेतुस्तत्र न व्यभिचा
र इति वाच्यं। तादृशसाध्यस्य केवलान्वयित्वया साध्यवद्भेदाप्रसिद्ध्याप्रतियोगिवैयधिकरण्यविशिष्टसाध्या

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

भावघटितव्यतिरेकव्याप्त्यप्रसिद्धेः तदघटितसाध्याभावघटिततद्व्याप्त्यप्रसिद्धेश्च। घटादेरपि कालिकसंबंधे
न गोत्ववत्तया तत्र समवायेन तदसत्त्वात्। मैवं। समवायतादात्म्यघटितसामानाधिकरण्यसंबंधेन गोत्वा
भावस्य ~~हेत्वभावस्य~~ हेतुत्वात्। यद्वा शुद्धसमवायसंबंधावच्छिन्नगोत्वाभाववत्एकः गोत्वविशिष्टगोत्वनि
रूपितसमवायसंबंधावच्छिन्नगोत्वाभावोऽपरः। न च विशेषरूपेणासंसर्गतास्वीकारापत्तिरिति वाच्यम्। वि
शिष्टवैशिष्ट्यबोधस्थलानुरोधेन तादृशविशिष्टसमवायस्य संसर्गतायाः सर्वैरुपगमात्। अथवा समवाया
वच्छिन्नाधारतासंबंधावच्छिन्नगोत्वाभावोऽपरस्तत्रैकस्य साध्यत्वेऽन्यस्य हेतुत्वं द्रष्टव्यं। यद्वा गोभेदः साध्यः
समवायावच्छिन्नगोत्वाभावो हेतुस्तत्रोक्तोदाहरणेऽतिव्याप्तिः। यदि च गोत्ववद्भेदो नास्ति गुरुधर्मावच्छि
न्नप्रतियोगिताकत्वात्। यद्रूपावच्छिन्नप्रति[illegible]योगिताकभेदः साध्यः किंचिद्रूपावच्छिन्नतद्रूपबोधकं
च नोदाहरणमिति मन्यते तदा परममहद्भेदः साध्यः परममहत्त्वाभावो हेतुः परममहत्त्वं पक्षः तत्र परमप
रममहत्त्वमित्युदाहरतीति व्याप्तिर्दुर्वारैव। परममहत्त्वत्वस्य जातित्वान्न गुरुधर्मावच्छिन्नभेदस्वीकारप्रसं
गः। अत्र केचित् समादधति। मुख्यविशेष्यताद्वयशून्यत्वं तद्दलार्थ इति तदपरे न क्षमंते तथा सति निग

तंतत्रपरममह२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अपरविशेष्यताचपक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यता। तथाचपक्षनिष्ठैकमुख्यविशेष्यतावच्छेदकावच्छिन्नापरमुख्यविशेष्यता २

८४ मनोपेक्षानिर्वीजास्यादिति। तदपरेनमस्यंति। नहिविशेष्यताद्वयशून्यत्वंद्वित्वावच्छिन्नतदभावः। किंतुएकविशे
ष्यताशून्यत्वेसत्यपरविशेष्यताशून्यत्वं। एकविशेष्यताचपक्षनिष्ठैकमुख्यविशेष्यतावच्छेदकावच्छिन्नापर
मुख्यविशेष्यताशून्यत्वेसतिपक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताशून्योयोबोधस्तज्जनकत्वंपर्यव
सितार्थः। अत्रयत्रगोत्वंतत्रगोत्वमित्युदाहरणवारणायसत्यंतं। यत्रसास्नातत्रगोत्वमित्युदाहरणवारणा
यविशेष्यं। अत्रनियतसमूहालंबनंनास्त्येवेतिहृदयम्। तेनोदासीनप्रतिज्ञाविषयकज्ञानजन्यशाब्दबोध
स्योदासीनवाक्यार्थविषयतानियतप्रतिज्ञार्थविषयताकत्वेपिनक्षतिः। इत्थंचनिगमनजन्यबोधस्यताहृ
शविशेष्यताशून्यत्वाभावान्निगमनोपेक्षासंभवतीति। नकिंचिदनुपपन्नमिति। अपरेतुसमादधति
स्वान्यमुख्यविशेष्यत्वानिरूपकत्वसंबंधेनपक्षतावच्छेदकावच्छिन्नविशेष्यतावत्वंस्वान्यमुख्यविशेष्य
तानिरूपकत्वसंबंधेनस्वीयपक्षतावच्छेदकावच्छिन्नविशेष्यतावदन्यत्वंस्वीयपक्षतावच्छेदकावच्छिन्न
यत्किंचिद्विशेष्यताभिन्नमुख्यविशेष्यत्वानिरूपकत्वंवातद्दलार्थः अतोनताहृशोदाहरणेऽतिप्रसंगः। असं
भववारणायभेदप्रतियोगिविषयतायांस्वीयत्वनिवेशः। एवंचनिगमनोपेक्षापीति। नचयत्किंचित्यस्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विशेष्यताभिन्नमुख्यविशेष्यतानिरूपकत्वाभावनिवेशेनैव विश्वपक्षके प्रसिद्धिवारणसंभवे पक्षतावच्छेद
कनिवेशनं नावश्यकमिति वाच्यम् । अखंडाभावघटकत्वेन सार्थक्या[redacted]त् । अन्ये केचित्तु यत्किंचित्पक्षविशेष्यताभिन्नमु
स्यविरोध्य ख्यविशेष्यतानिरूपकत्वमेव सम्यक् । न तु पक्षतावच्छेदकस्यापि[redacted]निवेशः प्रयोजनाभावात् यत्र गोत्वं तत्र गोत्वं तत् यत्रगोत्वं
त्रसास्नेत्युदाहरणादेस्तेनैव वारणात् । विश्वपक्षकस्थले प्रतिज्ञाजन्यबोधस्य यत्किंचिद्विशेष्यताभिन्नघ
टत्वावच्छिन्नमुख्यविशेष्यत्वमादाय तदनिरूपकत्वसत्त्वेनानुपपत्त्यभावात् । निगमनवारणाय तन्निवे
शे त्वसंदर्भ इति वस्तुतस्त्वित्यादिना भट्टाचार्याणां निगमनोपेक्षाबीजवर्णनं संदर्भविरुद्धमेवेत्याकूतत
दपरे न मृष्यंति । यत्किंचित्पक्षविशेष्यताभिन्नमुख्यविशेष्यकत्वानिरूपकत्वस्य तद्दलार्थत्वे वह्निमत्पर्व
तकालीनः पर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिः पक्षतावच्छेदकघटकीभूतपर्वतस्य विशिष्टपर्वता
भिन्नत्वेन पक्षतया तन्निष्ठविशेष्यतान्यमुख्यविशेष्यताकत्वाभावस्य तज्जन्यबोधे सत्त्वात् । नन्वभेदप्र
तियोगिविशेष्यताया मपि मुख्यत्वं निवेश्यत इति न दोष इति वाच्यम् । दलद्वये मुख्यत्वमपेक्ष्यत स्यापक्ष
तावच्छेदकावच्छिन्नत्वनिवेशापेक्षया लाघवात् । अस्तु वा मुख्यविशेष्यताद्वयनिवेशः तथापि स्वस्य स्वधर्मिता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

वच्छेदकत्वकारणायधर्मितावच्छेदकप्रकारतानिरूपितविशेष्यत्वांतरमावश्यकंतथाचासंभवः।पर्वतोवह्नि^
मानितिबोधस्यापिविशेष्यताद्वयशालित्वात्।अतःपक्षतावच्छेदकनिवेशनमावश्यकं नचपक्षतावच्छेद
कानवच्छिन्नानवच्छिन्नविशेष्यतामादायसएवदोषइतिवाच्यम्।पक्षतावच्छेदकावच्छिन्नयत्किंचिद्विशे
ष्यताभिन्नकिंचिद्धर्मावच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वस्यैवविवक्षणीयतयाअनुपपत्त्यभावात्।
पक्षतावच्छेदकानिवेशेचासंभवतादवस्थ्यादिति।धर्मितावच्छेदकावच्छिन्नविशेष्यतातोधर्मितावच्छे
दकप्रकारतानिरूपितविशेष्यतायाअन्यत्वेविधेयकोटिप्रविष्टपदार्थीयप्रकारताचेत्यादिअग्रिमभट्टा
चार्यलेखएवप्रमाणमितिदिक्।अन्येतुसमादधति।स्वनिरूपकत्वस्वभिन्नपक्षतावच्छेदकतापर्या
प्त्यधिकरणधर्मावच्छिन्नमुख्यविशेष्यतानिरूपकत्वोभयसंबंधेनपक्षतावच्छेदकतापर्याप्त्यधिकरण
धर्मावच्छिन्नमुख्यविशेष्यतावदन्यत्वमपिबोधविशेषणंदेयं।प्रतिज्ञासामान्यसंग्रहायस्वनिरूपक
त्वेति।धूमादालोकवान्पर्वतोवह्निमानित्यादावालोकप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतां
स्वपदेनोपादायाव्याप्तिरितिभेदप्रतियोगितावच्छेदककोटौपर्याप्तिनिवेशः।तत्रैवविशिष्टपर्वतत्वावच्छि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न्नविशेष्यतांस्वपदेनोपादायतदन्यालोकप्रकारत्तानिरूपितकेवलपर्वतत्वावच्छिन्नविशेष्यत्तासत्वेनाः
व्याप्तिरितिद्वितीयसंबंधेपर्याप्तिनिवेशः।नचप्रमेयगोत्वत्वेनपक्षतायांपूर्वेवह्न्यो त्वा भावस्यसाध्यताहे
तुताचतत्रव्यतिरेक्युदाहरणेउभयसंबंधेनपक्षतावच्छेदकपर्याप्त्यधिकरणधर्मावच्छिन्नमुख्यविशेष्य ता
तावदन्यत्वसत्त्वादतिव्याप्तिरितिवाच्यम्।भट्टाचार्योक्तपक्षतावच्छेदकानवच्छिन्नेत्यादिदलस्यपक्षता
वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविशेष्यत्वानवच्छिन्नतादृशधर्मानवच्छिन्नविशेष्यत्वानिरूपक
त्वमर्थः।एवंचनिरुक्तोदाहरणजन्यबोधस्यचपक्षतावच्छेदकैकदेशगोत्वत्वावच्छिन्नविशेष्यताशालि
त्वेपिनातिव्याप्तिः।धूमादालोकवान्पर्वतोवह्निमानित्यादौकेवलपर्वतत्वावच्छिन्नविशेष्यतामादायाव्या
प्तिरतः प्राथमिकानवच्छिन्नांतनिवेशः।प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतामादायासंभवोऽतोद्वि
तीयानवच्छिन्नांतनिवेशः।तत्रचप्रमेयगोत्वपक्षकव्यतिरेक्युदाहरणवारणायपर्याप्तिनिवेशइतिपरं
तुसंबंधित्वावच्छिन्नपक्षकवह्निसाध्यकनिगमनवारणंलिंगाविषयकत्वंविनाऽशक्यमेवेतिबोध्यम्।अत्र
विधेयकोटावधिकावगाहिशाब्दबोधानुपगमपक्षमुपगम्यसंबंधीवह्निमानितिप्रतिज्ञानुपगमसंभवा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

८६ 86 न्मतुपो निरर्थकत्वमत्तेउपनयार्थनिगमनार्थयोर्द्वयोरेवबोधादननुषंग पक्षीयनिगमनोपेक्षाबीजसंगति
रितिबोध्यं। परेतुसमादधति। पक्षतावच्छेदकपर्याप्त्यावच्छेदकताकान्यमुख्यविशेष्यत्वानिरूपकत्वमेवतद्दलार्थ
यत्रगोत्वंतत्रगोत्वमित्यादौ व्यापकत्वमानस्वीकाराद्गोत्वव्यापकत्वविशेष्यतयातस्याःपक्षतावच्छेदकपर्याप्त्या
पर्याप्त्यावच्छेदक ४ वच्छेदकत्वाभावेनैवतत्क्षुदासंभवेतिपरेतु। एवंसतिपक्षतावच्छेदकताकमुख्यविशेष्यताकत्वनिवेशेनैवयत्रगो सास्नातत्र
२ त्वं[redacted]त्याद्युदाहरणवारणसंभवात्पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वपर्यंतविव
क्षावैयर्थ्यादिति। इत्थंतुसमाधानंभविष्यति। पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वदलस्य
पक्षतावच्छेदकनिष्ठस्वीयकैयत्किंचिदवच्छेदकत्वाप्रयोजकप्रयोज्यमुख्यविशेष्यत्वानिरूपकत्वमर्थः।य
त्रगोत्वंतत्रगोत्वमित्युदाहरणेतत्पदसमभिव्याहृतगोत्वपदंयत्पदसमभिव्याहृतगोत्वपदादिकंभिन्नभिन्नमेवभि
भिन्नगोत्वत्वनिष्ठावच्छेदकतानिरूपकविशेष्यताप्रयोजकमितितिनातिव्याप्तिः। [redacted]पक्षतावच्छेदकनिष्ठावच्छे
दकताप्रयोजकतायाःगोत्वपदयोःसत्त्वादतिव्याप्तिरितियत्किंचिदिति। मतुपःसार्थकत्वस्यव्यवस्थापनादु
हागंधवद्भेदेत्ति। गंधाभावइति। साध्याभावव्यापकीभूताभावप्रतियोगिहेतुतावच्छेदकावच्छिन्नाभावस्त्वतियो

तन्न। यत्रगोत्वंतत्रगोत्वमित्यादौतथाविधगोत्वविशेष्यत्वंतरमादायातिव्याप्तेः गोत्वाभाववान्नसास्नाभावादित्यादौयत्रगोत्वंतत्रसास्ना
इत्यादौसास्नायांगोत्वव्यापकत्वभानेपि गोत्वे सास्ना CC-0 Dharmartha Trust J&K. An eGangotri Initiative ...लोकयानपर्वतोवह्निमानित्यादावनुकरीत्याऽव्याप्तेः १
२ तच्चप्रयोजकताविशेषणं तेनयत्रगोत्वंतत्रगोत्वमित्यादौविशेष्यताद्वैकोपि प्रयोजकतात्रेहान्यत्वमतिरिति। २

प्रक्रममात्रेण२

गित्वं व्याप्तिः। अन्यथा धूमवान् वह्नेरित्यादौ धूमाभावव्यापको यो वह्निधूमोभयाभावस्तत्प्रतियोगित्वादति
व्याप्तेः। व्यापकत्वस्योपनयवाक्यार्थाघटकत्वे[redacted]यिव्यापकतावच्छेदकेति। तादृशेति। न च नेयं पृथिवीत्याकारके स[illegible]र्थः।
स्वरूपत एवेति। एतेनान्वयितावच्छेदकरूपेणानुपस्थितेस्तस्याभावांशेऽनुयोगितासंबंधेनान्वय इति सूचितं पदार्थ
तावच्छेदकस्येति। एतेनैकत्रान्वितस्यापरत्रान्वयो न संभवतीति सूचितं नन्वेवमपि यत्र नेतरभेदस्तत्र न पृथिवीत्वमि
त्युदाहरणे न पृथिवीत्वाभावे साध्याभावव्यापकताबोधात्तत्र तादृशोपनयासंगतिर्दुर्वारैवेत्याशंक्यान्यादृशोदाह
रणस्थले तं संगमयति। एवमिति। यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणस्य निराकांक्षत्वादन्यादृशसाकांक्षोदाहरणे
तदसंगतिमाह। एवमपीति। आकांक्षितत्वेति तद्रूपावच्छिन्नहेतुकानुमितौ तद्रूपावच्छिन्नत्वविशेषिततदवच्छिन्नव
द्भेदे साध्याभावव्यापकताविषयकपरामर्शस्यैव जनकत्वादिति भावः। तादृशोपनयेति। पृथिवीत्वत्वानुपस्थापकोप
नयेत्यर्थः। अन्यथा येन रूपेण यस्य हेतुवाक्याद्धेतूपस्थितिस्तद्रूपावच्छिन्नत्वाविशेषिततदवच्छिन्नभेदे साध्याभाव
व्यापकताया एवाकांक्षितत्वोपगमे। यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणाद्दूरे इति शेषः। तादात्म्येनेति। न च पृथिव्या
एव हेतुत्वेपि पृथिवीभेदाभावस्य प्रतियोगितावच्छेदकपृथिवीत्वरूपतया कथं पृथिवीभेदाभावत्वेन पृथिवीभान

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

८७ मितिवाच्यम्।भेदाभावस्यप्रतियोगितावच्छेदकरूपत्ववत्प्रतियोगिरूपत्वस्यापिस्वीकारात्।अतएवमथुरानाथेना
87 पिअन्योन्याभावाभावस्यप्रतियोगिरूपत्वंस्वीक्रियतइतिनापसिद्धांतः।गंधवद्धेतुकोपनयंप्रदर्श्यगंधहेतुकंतमाह।
नचनान्नेति।नन्वेवमपिनचनेयंपृथिवीत्युपनयोःसंगतःसाध्याभावव्यापकतायाःबोधकशब्दाभावेनाभानादि
त्यतआह।अत्रेति।प्राचीनेति।यथान्वय्युपनेयंपक्षधर्मतामात्रंतथाव्यतिरेक्युपनेयमर्पितदेवेतिभावः।नव्यम
तेचव्याप्यःपक्षेवर्त्ततेनवेतिआकांक्षानुरोधेनव्याप्तिविशिष्टवैशिष्ट्यबोधकएवोपनयः।इदंतुबोध्यम्।स्वतंत्रेहे
त्वभावधर्मिकसाध्याभावव्यापकत्वाग्रहविशिष्टतदभाववत्ताग्रहद्वयसाधारणाकारेणतापाद्यव्यवस्थापनाद्धेत्व
मपि भावाभावःपक्षेवर्त्ततेनवेतिआकांक्षयैवनवीनानांदर्शितोपनयःसुवचइति।नन्वेंदीधितौसाध्याभावव्यापके वं
त्यसंगतमतआह।साध्याभावेति।उपलक्षणार्थकमिति।प्रतियोगितावच्छेदकाकोद्यप्रविष्टमुदाहरणार्थमात्रमित्य
र्थः।नञर्थेति।नचनेयंपृथिवीत्यादौनचपृथिवीनेयमितियोजनात्तत्रनचपृथिवीत्यत्रनञ्पृथिवीभेदोर्थःप्रथमां
अ तानुयोगिवाचकपदाभावात्तन्नेयमितिनञर्थोनात्यंताभावःसप्तम्यंतानुयोगिवाचकपदाभावादित्यर्थः।इदंतु
बोध्यं।नचनेयंपृथिवीत्यादावन्वयबोधनिराकरणेसंगतंप्रतियोग्यभावान्वयोस्तुल्ययोगक्षेमावितिस्युत्यत्तेः।इयं

म१

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नपृथिवीति प्रतियोग्यन्वयसत्वादभावान्वयरूपत्वाच्च। अतोनर्थांतरविशेषणतानापन्नान्योन्याभावबोधेन

न। न्नर्थांतरविशेष्यतापन्नसंसर्गाभावबोधेचोक्तेस्युत्पत्ती। अन्योन्याभावास्तताभावबोधेचान्योन्याभावप्रतियोगिवाच

कपदतद्दत्यंताभावानुयोगिवाचकपदयोः समानविभक्तिकत्वं। अत्यंताभावास्तताभावबोधेचात्यंताभावप्र

तियोगिवाचकस्यप्रथमांतत्वंतदत्यंताभावानुयोगिवाचकस्यसप्तम्यंतत्वंचावश्यकंतेननभूतलेघटःपृथिवी

नचनात्रगंधइत्युभयोर्नकोपिव्युत्पत्तिभंगः। अन्यथावक्तृतरनञ्द्वयप्रयोगव्याकोपापत्तेरितिदिक्॥ दर्शि

तव्युत्पत्तिः। उद्देश्यतावच्छेदकविधेययोरैक्येनशाब्दबोधइतिव्युत्पत्तिः। पक्षानिरूपितेत्यादि। यत्साक्षात्परं

परासाधारणपक्षविषयतानिरूपितत्ववद्विशेषणत्वंतद्भिन्नयल्लिंगविषयत्वंतच्छून्यत्वमर्थः। मनुपो

निरर्थकत्वपक्षेप्याह गंधसमानेति। तदानिगमने। अनतुषंगपक्षेपिसंबंधित्वेनपक्षभानात्तदुपन

यनिगमनयोरेकवाक्यतयैवबोधाच्च। अर्थत्वंकिमुपनयोपेक्षावीजं नहिव्यापकत्वनिरूपकतयाहेतु

विषयकत्वंतस्यापिपरंपरयापक्षविशेषणत्वात्। यदिनिरूपितनिरूपितमात्रसाधारणमेवपक्षनिरू

पितत्वंनत्वधिकंपरंपरासाधारणमपिनिवेश्यतइत्युच्यतेतदानिगमनेविशिष्टहेतुसंबंधभानेवैशि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्य घटकव्यापकत्वनिरूपकतया पक्षाविशेषणलिंगविषयतासत्त्वेनातिव्याप्त्यसंगतेः। तादृशलिंगविषयतायाव्यापकताघटकाधिकरणात्मकपक्षनिरूपितत्वात्तत्र तत्संगतिरित्युक्तौ चोपनयोपेक्षादुर्घटा एवमुक्तार्थकपक्षतावच्छेदकावच्छिन्नाविशेषणत्वरूपपक्षाविशेषणत्वरूपपक्षाविशेषणत्वोक्तावपि अधिकानधिकपरंपरानिरूपितत्वयोरेकतरनिवेशेऽनुषंगपक्षेनिगमनसंग्रहः उपनयपरिहारश्च नसंभवति। वस्तुतस्तु गंधव्यापकसत्तासमानकालीनरूपवतीतरेभ्यो भिद्यते गंधादित्यादिप्रतिज्ञासंग्रहाय यातिपरंपरासाधारणनिरूपितत्वानिवेशे तदुपेक्षादुर्घटैव एतेनान्वयव्याप्तिघटकहेतुसामानाधिकरण्यघटकहेतुविषयता तथाविधविषयताभिन्ने त्युपनयोपेक्षेत्यपास्तमिति मेवम्। अतिव्यापकं चोपनयस्येति यथाश्रुतग्रंथालोचनमेवेति। पक्षतावच्छेदकेति। पक्षतावच्छेदकविषयताद्विविधाविधेयधर्मितावच्छेदकता [redacted] चात्र प्रकारतावच्छेदकतान्येव [redacted]
प्रकारता
यः पक्षतावच्छेदकनिष्ठावच्छेदकतारूपप्रकारतानिरूपकविशेष्यतानिरूपितत्वात्। अत्र तद्व्यलिंगविषयतावच्छेदकताव्याप्तिनिवेश्यत्वे [redacted] ऽवच्छेदकतामादाय प्रतिज्ञापामव्याप्तेः [redacted] पक्षता परिणाय

धर्मिता २ अधिमयुक्तेः ३

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्वस्येति न च धर्मितावच्छेदकताप्रकारतयोरैक्यापत्तिः तद्यत्किंचिद्विशेष्यतात्वेन तन्निष्ठप्रकारतानिरूपितत्वानुपगमेनादोषादि। निवार्यगौरवापत्तेः ४
१ पक्षतावच्छेदकनि० अवच्छेदकतान्यप्रकारतानिरूपकविशेष्यतानिरूपितत्वान्नि० गमनाति व्याप्तिमाशंक्य तस्या २

वच्छेदकनिष्ठप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यधर्मितावच्छेदकताभिन्नलिंगविषयताशू
न्यत्वं म[redacted]र्थः। एवं[redacted]विशेष्यतावच्छेदकतावच्छेदकगंधत्वादावपि विषयताद्वयो[redacted]र्लिंगपदोपा बोध्यं २
दानं[redacted]विधेयप्रकारतामादाया संभववारणाय। विधेयप्रकारतायां[redacted]न परंपरानिरूपितत्वमपीत्या
ह। विधेयेति। न धर्मित्तेति। किंतु धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितैवेति शेषः। पक्षाविशेषणा
त्वं यथाश्रुतमित्यभिमानेन केषांचिद्दूषणमुद्धरति। एतेनेति।[redacted]निरवच्छिन्नविशेष्यतांस्वीकारेणो समा त्वर्थः
हितमिति। उक्तरीत्याप्रसिद्धोपनयवारणात्। ननु तादृशं[redacted]स्वीकारेऽत्ति व्यापकं चेत्युपनयात्तिव्याप्ति
प्रदर्शककरीषेत्यसंगतिरित्याशंकते। न चैवमिति। पक्षतावच्छेदकेति विधेयात्मकेत्यादिः। तथा च विधे
यवन्तद्धूमस्य पक्षतावच्छेदकतया पक्षतावच्छेदकनिष्ठप्रकारत्वेत्यनेन धूमनिष्ठविधेयतायाग्रहणा
संभवादिति भावः। एतेन स्वस्य शुद्धधर्मितावच्छेदकतावारकप्रकारताश्रयणेऽपि न क्षतिः। एवमुपनया
र्थघटकव्यापकताघटकसामानाधिकरण्यघटकधूमप्रकारतायाः पक्षतावच्छेदकनिष्ठप्रकारताप्र
वेशेनोपादानमाह। एवमिति। अत्र विधेयतान्यत्वं पक्षतावच्छेदकनिष्ठप्रकारतायां विशेषणं तेन विधेय

व्यवस्थाप्यपक्षाविशेषणत्वस्यानिरूपकार्थकत्व १
पक्षाविशेषणत्व २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धर्मितावच्छेदके तादृशाविनिवेशात् ×
न च तादृशप्रकारतान्यत्वं विधेयतायामव्याहतमिति वाच्यं विधेयताप्रकारतयोरेकविशेष्यतानिरूपितत्वेन तादृशविशेष्यतानिरूपकविषय
तान्यत्वस्यासत्त्वात् प्रयोजनं तु तदभावे न प्रतिबध्यकोटौ प्रकारताव्यापिनिवेशात् यस्य तत्र्धर्मस्य तावच्छेदकप्रकारतानिरूपि तत्समानि तानिरूपि

८९ 89 तान्यपक्षतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपकप्रकारतान्यत्वस्य विधेयतायामसत्त्वान्नातिव्याप्तिरिति
नग्रंथं। भट्टाचार्याणां मते प्रकारताविधेयतयोर्नाभेदः किंतु साहचर्यमात्रमित्यस्य पक्षतागंथे व्यक्तत्वात्। वि
धेयनिष्ठप्रकारताया अपि विधेयतान्यत्वात्। व्यतिरेक्युपनयेति। गंधवती तरेभ्यो भिद्यते गंधादित्यादावि
तरव्यापकीभूताभावप्रतियोगिगंधवतीयमिति वह्न्यभाववान् धूमाभाववान् वह्न्यभावादित्यादौ धूम
व्यापकवह्न्यभाववानयमित्याद्युपनयेत्यर्थः। एतेन एवमप्यादिना हेतोरन्वयव्याप्तिघटकत्वे पितस्य
पक्षाविशेषणत्वं निराकृत्यान्विप्युपनयातिव्याप्तिसंभवेन तथा च व्यतिरेक्युपनयपर्यंतानुसरणेऽपि
य थ्येमश्रद्धा वीजं बोध्यं। यत्तु किं तावत्पक्षाविशेषणत्वेन लिंगाविषयत्वं। न तावत्पक्षविशेषणतान्यलिं
गविषयत्वाभावः गंधवती तरेभ्यो भिद्यत इत्यादौ प्रतिज्ञायां पक्षविशेषणतान्यस्य गंधत्वांशे विशेष्य
त्वरूपलिंगविषयत्वस्य सत्त्वेनाव्याप्तितादवस्थ्यात्। प्रकारताविशेष्यत्वयोरेव मिथो निरूप्यनिरूप
कभावो न तु विशेष्यत्वयोरिति पक्षनिष्ठविषयत्वानिरूपितलिंगविषयत्वाभावस्यापि वक्तुमशक्य
त्वात्। नापि पक्षविशेषणतातिरिक्तं यद्धेतुतावच्छेदकधर्मावच्छिन्नविषयत्वं तदभावो र्थः उक्तमति

धर्मिवृत्तिपक्षतावच्छेदकर्मोपस्थितिरूपोऽपि नियामकइति ध्येयम्:

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ज्ञायांगंधत्वांशविशेष्यत्वस्यगंधत्वानवच्छिन्नत्वान्नाव्याप्तिरितिनशंक्यं।सुरभिगंधवतीतरेभ्योभिद्यतेगंधा

दित्यादौप्रतिज्ञायामव्याप्तेः।सौरभांशेगंधत्वावच्छिन्नविशेष्यत्वसत्त्वात्।प्रकृतपक्षविषयत्वा[redacted]व्यापकलिं

गविषयत्वाभावोर्थद्वयमपिनाप्रमेयत्वनिष्ठहेतुत्वंप्रमेयंप्रमेयादित्यादौहेत्वावतिव्याप्तेः।हेतुजन्यबोधीय

लिंगविषयत्वस्यपक्षविषयत्वाव्यापकत्वाभावात्।ज्ञानभेदेनविषयताभेदविरहात्।एवंदधिद्रव्य

मित्यादिप्रतिज्ञायामव्याप्त्यभिधानासंगतिश्च।पक्षविषयत्वाव्यापकत्वेसतिसाध्यविषयत्वाव्याप

कंयल्लिंगविषयत्वंतदभाववत्त्वात्।पक्षतावच्छेदकावच्छिन्नविषयतावच्छेदकताभिन्नंयत्साध्यताव

च्छेदकावच्छिन्नविषयतावच्छेदकताभिन्नंयल्लिंगविषयत्वंतदभाववद्द्वयमपिनसत्।अतिव्यापकंचोपनय

स्येतिग्रंथासंगत्यापत्तेरितिप्रकाशिकाकारेणमहताप्रबंधेनान्यथायितदप्येतेनपरास्तम्।नचतथा

पिप्रमेयत्वनिष्ठहेतुत्वंवाच्यंप्रमेयत्वादित्यादौहेत्वावतिव्याप्तिर्दुर्वारैवेतिवाच्यम्।हेतुवाक्यजन्यबो

धेहेतुप्रकारतायाहेतुत्वत्वावच्छिन्नविशेष्यतायाएवनिरूपितत्वेनतुहेतुत्वत्वप्रकारतानिरूपित

विशेष्यतायाइतिसामंजस्यात्।नचप्रमेयवद्वाच्यंप्रमेयादित्यादौहेत्वावतिव्याप्तिःप्रमेयविषयता

९० 90 याःपक्षतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपितप्रकारतान्यत्वाभावादिति वा व्यमाप्रकृतपक्षवि
शेष्यकत्वदलेन तद्वारणादिति। अथात्र गंधवती तरेभ्यो भिद्यत इत्यादि प्रतिज्ञा सुगंधत्वनिरूपितविशेष्यता
याःप्रकारत्वानन्यत्वमतेतदन्यत्वमुक्तं तथा च गंधवती तरेभ्यो भिद्यत इत्यादौ प्रकारताविशेष्यतयोर्भिन्नत्वम
तेत्तथाविधलिंगविशेष्यतामादाया व्याप्तिः तदनवच्छिन्नत्वनिवेशे च तथावि धर्म धर्मप्रकारतायाःप्रकारत्वा ध
ता नवच्छिन्नत्वदव्याप्तिः॥ वस्तुतो दंडिरूपवद्भूतलमितरेभ्यो भिद्यत इत्यादावव्याप्तिः पुरुषत्वावच्छिन्नविषयतायाः
पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वात्। अत एव तादृशप्रकारतान्यलिंगता
वच्छेदकावच्छिन्नविषयत्वविवक्षणेपि न निस्तारः मेव भूः गंधवतीत्यादौ पक्षतावच्छेदकवृत्तिप्रकारताया
एव निरवच्छिन्नविशेष्यत्वावच्छिन्नत्वं तन्निष्ठावच्छेदकतायास्तु गंधत्वनिष्ठावच्छेदकताकत्वमेवेति
~~त्वावच्छिन्नविशेष्यतायाअसत्त्वान्न दोषः~~ तादृशविशेष्यत्वं तद्वारणाय तादृशविशेष्यतानिरूपितप्र
कारतान्यत्वं तादृशप्रकारतात्वविशिष्टभिन्नत्वं वैशिष्ट्यं च स्वाश्रयत्वस्वाश्रयीभूतप्रकारत्वावच्छेदकविशे
त्वा ष्यतान्यतरसंबंधेनेति न दोषः। यथाश्रुतार्थे साक्षात्साध्यनिरूपितविशेषणतान्भिन्नत्वोक्तो वह्निकालीनद्रव्य
नेर ति एवं द्वितीयेदिप्रकारत्वं पुरुष त्वावच्छिन्नविशेष्यतावच्छिन्नत्वं तत्रोभयत्रय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

सामग्रीमान्वह्नेरित्यादावव्याप्तेः साक्षात्परंपरासाधारणनिरूपितत्वं निवेश्यं दर्शितार्थकत्वे च साध्यतावच्छे
दकघटकप्रकारतामात्रमेव साध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वं न तु त[illegible]दकविधेयम् द्घ
तत्पंचम्यंतार्थनिविष्टप्रकारतासु स्व[illegible]स्य स्व धर्मितावच्छेदकत्ववारणायांतराधर्मितावच्छेदकवृत्तिप्रका
रतानिरूपितविशेष्यतास्वीकारादिति नातिप्रसंगः सत्त्वादिति। यद्यपि पंचम्यर्थज्ञानज्ञाप्यत्वांशे धूमस्य वि
धेयतयोक्तयुक्त्या ज्ञाप्यत्वत्वप्रकारतानिरूपकविशेष्यतानिरूपितत्वं हेतुप्रकारतायां न संभवति तथापि
शान धूमज्ञाप्यत्वत्वप्रकारतानिरूपितविशेष्यतानिरूपितत्वे बाधकाभावाद्धूमानन्वितपंचम्यर्थाभानाद्वाति
व्याप्तिसंगतिः। एवं जन्यज्ञानविषय[illegible]साध्यकेऽपि बोध्यम्। पक्षनिष्ठाभावप्रतियोगित्वं न साध्येः बाधितत्वस
संभवात्। किंतु तादृशाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्त्वं एवं च धूमज्ञानज्ञाप्यत्वमात्रं न
तदुन्नायकं आलोकादिसाधारणतया तद्व्यभिचारित्वात्। अपि तु तद्विशिष्टवह्नित्वादिकमेवेति निगमने तद्वा
त्व नमेव स्वीकार्यं वह्नित्वाप्रवेशाच्च न वैयर्थ्यं। वह्न्यनुयोगिकत्वविशिष्टसमवायेन तद्विशिष्टधर्मः तादात्म्यसं
बंधेन तद्विशिष्टवह्निर्वा तदुन्नायकः। अथवा वह्नित्वेयाधेयताव्यक्तिस्तद्घटितसामानाधिकरण्यसंबंधेन तादृश

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अत्र वह्नित्वादिप्रकारघटकविषयतायां साध्यतावच्छेदकावच्छिन्नादिनिरूपितप्रकारतात्वस्येति पाठान्तरेप्येवमेव । विशिष्टहेतुविषयतावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतायाः आलोकादेर्व्याप्तिवारणाभावान्निगमनसामान्येतिव्याप्तिर्हिंसा । ३

५१ ज्ञाप्यत्वविशिष्टधर्मो वह्नित्वमेव तथा च निगमनसामान्येऽतिव्याप्तिरित्याह । एवमिति । साध्यतावच्छेदकावच्छि-

वह्नित्व न्नादिनिरूपितप्रकारकत्वस्येति । एतदुपादानं च विधेयकोटिप्रविष्टत्वेपि साध्यतावच्छेदकवृत्तिप्रकारताश-

७१ ब्देन विशिष्टवह्नित्ववृत्तिप्रकारताग्रहो मवत्येवेति सूचनाय । शुद्धेति । उक्तस्थले च साध्यरूपज्ञानविषयांशे

धूमादिस्यं तादृशधूमज्ञानजन्यज्ञानविषयत्वरूपधूमादिविशिष्टसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्य-

तानिरूपितत्वस्य हेतुप्रकारतायां सत्त्वान्न दोषः । शुद्धत्वं च यत्र यादृशं साध्यतावच्छेदकं तत्र तादृशत्वस्य यो मत्त्वं

फलतः प्रकारताविशेषणं तेन ज्ञानज्ञाप्यत्वरूपपञ्चम्यर्थैकदेशज्ञाने प्रकृत्यर्थान्वयपक्षेपि न क्षतिः । धूमज्ञान-

जन्यज्ञानविषयवान् धूमादित्यादौ निगमनेऽतिव्याप्तिस्तु न शंक्या निगमनजन्यबोधे व्याप्तिभानेन शुद्धसाध्य-

तावच्छेदकप्रकारकत्वात्तु तुल्यवित्तिवेद्यत्वादिना धूमे ज्ञापकताया अवगमात् कुतः इत्याकांक्षानुपगमाच्च प्र-

एकेति । द्रव्यत्वव्याप्यव्याप्यतया दाधित्वस्य मनस्त्वेन परमाणुवृत्तित्वं मूर्त्तत्वं तु न जातिरिति भावः । ननु निरुक्त-

पक्षाविशेषणत्वेन निरुक्तसाध्याविशेषणत्वेन च यल्लिंगप्रकारत्वं तद्भिन्नत्वस्य वाच्यत्वान्न दधिद्रव्यं दध्न

त्या इति दोषत्रयस्याप्यवकाश इति चेन्न । सिषाधयिषयान्यायप्रयोगोपगमे दधि दधिमत् दध्न इत्यादौ समवायेन

पदेन वारणात् ५

२१

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

साध्यसाधनभावेतथाविधसाध्यप्रकारतामादायाव्याप्तिः।तदनुपगमेपि कालिकसंबंधेनदधिनिसाध्येका
लिकसमवायेनयसामानाधिकरण्येनदधिनिहितावुक्तक्रमेणाव्याप्तिः।पक्षधर्मिकहेतुतावच्छेदकसंबंधेन
हेतुमत्ताग्रहस्यपक्षेसाध्यतावच्छेदकसंबंधेनसाध्यवत्तानिश्चयरूपसिद्धिभिन्नत्वादिति।ननुपक्षतेतिप्रका
शिकाकारेणेदंपूर्वमेवविवक्षितंतन्नचदधिद्रव्यमित्यादिग्रंथासंगतिरितिस्वयंतद्ग्रंथयोजयितेदमभिहितं[redacted]
[redacted] = [redacted]ानन्वनंतःपातित्व[redacted]मव्यापकत्वंतथाचप्रमेयत्वनिष्ठहेतुत्वंप्रमेयत्वादिस्यादौहेतावृत्तिव्याप्तिरिति प्रमेय
तथाचष्टोपक्षतावच्छेदकेति।नन्वयमभासोऽसंगतः।दधिद्रव्यमित्यादिस्थलत्रयेपिदधित्वादिप्रकारतानिरूपित
संसर्गतानिरूपकत्वस्यदधित्वाद्यवच्छिन्नविशेष्यतायाममसत्त्वादव्याप्तेरवारणादितिचेन्नदधित्वादिनिष्ठाव
च्छेदकत्वापेक्षयाप्रकारतायाः अवच्छिन्नविशेष्यत्वापेक्षया अनवच्छिन्नविशेष्यतायाश्चभिन्नत्वेपितत्प्रका
रतानिरूपकावच्छेदकतानिरूपकसंसर्गताव्यक्त्योर्भेदोनांगीक्रियतेतथाचतादृशसंसर्गतानिरूपकविषयता
भिन्नलिंगविषयताशून्यत्वमक्षतमेवेतितत्संगतिः।नचैवंस्वस्यधर्मितावच्छेदकत्वापत्तिः।अवच्छिन्नविशेष्य
तायास्तादृशसंसर्गतानिरूपितत्वादिवाच्यम्।तथासत्यपिधर्मितावच्छेदकप्रकारतानिरूपिताभावेनादोषा
ति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

९२ ता।अथवासंसर्गताव्यक्तिभेदेपितन्निष्ठोअवच्छिन्नविशेष्यतानिरूपकतावच्छेदकनिरवच्छिन्नविशेष्यतानिरूपक
92 तावच्छेदकधर्मौभिन्नौस्वीक्रियेते।तथाच॥धर्मितावच्छेदकनिष्ठप्रकारतायांअनवच्छिन्नविशेष्यतानिरूपकता
वच्छेदकधर्मावच्छिन्नसंसर्गतानिरूपकत्वस्यैवसत्त्वेननिरवच्छिन्नविशेष्यतानिरूपकतावच्छेदकधर्मावच्छि
न्नसंसर्गतानिरूपितत्वाभावान्नस्वस्यस्वधर्मितावच्छेदकत्वापत्तिः।तादृशधर्मश्चधर्मितावच्छेदकप्रकार
तानिरूपितत्वादिः।नचैवंपक्षतावच्छेदकावच्छिन्नविशेष्यताद्वाराहेतुविषयतायाअपितादृशसंसर्गतानि
रूपितत्वेनोपनयसामान्यनिगमनसामान्ययोरतिव्याप्तेःसंदर्भविरोधइतिवाच्यम्।तादृशसंसर्गतानिरूपि
तत्वस्यसाक्षान्निरूपितत्वरूपस्यनिवेशात्।गंधसमानकालीनरूपवतीत्यादौगंधादेःपक्षतावच्छेदकघट
कस्यापिपक्षतावच्छेदकत्वात्।अन्यथापक्षतावच्छेदकशब्देनपक्षतावच्छेदकघटकस्यैवविवक्षणादिति।व
स्तुतस्तुसंसर्गताभेदेपिनक्षतिः।धर्मितावच्छेदकघटकप्रकारतानिरूपितसंसर्गतानिरूपितसंसर्गपक
विषयतान्यत्वेसतिसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितसंसर्गतानिरूपकविषयतान्यत्वेसति
संसर्गतान्यायासाध्यतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपकविषयतान्यालिंगविषयतात

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

४=संयोगसंसर्गतावारणाय संसर्गतान्यत्वं गंधसमानकालीनेत्यादि संग्रहाय घटकपदं=

दन्यत्वं विवक्षितं। उक्तस्थले च दधित्वप्रकारतानिरूपितसंसर्गतानिरूपकविषयतादधित्वप्रकारतानवच्छिन्न
दधिविशेष्यता च तदन्या साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितसंसर्गतानिरूपकविषयता साध्यप्र
कारतापक्षतावच्छेदकीभूततदधित्वावच्छिन्नविशेष्यता च तदन्या च या लिंगविषयता तच्छून्यत्वमादाया
भासंसंगतिरिति दिक्। अतिव्यापकं चेतिप[illegible]ं। धूमवान्वह्निव्याप्यधूमवानित्युपनयेपक्षताव
च्छेदकप्रकारतानिरूपितसंसर्गत्वानिरूपकलिंगविषयत्वं केवलधूमइतिज्ञानीयमेव हेतुत्वंप्रमेयंहेतु
त्वादित्यादौ तादात्म्येन हेतौ नातिव्याप्तिः। तादात्म्येन व्याप्यत्वनंगीकारात् तद्धेत्वन्यत्वाभावाच्च। एतेन हेतुः प्रमे
यं धूमादित्यादौ पंचम्यर्थप्रकारको हेतुतन्मोबोधः प्रामाणिकस्तदा हेतावतिव्याप्तिः परास्ता। पक्षतेत्या
दि। गोत्वाभावादिपक्षकोक्तप्रतिज्ञासंग्रहाय प्रथमं निरूपितत्वांतं। उक्तवह्निसामग्री साध्यकाया आत्मा
ज्ञानवान् ज्ञानादित्यादिविषयतासंबंधेन ज्ञानसाध्यकायाश्च तस्याः संग्रहाय द्वितीयं तत्र। पर्वतो वह्निमान्
वह्निसंयोगादित्यादेः संग्रहाय वैशिष्ट्यनिवेशः। निरूपकत्वमिति वैशिष्ट्यविषयतानिरूपकत्वमर्थः गोत्वा
भावपृथिव्यादिपक्षकोक्तप्रतिज्ञायाः संग्रहाय साक्षात्परंपरयेत्युभयोपादानं। पक्षतेति। धर्मिताव

९२ च्छेदकताभिन्नत्वादिति भावः। कथंचिदिति। स्वनिरूपकविषयताद्वारा अग्निमरीत्या स्वतंत्रप्रकारताया अनुगमे
92 नवा। स्वनिरूपकत्वेति। स्वस्मिन्परंपरयापि स्वनिरूपकत्वानंगीकारात्। ननु लिंगतावच्छेदकावच्छिन्नविषय
ताप्रवेशपासंसर्गतावच्छेदकसंयोगत्वादेरमानान्नदोषः। यदि अवच्छेदकावच्छेदेन वह्निसाध्यकप्रतिज्ञायांप
लिं क्षतावच्छेदकव्यापकतावच्छेदकसंसर्गतावच्छेदकरूपलिंगतावच्छेदकं भासते तदा विषयतावच्छेदकता
पर्याप्तिर्निवेश्येत्यत आह। एवमिति। पर्वतो वह्निमान् वह्निसंयोगादित्यादावव्याप्तिमुद्धरतां मतमाह। एतेने
ति। तादृशनिरूप्यनिरूपकभावस्य दुर्वचत्वेनेत्यर्थः। तत्र तादृशवैशिष्ट्यविषयतानिरूपकत्वं चाननिस्ता
रइति। विषयत्वानिरूपितेत्यत्र निरूपित निरूपितत्वादिप्रवेशे पृथिव्यादिपक्षकप्रतिज्ञायां साक्षान्निरूपि
तत्वप्रवेशे गंधसमानकालीनरूपवदादिपक्षकप्रतिज्ञायामव्याप्तिरित्यर्थः। तथाविधेति। अवच्छेदकत्वंस्व
रूपसंबंधविशेषः। अत्र तथाविधवैशिष्ट्यविषयत्वावच्छिन्नप्रतिबंधकताप्रवेशे निश्चयत्वाद्यनिवेशेन लाघ
वेपि अधिकं त्विति न्यायेन लिंगमानेपि वैशिष्ट्यविषयतावच्छिन्नायाः पक्षस्तस्माद्वह्निमान्नवेति संशयप्रति
बंधकतायाः अवच्छेदिकैव लिंगविषयतेति निगमनात्तिव्याप्तेः। ननु धूमादालोकवानित्यादावव्याप्तिः हेतु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्वंधूमीयंनवेतिसंशयप्रतिवंधकतायांवैशिष्ट्य।विषयतानवच्छिन्नत्वेपिलिंगविषयतायांपक्षोवह्निमान्न
वेतिसंशयप्रतिवंधकतावच्छेदकत्वसत्वात्।एवंतादृशनिश्चयत्वव्याप्यप्रतिवंधकतानिवेशेधूमज्ञानज्ञा
प्यवह्निमान्नवापर्वतइतिसंशयप्रतिवंधकतायास्तादृशनिश्चयत्वव्याप्यतयातदनवच्छेदकीभूतलिंगवि
षयताशून्यत्वाद्धूमादायनिगमनेऽतिव्याप्तिरतोव्यापकत्वनिवेशइत्याहनिगमनइति।नचतदनवच्छिन्नप्र
तिवंधकतावच्छेदकत्वंवहिर्भावःकुतोनोक्तइतिवाच्यम्।स्वरूपसंवंधरूपावच्छिन्नत्वप्रवेशेधूमादालो
कवान्पर्वतइत्यादावव्याप्तेः।नचतादृशवैशिष्ट्यविषयतांतःपातिविषयतावच्छिन्नत्वनिवेशेननिस्तारः
तत्रैवहेतावतिव्याप्तेः।एतेननतादृशनिश्चयत्वाव्यापकप्रतिवंधकतायास्तादृशनिश्चयत्वाव्यापकत्वेसति
तादृशनिश्चयत्वाव्याप्यप्रतिवंधकतायाश्चनिवेशोऽपास्तः।तादृशनिश्चयत्वव्यभिचारिप्रतिवंधकतानि
वेशेतुधूमादालोकवानितिप्रतिज्ञायामव्याप्तिः।हेत्वन्यत्वनिवेशस्यान्यूनानतिरिक्तविषयकांतभागत्या
गपक्षीयत्वादेतत्पक्षेसमव्यापकत्वमभिप्रेतंतत्रव्याप्यत्वोपादानप्रयोजनमाह।तादृशनिश्चयत्व
व्यापकत्वमात्रस्येति।तादृशोधूमादिरूपः।तथापीति।निगमनघटकतच्छब्दस्यलिंगमात्रपरत्वंसाध्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धूमादृशोकवानिसादेवालोकोधूमज्ञानज्ञाप्यो न वेति संशयस्य न हेतुत्वं धूमीयं न वेति ज्ञानोकनिष्ठविशेष्यकसंशयस्यापि प्रतिबंधकतायाव्या
पकत्वेपि निधेयकोटिप्रविष्टवह्निनिष्ठधूमज्ञानज्ञाप्यत्वविषयता तदवच्छेदिके न समानाविषयकत्वेन प्रतिबंधकतामतेरिति तदुपेक्षा १ निगमसे—

९४ वदन्यावृत्तित्वरूपाव्याप्तिस्तद्घटितकेति वाऽभिप्रेत्येदमतिव्याप्त्यभिधानम्॥ ननु वह्निधूमज्ञानज्ञाप्यइतिनिश्चये
94 पि वह्निर्व्याप्तिविशिष्टपक्षधर्मताविशिष्टधूमज्ञानज्ञाप्यो न वेति संशयो जायते तदुच्छेदाय च तस्माद्वह्निमानि
ति तत्पदस्य व्याप्त्यादिविशिष्टार्थकत्वमावश्यकं तथा च व्याप्तिघटकधूमाधिमौ करणेत्वत्र धूमविषयत्ता
यास्तद्भिन्नतया नातिव्याप्तिरितिकृद्भिस्तत्पदस्य व्यापकसामानाधिकरण्यरूपव्याप्यत्वविशिष्टहेतुपर
तायाएवावलंबनीयत्वादित्यत आह। हेतुत्वमितीदमुपलक्षणं। प्रमेयाद्यव्यत्वसमानाधिकरणज्ञे
यत्वादेः साध्यत्वेऽुक्तहेतुरपि बोध्यः। यद्यपि समव्यापकत्वमपेक्ष्य लाघवात्तादृशनिश्चयत्वपर्याप्ता
वता वच्छेदकताकप्रतिबंधकतैव प्रवेश्या तथापि निगमादिवारणसंभवात्त। अत्रावच्छेदकावच्छेदेन साध्यवत्ता
निश्चयत्वपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितविशेषणतासंबंधावच्छिन्नसाध्याभावप्रकारताशू
न्यत्वे सति तादृशविशेष्यतानिरूपितपक्षतावच्छेदकव्यापकताविशिष्टसाध्यतावच्छेदकसंबंधावच्छि
न्नसाध्यप्रकारताशालिज्ञानत्वं सामानाधिकरण्येन साध्यवत्तानिश्चयत्वं च तादृशविशेष्यतानिरू
पितपक्षतावच्छेदकव्यापकत्वविशिष्टविशेषणतासंबंधावच्छिन्नसाध्याभावप्रकारताशून्यत्वे सति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१७५
तादृशविशेष्यतानिरूपितसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यप्रकारताशालिज्ञानत्वं। ननु स्मानवच्छि
न्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वस्वसमानाधिकरणत्वोभयसंबंधेन विषयिताविशि
ष्टविषयिताशून्यत्वं। एकधर्मिकविरुद्धकोटिद्वयप्रकारकान्यज्ञानत्वं वानाहार्यत्वानिवेशेन लघु। तत्रस्व
रूपसंबंधरूपावच्छेदकत्वाभावात्। न च तार्णवह्न्यादिसाध्यकप्रतिज्ञायामव्याप्तिः तादृशनिश्चयत्वस्य
तार्णवह्निमान्वह्निसामान्याभाववान्वेति संशयसाधारण्यात्। पर्याप्तिमप्रवेश्य साध्यतावच्छे
दकावच्छिन्नप्रतियोगिताकाभावनिवेशे पर्वतस्तार्णवह्निमानतार्णवह्निमान्न वेति निश्चयासंग्र
हः। साध्यतावच्छेदकान्यधर्मानवच्छिन्नाभावनिवेशे तु ततः पर्वतस्तार्णवह्निमानभावांश्चेति निश्चया व
संग्रहादिति वाच्यम्। निश्चयविशेषे सामान्याभावाप्रकारकत्वस्यापि निवेशात्। भेदादिकोटिकसंशयवा
ध रणांत्वं म्। साध्यवत्तानिश्चयस्य निवर्त्यत्वे सति निवर्त्तको यो निश्चयस्तद्विषयतावच्छेदकं यद्रूपावच्छि
न्नाभावत्वं तद्रूपावच्छिन्नाभावत्वावच्छिन्नाप्रकारकत्वं वानुगतं निवेश्यं। एवं साध्यविशिष्टशुद्धपर्वतावगाह्य
नवगाहिनोः नीलपर्वतो वह्निमान्न वेति संशययोः संग्रहासंग्रहप्रकारः परिचिंतनीयः। वैशिष्ट्यपदोपा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

९५ 95 दानेन च तादृशवैशिष्ट्यविषयताघटितनिश्चयत्वस्य तत्र तत्र नालाभस्तथापि पर्याप्त्यर्थपर्यालोचनायां म
हागौरवं द्रष्टव्यं किंच स्वसमसाधारणधर्मस्यैव पर्याप्त्यधिकरणतया तन्निवेशे ह्रदो वह्निमानित्यादावव्या
प्तेः साध्यवत्त्वस्य व्याप्यादिज्ञानवृत्तित्वस्य प्रतिबंधकतायां निवेशे महागौरवम्। अत्र पर्वतो धूमाद्वह्निमानि
ति प्रतिज्ञायामव्याप्तिः। धूमाद्वह्निमान्न वह्निसामान्याभाववान्न वेति संशयानुरोधेन तादृशनिश्चयत्वावच्छे
रसत्वादि दकतापर्याप्तिविरहेण तिनशूंकंपधूमाद्धूमाव विशिष्टबुद्धिप्रतिबंधकतामादाय पर्याप्त्युपपत्तेः। अ
त्रेदं चिंत्यते। समनैयत्योपादानेपि हेतुत्वं वह्निमद्धेतुरित्यादौ हेतुवारणायेन कल्पे हेतन्यत्वमावश्यकं तेने तथा च
वोक्तहेतुवारणात्तु व्याप्यत्वविवक्षणं व्यर्थं तथा च साध्यविशिष्टपक्षविषयकनिश्चयत्वव्यापकत्वमा
पक्ष त्रनिवेशेनैवोपपत्तौ योग्यतापि न विवक्षणीति। इदं पुनरिहावधेयं। पक्षतावच्छेदकावच्छिन्नविशेष्य
तानिरूपितसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतासामान्यावच्छिन्नप्र
तिबंधकत्वेव निवेश्या। तावतैव दर्शितहेतुनिगमनयोर्वारणसंभवान्निश्चयत्वानिवेशलाघवं दुर्वा
रं। प्रकृतसाध्यविशिष्टप्रकृतपक्षविषयतासामान्यावच्छिन्नत्वं वा विवक्षणीयमिति न योग्यतानिवे

यासमनैयत्यपक्षे साध्यविशिष्टपक्षविषयकत्वनिवेशासंभवेन साध्यवत्पक्षावगाहित्वस्य घटकनिवेशापत्तेरि ४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग्रः हि तु त्वं वह्निमद्ध्रद इत्यादौ दोषस्तु समानमिति। न प्रतीति। केवलगंधवतीति ज्ञानस्य कुत्राप्यप्रतिबंधक
त्वात्। तदिति। ग्रहत्वेत्यर्थः। प्रकारांतरं चाह स्वधर्मितावच्छेदकत्वं स्वप्रकारता निरूपितविशेष्यतानिरू
पितस्वान्यवृत्त्यवच्छेदकत्वं स्वप्रकारतानिरूपितत्वावच्छेदकावच्छेदकता त्वाश्रयवृत्तित्वं वा निरूपितत्व
स्याव्याप्यवृत्तित्वेन स्वनिष्ठप्रकारतात्वेनैव तादृशविशेष्यतानिरूपितत्वं न तु तत्त्वावच्छेदकतात्वेनेति।
स्वप्रकारतानिरूपितत्वेन स्वावच्छिन्नविशेष्यतात्वस्य नावच्छेदकभावइति बोध्यं न च स्वस्य स्वधर्मितावच्छेद्य
च्छेदकत्वोपगमे को दोषइति चेत् इच्छासत्त्वे ग्रहत्वं घटवदित्यादितो ग्रहत्वं ग्रहत्वं न वेति संशयापत्तेः
अस्माकं तु सामग्रीघटकबाधनिश्चयासत्त्वान्न दोषः। ततो ग्रहत्व लिङ्ग ग्रहत्वत्वप्रकारकज्ञानानुव्यव
सायापत्तेश्च। ननु यदि धर्मितावच्छेदिकायाः प्रकारतारूपत्वं तदोद्देश्यतावच्छेदकतानिरूपकसंसर्ग ता ४
तानिरूपकविषयतान्यत्वे[illegible]साध्यतावच्छेदकनिष्ठविधेयतावच्छेदकतानिरूपकसंसर्गतानि
५ रूपकविषयतान्यत्वे सति संसर्गतान्यलिङ्गविषयताशून्यत्वमेवास्तां वह्निमत्त्वानिवेशेन लाघवा
त्। उद्देश्यताविधेयतावच्छेदकते साक्षात्परंपरासाधारणे। संसर्गतानिरूपकत्वं तु साक्षादेव। अन्यथा

मतानिमत लत्वरूपबाधनिश्चयवशात्तद्ध निष्ठावच्छेदक ४

५ इच्छाप्यसत्त्वे तादृशबाधवशाद्ग्रहसंशयानुपपत्तिस्त ... ५

४ ग्रहत्वत्वव्यावर्तकधर्मदृशायामनुग्रहतानानुपपत्तेश्च ४

CC-0 Dharmartha Trust J&K: An eGangotri Initiative

२६ निगमनजबोधीयलिंगविषयतानांविशेष्यतादिद्वारातन्निरूपकतयावह्निमत्त्वानुपपत्तेः।गंधवतीगंधसमा
96 नकालीनरूपवतीत्यादेः दधिद्रव्यंदभ्रइत्यादेश्च संग्रहायप्रथमंसत्यंतं ताहृशसंसर्गतानिरूपकत्वस्यावच्छे
दकताविशेष्यतयोःसत्वात्प्रकारतामादायाव्याप्तिवारणायावच्छेदकताप्रकारतयोरैक्यमतावलंबः।
वह्निसामग्र्यादिसाध्यकप्रतिज्ञासंग्रहायद्वितीयसत्यंतं।तत्रनिगमनेज्ञानज्ञाप्यत्वविशिष्टवह्नित्वादेर्विधेय
तावच्छेदकतयाः तिव्याप्तिरतः साध्यतावच्छेदकनिष्ठेति।एवंचकपालंघटवत्घटादित्यादौकालिकसम
वायसंबंधाभ्यांसाध्यसाधनभावेप्रलयः प्रलयत्वादित्यादौकालिकदैशिकविशेषणताभ्यांचतत्रना
व्याप्तिः।साध्यविधेयतायाः संसर्गतानिरूपकत्वात्।पर्वतोवह्निमान्वह्निसंयोगादित्यादावव्याप्तिरतः गा
संसर्गतान्यत्वनिवेशः।वस्तुतःशाब्दबोधेवह्निमतोऽभेदइतिसिद्धांतितत्वात्पक्षांशेऽभेदसंबंधेनविशे
षणतापन्नांशेविषयतान्यत्वंविवक्षणीयं।एवंपृथिवीतरेभ्योभिद्यतेइत्यादेः संग्रहाययादृशपक्षसा
ध्यकप्रतिज्ञायद्रूपाद्यवच्छिन्नयद्रूपावच्छिन्नबोधिकातद्रूपनिष्ठत्वंसाध्यतावच्छेदकनिष्ठत्वशब्देन
विवक्षणीयं।अत्रैवसकलप्रतिज्ञासंग्रहः।तत्तद्रूपनिष्ठविधेयतावच्छेदकतानिरूपकसंसर्गतानि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

अखंडाभावघटकतयालिंगनिवेशे तु तत्सार्थक्यमित्याह ताद्दशेति· कल्पांतरमवतारयति उक्तेति · विद्धेषादिति· उत्तरकल्पे वह्निर्मत
त्वांतापूरणे न तन्निर्वचनायासो नेति भावः ॥५

रूपकविषयतान्यत्वकूटनिवेशात्। एवं च धूमवान् वह्निव्याप्यधूमवानित्युपनयेपि नातिव्याप्तिरिति मे
तथा वम्। अ[redacted]निवेशस्य साक्षात्परंपरासाधारणनिरूपितत्वे [redacted]पणगमत्वात्। ननु दृ
निरुक्तविषयतावह्निर्मत विषयताशून्यत्वोक्तेव सामंजस्ये लिंगपदं व्यर्थमित्यत आह। ताद्दशेति। अनुमि
तीति। पक्षमुख्यविशेष्यत्वरूपेत्यर्थः। वैपर्थ्येति। ह्रदो निर्धूमो निर्वह्नित्वादित्यादावुक्तोदाहरणे बोधस्य निरु जन्य
क्तप्रतिबंधकतानवच्छेदकविषयिताशालित्वेन वारणासंभवात्। लिंगत्वं हेतुत्वं तच्च व्याप्तिपक्षधर्मताव रेवनतुव्या
त्त्वं तु दारणाजन्यबोधे पक्षधर्मत्वाभानादित्याशयेनाह। व्याप्तिरिति। विद्धेषादिति। उत्तरकल्पे वह्निर्मत्वां प्ति५
तापूरणे न तन्निर्वचनायासो नेति भावः। अखंडाभावघटकतया लिंगनिवेशे तु तत्सार्थक्यमित्याह। ता
दृशेति। कल्पांतरमवतारयति उक्तेति। ननु व्याप्त्यविषयकत्वनिवेशेऽन्वय्युदाहरणेऽतिव्याप्तिः। ए[redacted]कल्पे त
पक्षविशेष्यकत्वासत्त्वादत आह। तद्धटकेति। असंभवकारणाय व्यावर्त्तितं तद्वैलक्षण्यं हेतुगर्भं। गमक
त्वमनुमितिजनकत्वं औपयिकत्वमवच्छेदकत्वमित्याशयेनाह। न तावदिति। एतत्कल्पे पक्षमुख्यविशे तत्रेति
ष्यकत्वस्यानिवेशनीयत्वात्। पक्षेत्यादिकथनं ताद्दशविषयतायां अतिरिक्तत्वसूचनाय॥ किंचिदिति। पर्व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यच्छेदकता

२८ ९१ तआलोकव्यापकद्रव्यकालीनवह्निमान् आलोकव्यापकद्रव्यवान् पर्वतो वह्निमानित्यादावित्यर्थः। ननु तथापि चतु
र्थविषयतानिरूपितयद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नव्यापकत्वावगाहित्वं प्रकृतानुमितिजनक
तानतिरिक्तवृत्तितदवच्छेदकं वा तद्रूपावच्छिन्नविषयतानिरूपितद्रूपावच्छिन्नव्यापकतानवगाहित्वं विवक्षि
तं। वह्निर्धूमव्यापक इति ज्ञानमादाय तादृशव्यापकतावगाहिताया अतिरिक्तवृत्तित्वेपि तादृशविषयतानि
रूपितत्वेन विशेषणीयत्वान्न दोष अत आह। यत्र तत्त्वेति। पक्षतावच्छेदकावच्छिन्ने त्यादि। यत्तु विशेषण
विधयेत्यस्यानुपादानेपि तादृशानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मानुगमः कार्य
इति तन्तुच्छं तथासत्तिपक्षादिविषयतानिरूपितत्वसहितहेतुव्यापकसाध्यविषयतात्वस्यैव तादृश
पर्याप्त्यधिकरणतयोदाहरणेऽतिव्याप्तेर्वज्रलेपत्वात्। अस्माकं तु चतुर्थविषयतानिरूपितत्वविशिष्टं
शेविशेषणतापन्नत्वलाभान्न दोषः। चतुर्थविषयतानिरूपितत्वस्य स्वविशिष्टांशेः वि शेषणत्वा
त्। चतुर्थविषयतानिरूपितत्वहेतुव्यापकत्वविशिष्टसाध्यादिविषयतात्वयोर्धर्मितावच्छेदकप्रका
रभावापन्नयोरेवावच्छेदकत्वावच्छेदकतया धर्मितावच्छेदकव्यावृत्तप्रकारतापन्नधर्मनिष्ठपर्या-
ता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ष्टिरेवानुगमघटिकानतु तत्साधारणधर्मनिष्ठपर्याप्तिरितिसूचनायवाविशेषणविधेयेति। एतच्चजनकता
वच्छेदकविषयतावृत्तेरेवजनकतावच्छेदकतावच्छेदकत्वादितिनियममनुरुध्य। वस्तुतस्तुजनकतावच्छेदकता
याइत्येवपाठः। तादृशविषयतावृत्तेरेवजनकतावच्छेदकतावच्छेदकत्वादितिचनियमः। अतएवव्याप्यपक्षोन
यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतायाअवच्छेदिकाज्ञानवृत्तिर्जातिरित्यनुमि
तिलक्षणेस्वावच्छिन्नविधेयकत्वादिरूपपरंपरायाःसंबंधत्वेमानाभावान्नवह्नित्वादेःकार्यतावच्छेदकत्वमि
तिज्ञानवृत्तित्ववैयर्थ्यमाशंक्यजन्यतावच्छेदकविषयतावृत्तेरेवधर्मस्यविषयताविशेषणतयाजन्यतावच्छेद
कत्वमितिनियममनुरुध्यवह्नित्वादिवारकतयातत्सार्थक्यमुक्तं। एवंकार्यताग्रहीयस्वसमानाधिकरणविषयतैक्य
मेवकार्यतैक्यनियामकं। अनुमितिःपरामर्शकार्येतितद्ग्रहेऽनुमितिनिष्ठविषयतैक्याच्चतदैक्यमितितत्रैवोक्तत्वा
त्तद्रीत्याग्रहाधिकारणतैक्यंवोध्यं। तदीयविलक्षणावच्छेदकतासामानाधिकरण्यंचतदवच्छेदकतानियामकमि
तिनासिद्धिः। तदीयावच्छेदकतासामानाधिकरण्यमात्रनिबंधनायांचतदवच्छेदकतायांनधर्मस्यान्यूनानतिरिक्तव
त्त्वापेक्षा। अतथात्वेतायांचतदपेक्षेतिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेननविशेषण

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

९८ माचानुगमङ्गस्ततोपितथाविधपर्याप्त्युपेक्षावोध्या। ननु संसर्गविषयतायाः पंचमीविषयतामध्ये निवेशे व्य
हे तिरेकिपरामर्शीयसाध्याभावव्यापकत्वभानविषयतायाः पंचमीत्वानुपपत्तिः। तन्निवेशेऽन्वयपरामर्शी
98 यहेतुव्यापकसाध्यविषयतायास्तदनुपपत्तिरित्यत आह। प्रकृतेति। तथा च व्यतिरेकव्याप्तिस्थले धूमपर्वतयो
योः संयोगस्तन्निष्ठविषयतामंतर्भाव्य पर्वतविषयतानिरूपितसंयोगविषयतानिरूपितहेतुविषयतानिरूपित
ति संयोगित्वविषयतानिरूपितताहृशहेत्वभावविषयता पंचमी॥ अन्वयव्याप्तिस्थले तु संयोगविषयताम
नंतर्भाव्य ताहृशसाध्यविषयता पंचमीत्यर्थः। व्यतिरेकिपरामर्शीयविषयतायाश्च तु र्थे विषयतानिरूपि
तत्वेऽन्वयपरामर्शीयविषयतायास्तन्निरूपितत्वं दृष्टान्तः। तेन विनिगमनाविरहेण पक्षविशेष्यतानिरूपि
तसांसर्गिकविषयतानिरूपितहेतुविषयतेत्यादिक्रमेण तद्विशेष्यतानिरूपितहेतुतावच्छेदकसंबंधा
वच्छिन्नहेतुविषयतेत्यादिक्रमेण च कार्यकारणभावाद्द्वयोरपि पंचमीत्वोपपत्तिः। एवं स साध्येयताविष
यताया अनुगमापत्तिरिति चेन्न काक्षतिः। प्रतिज्ञाजन्यबोधे तदभानात्। प्रमेयत्वव्यापकवाच्यत्वसमाना
धिकरणधर्मवान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तेः। धूमव्यापकवह्निसमानाधिकरण

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धूमवान् प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवान् पर्वत इति परामर्शीयपक्षतावच्छेदककोटि
प्रविष्टपंचमविषयतांशे विशेषणविधयाऽनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणं प्रमेयत्वव्या
पकवाच्यत्वविषयतात्वं तद्दृष्टिविषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वादिति पक्षतावच्छेदकावच्छिन्नत्वनिवेशः। तत्रा
पि पक्षतावच्छेदकनिष्ठावच्छेदकत्वमादाय तद्दोषतादवस्थ्यवारणाय पक्षविषयतानिरूपितावच्छेदकता
त्वविषयतालाभार्थं तन्निवेशः। यदि तु पक्षतावच्छेदकप्रकारतायां पक्षतावच्छेदकावच्छिन्नत्वविशिष्टवि
शेष्यतानिरूपितत्वं नांगीक्रियते। अन्यथा स्वस्य धर्मितावच्छेदकतापत्तेः। किंतु हे[illegible]त्वादिप्रकारतायामिव त
दा तथैव विवक्षणीयं न तु अवच्छेदकतान्यत्वमिति। यत्तु पर्वतत्वव्यापकद्रव्यत्ववान् पर्वतो वह्निमान् धू
मादित्यादौ वह्निव्याप्यधूमवत्पर्वतत्वव्यापकद्रव्यत्ववत्पर्वतकालीनो यमिति ज्ञानमादाय अव्याप्तेः पक्ष
तस्य तावच्छेदकावच्छिन्नत्वमुक्तमिति तन्न। पक्षमुख्यविशेष्यकत्वाभावेनाजनकत्वात्। एवं धूमव्यापकस
मानाधिकरणधूमवान् पक्ष इति ज्ञानस्याजनकत्वात् न पर्वतो धूमव्यापककालीनवह्निमानित्याद्य
संग्रहः। अथैवमपि उक्तस्थले पक्षविषयतानिरूपितावच्छेदकतान्यसंसर्गविषयतानिरूपितधर्मविष

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

९९ यतानिरूपिताधेयत्वविषयतानिरूपितविषयतायां पंचम्यां प्रमेयत्वव्यापकवाच्यत्वाधिकरणविषयताव

मितित्त्व द्वद्विषयतावत्त्वेन व्याप्तिरेव। एवं प्रमेयत्वव्यापकवाच्यत्ववत्ज्ञेयत्ववदभिधेयत्ववत्पर्वतो वह्निमानि

99 त्वा त्यादिप्रतिज्ञायां अवच्छेदकं न्यूनसंसर्गविषयतामादाय मेयत्वव्यापकवाच्यत्वविषयतापंचम्येवेत्सव्या

प्तिः। न च द्वितीयविषयतायां संसर्गतान्यत्वं निवेशयितुं शक्यते व्यतिरेक्युदाहरणातिव्याप्तेः। व्यतिरेकव्याप्ति ह

घटकप्रतियोगित्वस्य संसर्गत्वात्। चतुर्थविषयतायामभाववृत्तित्वकल्पे संसर्गीभूतप्रतियोगित्वविष

वार् यतामपरिगृह्य चेदर्थं तेतदावत्यभावव्यापकमेयत्वं पर्वतो वह्निमानिति प्रतिज्ञाव्याप्तेः। एतेन पक्षताव

च्छेदकताघटकसंसर्गीयसंसर्गतान्यत्वोक्तावपि न निस्तारः। यत्र पक्षतावच्छेदकहेत्वोरेक एव संसर्गस्तत्र

वारणा व्यतिरेक्युदाहरणादिति चेन्न। अवच्छेदकतानिरूपितसंसर्गतान्यत्वोपादानात्। धूमवान् वह्न्यभाव

व्यापकीभूताभावप्रतियोगिधूमवानित्यादिपरामर्शे अवच्छेदकतानिरूपितप्रकारतानिरूपितसंसर्गत

योर्भेद एव। न च प्रमेयत्वव्यापकवाच्यत्ववद्घटकालीनपर्वतो वह्निमान् प्रमेयत्वव्यापकवाच्यत्ववज्ज्ञे

यत्ववद्धूमादित्यादौ नीलधूमत्वादेर्हेतुतावच्छेदकतामते प्रतिज्ञायामव्याप्तिः वह्निव्याप्यतथाविधधू

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

मवान्पक्षइतिपरामर्शीयपक्षविषयतानिरूपितावच्छेदकत्वान्यधूमविषयतानिरूपितसंसर्गविषयता
निरूपितज्ञेयत्वविषयतानिरूपितप्रमेयत्वव्यापकवाच्यत्वविषयतायाःपंचमीत्वादितिवाच्यम्।तृतीय
तुरीयविषयतयोरवच्छेदकतान्यत्वोपादानात्।परन्तुप्रमेयत्वव्यापकवाच्यत्ववद्वह्निकालीनह्रदोनिर्धूमो
मेयत्वव्यापकवाच्यत्ववद्वस्त्वभावादित्यादौप्रतिज्ञायांधूमव्यापकतथाविधवस्त्वभाववान्पक्षइतिव्यति
ते रेकपरामर्शीयपक्षविषयत्वादिक्रमेणप्रमेयत्वव्यापकवाच्यत्वविषयतायाःपंचमीत्वादव्याप्तिरतःचतुर्थवि
षयतायांव्यापकत्वविषयत्वानिरूपितत्वंदेयंतथाचपक्षविषयतानिरूपितसंसर्गविषयतानिरूपित
हेतुविषयतानिरूपितप्रतियोगित्वविषयतायाश्चतुर्थ्याःव्यापकत्वविषयत्वानिरूपितत्वेपंचम्याव्या न
पकतादृशविशिष्टवह्निविषयतायाअसत्त्वान्नाव्याप्तिरितितन्न।अभावावृत्तित्वकस्यआलोकवह्निका व्यापक
लीनह्रदोनिर्धूमआलोकव्यापकवस्त्वभाववादित्यादौद्वितीयहेतुविषयतामादायाव्याप्तितादवस्थ्यात्
ता अननुगुरुधर्मस्यप्रतियोगितानवच्छेदकतयादृशवस्त्वभावरूपहेतुरेवाप्रसिद्धइतिबोध्यम्।उक्तरीत्या
नुपमेयपुदाहरणेऽतिव्याप्तिमाशंकते।यद्यपीति।अनिरूपितान्तंहेतुगर्भम्।धूमव्यापकवह्निसमाना

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पप=१

१०० धिकरणधूमवान्पक्ष इत्येवजनकज्ञानंतत्रपरंपरयापक्षविशेष्यतानिरूपितायाहेतुव्यापकताविशिष्टसाध्या
दिविषयतायाजनकतावच्छेदिका।तोमहानसंधूमवद्धूमव्यापकवह्निमन्महानसान्यच्च धूमवद्धूमव्यापकव
पय= ह्निमच्चेत्युदाहरणार्थबोधीयासामानावच्छेदिकापक्षविशेष्यतया।निरूपितत्वादितिभावः।तन्निरूपितेतिप
100 क्षविशेष्यतानिरूपितसाध्यविषयतानिरूपितेत्यर्थः।व्यापकत्वविषयतापरामर्शीय[redacted]त्वविषयतान याः
[redacted]अनतिरिक्तत्वसंबन्धेन तद्विशिष्टसाध्यविषयतायाजनकतावच्छेदकप्रवेशशंकावारणाय।तदीयेति
उदाहरणजन्यबोधीयेत्यर्थः।तन्नेति।नच हेतुव्यापकताविशिष्टसाध्यादिविषयतात्वंपरामर्शीयविशिष्टसा
ध्यविषयतावृत्तिअनुमितिजनकतानिरूपितनिरुक्तावच्छेदकतापर्याप्त्यधिकरणंतच्चोदाहरणजन्यबो
धीयविशिष्टसाध्यादिविषयतासाधारणमेवविशिष्टसाध्यादिरूपविषयाभेदादितिवाच्यम्।तमात्म
कपरामर्शसाधारण्यायतादृशविशिष्टघटकत्वतत्पदार्थविषयताकूटस्यैवपरस्परनिरूप्यनिरूपक
भावापन्नस्यजनकतावच्छेदकेनिवेशनीयत्वात्।एवंचतादृशहेतुव्यापकत्वविषयतानिरूपितत्वसहि
तसाध्यादिविषयतात्वघटकाया।जनकतावच्छेदकधर्मघटकपंचमविषयतानिष्ठनिरूपितत्वव्यक्तेरे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

एतेनायं महानसीयवह्निमानिति प्रतिज्ञायामव्याप्तिः तद्धूमव्यापकमहानसीयवह्निमद्वृत्तितद्धूमवानयमिति परामर्शीयपंचमविषयतांशेऽनुमितिजनकताव
च्छेदकतापर्याप्त्यधिकरणतद्धूमव्यापकत्वविशिष्टमहानसीयवह्निविषयतात्वं तद्वह्निविषयतावच्छिन्नायाः वह्निर्महानसीयो न वेति संशयप्रतिबंधकतायाः अव
वच्छेदकीभूतमहानसीयवह्निविषयताशालितया हिलपास्तम्

वानुमितिजनकतावच्छेदककोटिप्रविष्टतया तादृशव्यक्तेर्भिन्नतयोदाहरणजन्यबोधीयविषयतायां
तदसत्वेनातिव्याप्तिरस्येवेतिभावः। निरुक्तेति। न च तादृशपंचमविषयत्वावच्छिन्नत्वमेव प्रतिबंध
कतायां निवेश्यं किं तादृशधूमवह्निविषयत्वावच्छिन्नत्वेनेतिवाच्यम्। तथा सति मुख्यत्वसत्वेपि गोत्वाभा
९४ वः प्रमेयत्वव्यापकवाच्यत्ववत्साक्षाभावान् गोत्वाभावादित्यादौ प्रतिज्ञायामव्याप्तेः तत्र तादृशपंचम
विषयतानिरूपसाक्षाभावः प्रमेयत्वव्यापकवाच्यत्ववान्नवेति संशयनिरूपितप्रतिबंधकतावच्छेदक
तापिनवतीति तादृशधर्मरूपेण तादृशविषयतानिरूपप्रतिबंधकतावच्छेदकत्वप्रवेशनात्। संशयीयप्रतिबं
धकतामादाय पंचमविषयतायां तदवच्छेदकत्वं प्रदर्श्य तदुदाहरणजन्यबोधीयव्यापकत्वविषयताया
मुपपादयति। अनुमितीति। अत्र वदंति योयं प्रतिबंधकताघटितपरिष्कारः स न सर्वसंमतः तथा हि व्याप
त्व कत्वविषयतानिरूपितत्वस्य भिन्नत्वेपि निरूपितत्वस्यानुगततया तेन रूपेण तस्य प्रवेशे क्षत्यभावात्।
मा अन्यथा निरूपितत्वस्य भिन्नत्वे मम प्रसाधारणैकप्रतिबंधकतापि दुर्वचा स्यात्। तथा च हेतुविषयतानि
त रूपितव्यापकत्वविषयतानिरूपितसाध्यविषयतात्वमनुगतमेवेति नानुपपत्तिरिति तादृशपरिष्कारवै

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१०१ यर्थमिति।[illegible]।स्वात्मकेतिसंगोत्वाभावः।अत्रगोत्वाभावरूपहेतुविषयतामादायपंचमोग्राह्यावि
101 यतार्यइतितथाचपरामर्शीयायास्तस्याःप्रतिवंधकतावच्छेदकत्ववत्प्रतिज्ञाजन्यवोधीयप्रमेयत्वव्या
पकवाच्यत्वविषयतायाःप्रतिवंधकतावच्छेदकत्वमित्याशयः।ननुसाध्यतावच्छेदकांशेएवहेतुव्यापक
ग तावच्छेदकत्वं[illegible]वगाहिपरामर्शस्यैवजनकतयानाव्याप्तिरितिमुख्यत्वंव्यर्थं।एकव्यक्तिसाध्यकेभेद
घटितव्यापकतानिवेशप्रायेणतदुक्तेः।एवंलिंगविशेष्यकपरामर्शस्यापिहेतुत्वेमुख्यत्वनिवेशप्यनिस्तारा
त्पक्षविशेष्यकपरामर्शएवहेतुरितिनव्यमतेनायमनुगमोवोध्यः।अत्रवदंति।प्रमेयत्वव्यापकवाच्य
त्ववत्सास्नाभावव्याप्यगोत्वाभाववान्गोत्वाभावइतिपरामर्शीयगोत्वाभावरूपलिंगविषयताया
उपादानेपिनक्षतिः।हेत्वंशेविशेषणीभूतव्याप्तेःप्रकारतावच्छेदकतयातद्विषयतायामवच्छेदकतान्यत्वा
मु भावात्विशेष्यतावच्छेदकताभेदंनिवेश्यपर्याप्त्यत्वसार्थक्यस्यप्रक्षालनाद्धीतिन्यायस्यस्तत्वात्।तथाचयथा
श्रुतानिप्रायेणेदंप्रयोजनमिति।अत्रेदंचिंत्यं।पर्वतआलोकव्यापकवह्निमान्धूमादित्यादौप्रतिज्ञायामव्या
प्तिः।धूमव्यापक[illegible]कालोकव्यापकवह्निसमानाधिकरणधूमवान्पर्वतइतिपरामर्शीयपर्वतत्वावच्छिन्नमुख्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विशेष्यतेत्यादिक्रमेणयापंचमी आलोकव्यापकवह्निविषयतातदंशे विशेषणविधयाजनकतावच्छेदकता
पर्याप्त्यधिकरणं यदालोकव्यापकवह्नि विषयतात्वं तद्विषयताशून्यत्वस्य तज्जन्यशाब्दबोधे सत्त्वात्। अथसा
ध्यतावच्छेदकावच्छिन्नविषयतानिरूपिताधिकरणविषयतानिरूपिताधेयत्वविषयतानिरूपितहेतुविष
यतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वाव्यापिकौ निरुक्तपंचमविषयतातदंशे विशे या।
षणविधया अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणं तद्विषयताशून्यत्वनिवेशान्नोक्तप्रतिज्ञायामव्या
प्तिः। आलोकव्यापकत्ववह्निविषयतायास्तादृशनिश्चयत्वव्यापकत्वात्। हेतुव्यापकत्वविशिष्टसाध्यतावच्छेदका
वच्छिन्नविषयतायाः साध्याभावव्यापकत्वविशिष्टहेत्वभावविषयतायाश्च तादृशनिश्चयत्वाव्यापकत्वात्तत्त्वल
क्षणसमन्वयः। केवलसाध्यसामानाधिकरण्यहेतुमान् पक्षतावच्छेदकविशिष्टपक्षइतिज्ञानेपि तादृशनिश्चयत्व
सत्त्वेन तत्र तादृशविशिष्टविषयताया असत्त्वादिति चेन्न। तथासति मुख्यपदस्य पक्षतावच्छेदकावच्छिन्नेत्यस्य किंचि
द्व्यापकत्वविशिष्टनिरूपितत्वस्य दीधितिकारोक्तसाध्यताहेतुतावच्छेदकोपादानस्यैव वैयर्थ्यापत्तेः। तथाहि गोत्वा ८२
भाववं [illegible] प्रमेयत्वव्यापकत्वविशिष्टवाच्यत्वविषयतायाः प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवा
वाच्यत्ववत्सास्नाभाववान्गोत्वाभाववानित्यादौ प्रमेयत्वव्यापकत्व १

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१०२ नित्यादौ तादृशवाच्यत्वविषयतायाः वह्न्यभावव्यापकप्रमेयत्ववान्यवेतो वह्निमान्नित्यादौ वह्न्यभावव्यापकत्वविशि
102 ष्टप्रमेयत्वविषयतायाः द्रव्यत्वव्याप्यसंयोगवद्वृत्ति धर्मवान्नित्यादौ संयोगव्यापकत्वविशिष्टद्रव्यत्वविषयतायाः गुणव्या
प्यरूपवानयं स्पर्शवान्नित्यादौ रूप[redacted]व्यापकत्वविशिष्टगुणविषयताया श्च तादृशनिश्चयत्वव्यापकत्वात् किंतु
तादृशनिश्चयत्वाव्यापकीभूता हेतुतावच्छेदकावच्छिन्नव्यापकताविशिष्टसाध्यतावच्छेदकावच्छिन्नविषयतैवेति तात्प
र्यं तत्र तत्र लक्षणस्यैव गमनादिति। किंच गोत्वाभावः गोत्वाभावव्यापकवाच्यत्ववत्साध्याभाववान् गोत्वाभावादित्या
दौ प्रतिज्ञायामव्याप्तिः। तादृशनिश्चयत्वाव्यापिका गोत्वाभावव्यापकताविशिष्टसाध्यतावच्छेदकावच्छिन्नविषयता त
दंशे यथा तादृशविषयतात्वमवच्छेदकतापर्याप्त्यधिकरणं तथा गोत्वाभावव्यापकताविशिष्टविषयतात्वरूपसामा
न्यधर्मोपि तस्य पर्याप्त्यधिकरणमितिते प्रतिज्ञाजन्यबोधे तद्विषयताशून्यत्वासत्त्वात्। न च तदंशेऽवच्छेदकतापर्याप्त्य
धिकरणधर्म एव तादृशनिश्चय[redacted]त्वाव्यापकत्वेन विशेषणीयः गोत्वाभावव्यापकत्वविशिष्टसाध्यतावच्छेदकावच्छिन्न
विषयतांशे तादृशसामान्यधर्मस्यावच्छेदकतापर्याप्त्यधिकरणत्वेपि तादृशनिश्चयत्वाव्यापकतावच्छेदकत्वविरहात्
तादृशविषयतात्वस्यैव तादृशत्वेन तद्विषयताशून्यत्वस्य तत्र सत्त्वादेव नाव्याप्तिरिति वाच्यम्। एवमपि गोत्वाभाव

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

व्यापकवाच्यत्वंस्वास्वाभाववानितिप्रतिज्ञायामव्याप्तेर्दुर्वारत्वात् [redacted] प्रमेयत्वस्वास्वाभावसमानाधिकरणगोत्वाभा
ववान्गोत्वाभाववद्इतिगोत्वाभावव्यापकवाच्यत्वस्यप्रमेयत्वेनमानेन [redacted] गोत्वाभावव्यापकताविशिष्टवाच्यत्वत्वाव
च्छिन्नविषयत्वासत्त्वेनतादृशविषयतात्वस्यतादृशनिश्चयत्वाव्यापकतावच्छेदकतयापंचमविषयतायामवच्छेद
कतापर्याप्त्यधिकरणत्वेनचानुगततद्बुद्धिविषयताशून्यत्वस्यतत्राभावात्।एवंप्रमेयत्वव्यापकवाच्यत्वसमानाधिक
रणधूमवान्प्रमेयवानितिप्रतिज्ञायामव्याप्तिः।यत्रप्रमेयत्वव्यापकवाच्यत्वस्यप्रमेयत्वेनमानंतत्रप्रमेयसमानाधि
करणधूमवान्प्रमेयसमानाधिकरणधूमवानितिनिश्चयेतादृशनिश्चयत्वसत्त्वेनप्रमेयत्वव्यापकत्वत्वावच्छिन्न
प्रकारतानिरूपितवाच्यत्वत्वावच्छिन्नविशेष्यताया असत्त्वेनतादृशविशेष्यतात्वस्योक्तरूपाक्रांतत्वात्।अथसाध्य
तावच्छेदकघटकतावच्छेदकतातिरिक्तानवच्छिन्नावच्छेदकताकसाध्यविषयतानिरूपिताधिकरणविषयतेत्यादिक्र
मेणतादृशनिश्चयत्वंनिरुच्यंतादृशनिश्चयत्वाव्यापकतावच्छेदकत्वंवाच्यंउक्तस्थलेप्रमेयत्वस्यघटकतानवच्छेद
कतयानदोषः।एवंपक्षतावच्छेदकातिरिक्तानवच्छिन्नावच्छेदकताकपक्षविशेष्यताशालिनिश्चयत्वंनिर्वाच्यमतोनो
क्तदोषइतिचेन्न।एवमपिगोत्वाभावःगोत्वाभावव्यापकप्रमेयत्ववत्स्वास्वाभाववान्प्रमेयत्वव्यापकवाच्यत्वस

कतावछेदक

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ण१ घ

१०३ मानाधिकरधूमवान्पर्वतोवह्निमानित्यादिप्रतिज्ञायामव्याप्तेर्वाच्यत्वेपत्वात्प्रमेयत्वस्यापिसाध्यतावच्छेदकघटक

वाकुः तावच्छेदकत्वात्पक्षतावच्छेदकघटकतावच्छेदकत्वाच्च। [redacted] यद्रूपावच्छिन्नस्यपस्यस्यसाध्यतावच्छेदकघटकत्वंतद्रूपा यस्य

103 तिरिक्तरूपानवच्छिन्नतन्निष्ठावच्छेदकताकसाध्यविषयतेत्यादिक्रमेणतादृशनिश्चयत्वंवाच्यं।तथाचोक्तस्थले

प्रमेयत्वव्यापकवाच्यत्वत्वरूपेणतादृशरूपस्यसाध्यतावच्छेदकघटकतयोक्तनिश्चयस्यवाच्यत्वातिरिक्तप्रमेयत्वा

वच्छिन्नवाच्यत्वनिष्ठावच्छेदकताकसाध्यनिष्ठविषयताकतयातादृशनिश्चयत्वाव्यापकत्वस्यासत्त्वान्नदोषः।एवंय

द्रूपावच्छिन्नस्यपस्यपस्यपक्षतावच्छेदकघटकत्वंतद्रूपातिरिक्तानवच्छिन्नतत्तन्निष्ठावच्छेदकताकपक्षनिष्ठ

विशेष्यताशालिनिश्चयत्वनिरूप्यतादृशनिश्चयत्वाव्यापकतावच्छेदकत्वंवाच्यमिति [redacted] पक्षतावच्छेदका

त्यादि वच्छिन्नमुख्यविशेष्यतेनिवेशे [redacted]।नचतादृशपरिष्कारानादरेआलोकव्यापकवह्निसाध्यकप्रति

ज्ञायामव्याप्तिरितिवाच्यं।वह्निव्याप्यधूमवान्पर्वतइतिपरामर्शीयधूमव्यापकवह्नित्वावच्छिन्नविषयतारूपाया

पंचमीतस्यांवह्नित्वावच्छिन्नविषयतात्वंधर्मस्तद्बुद्धिविषयताऽन्यत्वासत्त्वादव्याप्तिरतोऽवच्छेदकतापर्याप्तिरू

पात्तासाचहेतुव्यापकत्वादिविशिष्टप्रकृतसाध्यादिविषयतात्वेएवेतिपर्वतआलोकव्यापकवह्निमानितिप्रतिज्ञा

देवोचपक्षेः ४ नतृतीयदेशेऽपिनाभावादि यत्क्तत्क्त तादृशपरिष्कारेत्यर्थः

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यामव्याप्तिं पूर्वपक्ष एव नावतरतीत्यलं समाधानप्रत्याशयेति। किंचिदिति। पंचमविषयतायां व्यापकत्वावच्छि-
न्नत्वं देयमित्यर्थः। एवं च हेतुपक्षयोः संबंधविषयता मंतभो व्येव पंचमीति नाव्याप्तिः। ननु पक्षमुख्यविशेष्यतामा-
रभ्य चतुर्थीया विषयतात दंशे विशेषणविधया जनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मेणानुगमनीयः। स च हे-
तुव्यापकसाध्यवद्विषयतात्वं साध्याभावव्यापकहेत्वभावविषयतात्वं चेत्युदाहरणस्यापि धारणं। एवं च किंचिद्व्यापकत्व-
विशिष्टनिरूपितत्वमपि न देयमिति चेन्न। एवं सति योयो धूमवानित्याद्युदाहरणे धूमवान् धूमव्यापकवह्निमानिति बो-
धस्य प्राचां मते सिद्धत्वपातद्धरणेपि यत्र धूमस्तत्र वह्निरित्युदाहरणे धूमव्यापको वह्निर्महानसादाविति बोधस्य ताद्द-
शविषयताशून्यस्यजनकेऽतिव्याप्तेः। नन्वेतत्कल्पे उत्तरकल्पे च वह्न्यभावव्यापकीभूताभाववान् पर्वतो वह्निमान् धू-
मादित्यादौ वह्न्यभावव्यापकधूमाभावप्रतियोगिमान् पक्ष इति परामर्शीयपक्षविषयतानिरूपितसंसर्गविषय-
तानिरूपितत्वप्रतियोगित्वविषयतानिरूपिता या ताद्दशपंचमी वह्न्यभावव्यापकाभावविषयता तस्याः प्रतिज्ञा-
जन्यबोधे सत्वाद व्याप्तिरिति चेन्न। तस्यां धूमाघटितताद्दशविषयतात्वेनानुपगमात्। लाघवादाह। वस्तुतस्त्वि-
ति। प्रकारत्वात्। प्रकारतारूपत्वात्। अथैतत्कल्पे गोत्वं प्रमेयं गोत्वाभावादित्यादौ यत्र गोत्वाभावस्तत्र प्रमेयत्व

हेतुविषयतानिरूपित

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१०४ मितिसाध्यमुख्यविशेष्यकबोधजनकोदाहरणेऽतिव्याप्तिः प्रमेयत्वव्याप्यगोत्वाभाववद्ध्रदत्वमितिपरामर्शीयपक्ष
104 मुख्यविशेष्यतामारभ्यसंसर्गविषयत्वाघटितचतुर्थविषयतायांहेत्वभाववृत्तितयातद्घटितपंचमविषयताऽधि
करणविषयत्वेवेति [illegible] तादृशोधर्मोहेतुव्यापकत्वविशिष्टसाध्यवद्विषयतात्वमेवतदवच्छिन्नविषयताशून्यत्व
स्योक्तोदाहरणजन्यबोधेसत्त्वात् न च चतुर्थविषयतायांहेत्वभाववत्त्वानवच्छिन्नत्वंविवक्षितं तथासतिधूमव्या
पकमेयत्ववान्ह्रदोनिर्धूमोनिर्वह्नित्वादित्यादौप्रतिज्ञायामव्याप्तेः धूमव्यापकवत्त्वाभाववान्तादृशह्रदइतिप
रामर्शीयायाहेतुसंसर्गविषयत्वाघटितचतुर्थविषयतायावह्नित्वावच्छिन्नायाहेत्वभाववत्त्वानवच्छिन्नत्वात्
तादृशचतुर्थविषयतानिरूपितपंचमीधूमव्यापकत्वविषयतापीतिप्रतिज्ञाजन्यबोधस्यतच्छून्यत्वाभावात् तृती
यविषयतायाः संसर्गतान्यत्व[illegible]निवेशेपिनतद्दोषवारणसंभवः तावतापिहेतुसंसर्गविषयताघटितप्रतियोगि
त्वसंसर्गविषयत्वाघटितचतुर्थ्यावह्नित्वावच्छिन्नविषयतायाहेत्वभाववत्त्वानवच्छिन्नत्वात् नापिचतुर्थविषयतायां
साध्याधिकरणप्रतियोगित्वान्यतरवृत्तित्वंविवक्षितमितिशंक्यं तथासत्युक्तस्थलेधूमव्यापकत्वस्यसाध्यवत्तया
तन्निष्ठचतुर्थविषयतानिरूपितपंचमीधूमवन्निष्ठाभावप्रतियोगित्वविषयतातस्यांतादृशोधर्मस्तथाविध

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विषयतात्वं तद्धद्विषयताशून्यत्वाभावादव्याप्तेर्वज्रलेपत्वात्। अथ हेतुमत्ताभावप्रतियोगितावच्छेदकानव
च्छिन्नत्वं चतुर्थविषयतायां विवक्षितमिति चेत्। एवमपि हेतुसंसर्गविषयत्वाघटितवह्निरूपप्रतियोगिसंस
र्गविषयत्वाघटितनिरुक्तविशेषणाक्रांतचतुर्थीधूमव्यापकत्वविषयतातन्निरूपितपंचमीधूमवद्वृत्त्यभाव
प्रतियोगित्वविषयतेत्युक्तरीत्याः व्याप्तेः। न च तृतीयविषयतायां हेत्वाधेयत्वान्यतरवृत्तित्वं देयं प्रकृते च तृती
यावह्निवृत्तिरेवेति न दोष इति वाच्यं। पृथिवीत्वव्यापकमेयत्ववद्गगनं पृथिवीत्वाभाववत्‌अवृत्तित्वादित्यादौ
पृथिवीत्वव्यापकाधेयताशून्यं ताहृग्गगनमिति परामर्शीयतृतीयविषयताया आधेयतावृत्तितया तन्नि
रूपिता चतुर्थव्यापकत्वनिष्ठविषयतायास्ताहृग्धर्मानवच्छिन्नतयोक्तक्रमेणप्रतिज्ञायामव्याप्तेः। न च चतु
र्थविषयतायां व्यापकत्वस्वहेतुप्रतियोगितावच्छेदकान्यतरधर्मानवच्छिन्नत्वमेव निवेश्यते तथा चोक्तस्थले
आधेयत्वविषयते न पंचमीति नाव्याप्तिरिति वाच्यं। वाच्यत्वं स्वरूपसंबंधावच्छिन्नघटवृत्तित्ववत्‌स्वरूपसंबं
विशेषा धावच्छिन्नप्रतियोगित्वां नाबादित्यादौ व्यतिरेकिपरामर्शीयायास्तथाविधचतुर्थविषयताया अप्रसिद्धेर्व्यति
रेक्युदाहरणादावतिव्याप्तेः। एवं वह्निमानवह्निसमानाधिकरणधर्मादित्यादौ हेतुतावच्छेदकघटकवह्निविष

पर्वतो

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

आकाशते ४

१०५ पञ्चिन्नर यत्तात्वं पंचम विषयतावच्छित्ता दृशो धर्मे सत्तद्वह्निविषयतायाएवबोधे सत्त्वात् पर्वतो वह्निमान् इति प्रतिज्ञायामव्या
प्तिरतो द्वितीय ये विषयतानिष्ठहेतुतावच्छेदकीप्रकारतात्वसंसर्गतात्वान्यतरध[redacted]र्मवान्निष्ठनिरूपकता
105 कविषयतानिष्ठाधेयतत्वावच्छिन्नविषयतात्वहेतुतावच्छेदकावच्छिन्नविषयतात्वान्यतरधर्मावच्छिन्ननिरूप
कताकविषयतेत्यादिक्रमेणावश्यं वाच्यतया धूमव्यापकमेयत्ववान्[redacted]निर्धूमो[redacted]वृ[redacted]त्वादित्यादौ धूमव्या त्रि
धे पकोस त्वभाववानिति परामर्शीयपक्षमुख्यविशेष्यतामारभ्य पंचमीधूमसमानाधिकरणाभावप्रतियोगि
त्वविषयतैवेत्युक्तक्रमेण प्रतिज्ञायामव्याप्तिरिति चेत् । गोत्वं प्रमेयं गोत्वाभावादित्यादौ[redacted]गोत्वाभावव्या
पकप्रमेयत्वसमानाधिकरणगोत्वाभाववद्गोत्वमिति दृष्टांतगोचरपरामर्शस्य या पंचमी विषयता तन्निष्ठ
तादृशधर्मवद्विषयताशून्यत्वस्य यत्र गोत्वाभावस्तत्र प्रमेयत्वमित्युदाहरणेऽसत्त्वान्न प्रथमो दोषः । वस्तु
तो हेत्वभावाप्रवेशस्य वाच्यतया नैतच्छंकासमारोहतीति बोध्यं । तादृशाद्रूदो निर्धूमो निर्वह्नित्वादित्यादौ
धूमव्यापकाभावप्रतियोगिवह्न्यभाववानित्येव परामर्शः कारणमुपगम्यते । न तु धूमव्यापकवह्न्यभाववा
न् इति[redacted]तत्र चतुर्थी प्रतियोगित्वविषयतैवेति न द्वितीयापि दोषः । अस्तु वा धूमव्यापकप्रमेय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्ववान्ह्रदो धूमव्यापकवह्न्यभाववान्पृथिवीत्वव्यापकमेयत्ववद्गगनं पृथिवीत्वव्यापकाधेयत्वाभा
ववदित्यादिपरामर्शादेरपिकारणत्वं।अभावत्वानवच्छिन्नप्रतियोगित्वरूपसंसर्गविषयतांघटितामादाय
लक्षणसंगतेः।संसर्गविषयताघटितधूमव्यापकत्वविषयतांपंचमीमादायोक्तदोषइतिचेत्। चतुर्थविषय
तायांहेतुमत्ताभावप्रतियोगितावच्छेदकानवच्छिन्नत्वेनापिविशेषणीयत्वात्।वाच्यत्वंघटवत्तीत्याद्युक्त
स्थलेचघटवत्तित्वाभावव्यापकप्रतियोगित्वाभाववानितिपरामर्शीयचतुर्थविषयतायांप्रतियोगित्वत्वा
वच्छिन्नविषयतानिरूपितप्रतियोगित्वत्वावच्छिन्नप्रतियोगितात्वावच्छिन्नविषयतात्मकतयानदोषः।एवंचतु
र्थ्याअभावरूपव्यापकताविषयतायाअभावत्वावच्छिन्नत्वान्नदोषः।एवंव्यापकत्वीयस्वरूपसंबंधविषय
तामादायाव्याप्तिवारणायचतुर्थ्यांसंसर्गतान्यत्वमपिदेयं।प्रतियोगित्वप्रकारकपरामर्शमादायतत्प्रसिद्धि
र्बोध्या।यदिधूमव्यापकतावच्छेदकवह्नित्वमेवधूमव्यापकत्वंतदातुहेतुसंसर्गवह्निसंसर्गयोरिकतरसंसर्ग
विषयताघटितापंचमीतथाविधवह्नित्वा[redacted]विषयता।हेतुमत्ताभावप्रतियोगितावच्छेदकावृत्तित्वं
चतुर्थविषयतायांनिवेश्यंतेनसंसर्गविषयत्वाघटितविषयतामादायचतुर्थ्याःवह्नित्वादिवृत्तित्वेपिनक्ष

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तेरिति दिक्। ईदृग्धर्मस्तु प्रतियोगितावच्छेदकपक्षकप्रतिज्ञासंग्रहाय [redacted] यप्रतियोगितावच्छेदकत्व)
१०६ न (त्ति धर्मावच्छिन्नत्वा [redacted] निवेशेन। धर्मितावच्छेदकतान्यत्वरूपहेतुतावच्छेदककोटिप्रविष्टपदार्थविषयता
106 वारकविशेषणत्वान्न तृतीयदोषः। अभावनिष्ठत्वं च अभावत्वावच्छिन्नत्वं तेन नाभावपक्षकप्रतिज्ञाया अ
संग्रहः। अभावत्वं सप्तमपदार्थमात्रवृत्ति निवेश्यं न तु इहत्वभावत्वादिवैयर्थ्यात्। नन्वेवं गोत्वाभावः प्रमे
यत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यादौ मुख्यत्वानुपादानेपि गोत्वाभावरूपलिंगवि
षयतामादाय चतुर्थ्याः सास्नाभावनिष्ठविषयताया अभाववृत्तितयाऽव्याप्यभावात् मुख्यत्वं व्यर्थमि
ति वाच्यम्। तथापि आधेयत्वं पक्षः साध्यं पूर्वोक्तमेव आधेयत्वादित्यादौ प्रमेयत्वव्यापकवाच्यत्ववत्सा
स्नाभावव्याप्याधेयतावदाधेयत्वमिति परामर्शीयव्याप्तिघटकाधेयताविषयतामादाय अभाववृत्तिच
त्व तुर्थीसंसर्गविषयतावाच्यविषयतावान्निरूपितपंचमीप्रमेयत्वव्यापकवाच्यत्वविषयताव्यापक
त्वविषयतावत्त्वव्याप्तेर्मुख्यत्वनिवेशात्। अतिव्याप्त्यभावेति। अन्यथा वह्न्यभावाभावत्वावच्छिन्ने धूमव्या
पकतानवगाहित्वेनातिव्याप्त्यापत्तेरिति भावः। द्रव्यत्वव्याप्यसंयोगवानिति तु नोक्तं विशिष्टेपि पक्षे संयो

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

गवत्तायाअर्थतोलाभेनहेत्वभिधानाकांक्षाविलयापत्तेः।द्वितीयेति।रूपत्वावच्छिन्ननिरूपितायाइत्या
दिः।अथपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्याद्यनुगमस्यभट्टाचार्यकृतस्यदीधितिकाराभिप्रेतत्वेए
तद्दीधित्यसंगतिः।प्रथमेद्रव्यत्वव्या[redacted]प्यगुणवान्द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयमितिपरामर्शीय
जनकतायामवच्छेदकीभूतापंचमीविषयतागुणत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्यैविषयतेव त्व
त्व नतुसंयोगत्वावच्छिन्ननिरूपितव्यापकताविशिष्टद्रव्यैविषयतातच्छून्यत्वंचनप्रतिज्ञाजन्यबोधस्येतिहे
तुतावच्छेदकपदंव्यर्थं।एवंद्वितीयेस्पर्शव्याप्यरूप[redacted]वान्गुणव्याप्यरूपवानयमितिपरामर्शीयजन
कतायामवच्छेदकीभूतारूपव्यापकताविशिष्टस्पर्शत्वावच्छिन्नविषयतैवनतुरूपव्यापकताविशिष्ट
गुणत्वावच्छिन्नविषयतेतिसाध्यतावच्छेदकपदमपिव्यर्थं।अथोक्तस्थलेतादृशपरामर्शीयपक्षता
वच्छेदकीभूततादृशधर्मावच्छिन्नमुख्यविशेष्यतानिरूपितायाधर्मनिष्ठविषयतातन्निरूपिताधेय
त्वविषयतानिरूपिताधिकरणविषयतानिरूपितापंचमीद्रव्यत्वव्याप्यसंयोगत्वावच्छिन्नविषयता।
एवंद्वितीयेरूपव्यापकताविशिष्टगुणविषयतेतितन्निष्ठविषयतात्वस्यजनकतावच्छेदकतापर्याप्त्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१०७ 107 धिकरणत्वेन तद्वद्विषयताशून्यत्वाभावादव्याप्तेस्तदुभयोपादानमिति चेन्न । स्वस्य स्वधर्मितावच्छेदक
त्वापत्त्या[illegible]द्रव्यत्वव्याप्यसंयोगसमानाधिकरणधर्मोऽयव[illegible]च्छिन्नविशेष्यतानिरूपितप्रकारतायास्तादृश
समानाधिकरणधर्मोपावनंगीकारात् । अन्यथा तदुभयोपादानेऽपि प्रमेयत्वव्यापकवाच्यत्वसमानाधि
करणधर्मवान् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तेः । तादृशपक्षतावच्छेदकावच्छिन्नविशेष्य
तानिरूपितविषयतायाः पक्षतावच्छेदके उपगमेन तत्क्रमेण प्रमेयत्वव्यापकवाच्यत्वविषयतात्वस्य प
र्याप्त्यधिकरणतया तद्वद्विषयताशून्यत्वस्य तज्जन्यबोधे सत्त्वात् । नन्वनुमितौ तज्जनकीभूतपरामर्शे
वा प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वं न निवेश्यते प्रयोजनाभावात् । तथा चेदंत्वावच्छिन्नो
द्देश्यकद्रव्यत्वावच्छिन्नविधेयकानुमितिजनकोयः अयं द्रव्यत्वव्याप्यसंयोगवानितीदंत्वावच्छि
न्नविशेष्यकपरामर्शस्तस्योक्तक्रमेण पंचमीयासंयोगत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्य
त्ववि[illegible]षयतात्वं संयोगत्वावच्छिन्नगुणहेतुकानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्म
स्तद्वद्विषयताशून्यत्वस्य प्रथमप्रतिज्ञाजन्यबोधे सत्त्वादव्याप्तिरतो हेतुतावच्छेदकावच्छिन्नहे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तुकत्वस्यानुमितौलाघवायहेतुतावच्छेदकपदोपादानं। एवमिदंत्वावच्छिन्नोद्देश्यकोयोगुणत्वावच्छिन्नवि
धेयकानुमितिजनकःगुणव्याप्यरूपवानयमितिपरामर्शस्तस्योक्तक्रमेणपंचम्याविषयतायांरूपव्या
पकत्वविशिष्टविषयतात्वंगुणत्वेनस्पर्शविधेयकानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणंतद्वद्विषयता
शून्यत्वस्यद्वितीयप्रतिज्ञाजन्यबोधेऽसत्त्वादव्याप्तिरतस्तत्रसाध्यतावच्छेदकावच्छिन्नविधेयकत्वलाभायसा
ध्यतावच्छेदकपदोपादानमितिचेन्न। तथासतिप्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवान्पर्व
तोवह्निमानितिप्रतिज्ञायामव्याप्तिः तादृशपरामर्शीयपर्वतत्वावच्छिन्नमुख्यविशेष्यतामारभ्यपंचम्यां
प्रमेयत्वव्यापकवाच्यत्वविषयतात्वस्यसत्त्वात्। एवंधूमव्यापकालोकसमानाधिकरणधर्मवान्पर्वतोव
ह्निमान्धूमादित्यादौप्रतिज्ञायामव्याप्तिरतः अनुमितौपरामर्शेचप्रकृतपक्षतावच्छेदकावच्छिन्नविषय
कत्वंनिवेश्यं। तादृशपरामर्शेप्रकृतपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतामारभ्यप्रमेयत्वव्यापकत्व
विशिष्टवाच्यत्वविषयतानपंचमी। किंतुधूमव्यापकत्वविशिष्टवह्निविषयतैवेतिनाव्याप्तिः। नचैवमपिसं
योगत्वावच्छिन्नहेतुकार्यांश्चद्रव्य त्वव्याप्यसंयोगवद्वृत्तिधर्मवानयंद्रव्यत्वादित्यनुमितेरेकाकारतया

गुणत्वावच्छिन्नहेतुकाया०

CC-0. Dharmartha Trust J&K. An eGangotri Initiative

१०८ 108 तादृशानुमितिजनकसंयोगत्वावच्छिन्नप्रकारकपरामर्शीयपंचमी विषयतामादायाव्याप्तिवारणाय हेतुता
वच्छेदकपदं तथा च गुणत्वावच्छिन्नप्रकारकपरामर्शीयपंचमीविषयतामादायनाव्याप्तिरितिवा–व्यसंयोग
त्वावच्छिन्नहेतुकतादृशानुमित्यप्रसिद्धेः। द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्म्मयानयं द्रव्यत्ववान्नसंयोगात्यादिन्या
यप्रयोगाभावात्। अतएव दीधितिकृता वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यादिर्न्न्यायप्रयोग इत्युक्तं तथा
च महाचार्याणां कथमनुगमप्रकार इति। अत्रोच्यते न्यायप्रयोगासंभवेन परार्थानुमित्यप्रसिद्ध्या तादृशानुमि
तिजनकपरामर्शीयनिरुक्तपंचमविषयताया अप्यप्रसिद्धत्वेन तच्छून्यशाब्दबोधजनकत्वरूपप्रतिज्ञालक्षण
स्योक्तप्रतिज्ञायामव्याप्तेस्तदुपादानं तथा चानुमित्यप्रसिद्धावपि गुणत्वावच्छिन्नहेतुकतादृशपरार्थानुमिति
प्रसिद्ध्या तामादायैव लक्षणगमनान्नाव्याप्तिः। अथवा परार्थानुमितिरेवमाद्येति न नियमः किंतु स्वार्थसाधा
रणीति संयोगत्वावच्छिन्नहेतुकतादृशपरार्थानुमितेरप्रसिद्धत्वेपि संयोगत्वावच्छिन्नहेतुकतादृशस्वार्थानुमितेः
प्रसिद्धत्वया तामादाय तत्प्रतिज्ञायामव्याप्तिरतद्धेतुतावच्छेदकपदं तथा च द्रव्यत्वव्याप्यसंयोगवानितिपरामर्श
स्य गुणत्वावच्छिन्नाप्रकारकत्वेपि तादृशधर्मवानयं द्रव्यव्याप्यगुणवानितिपरामर्शस्यैव तथात्वेन तदीयनिरुक्त

द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विषयताशून्यबोधजनकत्वान्नाव्याप्तिः। एवंगुणव्याप्यरूपवानयंस्पर्शवान्रूपादित्यादौगुणव्याप्यरूप
वानयंगुणवानित्यनुमितिजनकपरामर्शमादायाव्याप्तिरतः साध्यतावच्छेदकपदं। प्रकृतसाध्यतावच्छेद
कावच्छिन्नविधेयकत्वलाभार्थमिति। वस्तुतस्तु हेतुव्यापकताविशिष्टसाध्यविषयतासाध्याभाववव्यापक
ताविशिष्टहेत्वभाववविषयतयोर्नताद्रूप्येणनिवेशः। किंतु पंचमविषयतात्वेन। सा च ताद्दृशसाध्यादिविष
यतात्तदन्यांभवतुपरंतुनयथाकथंचित्पंचमविषयतात्वेन। किंतुपक्षतावच्छेदकावच्छिन्नेसाध्यादिकर्मि
णतथात्वेनेतिसूचनार्थंतत्पदंउपात्तंतस्मिन्तत्रपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितागुणत्वा
वच्छिन्नविषयताभास्याप्यपापंचमीसाध्यतावच्छेदकावच्छिन्नविषयताभवतिनतुपक्षतावच्छेदकनि
ष्ठप्रकारतातस्यास्तदवच्छिन्नविशेष्यत्वानिरूपितत्वादिति। ताद्दृशप्रकारतायास्ताद्दृशविशेष्यतानिरूपि
तत्वस्यसुसाधकोप्ययमेवग्रंथइति। अपरेतु तच्चेत्यादिनाविशिष्यान्वयव्यतिरेकव्यापकत्वानवगाहित्वयो
र्निवेशकल्पोपिभट्टाचार्यसंमतः दीधितौवाकाराद्यभावेपिस्वयंविशिष्याभिप्रेतदवगाहित्वेत्याद्यभिधाना
त्। एवंचतत्कल्पस्यएवायंग्रंथोनत्वनुगतरूपावच्छिन्ननिवेशकल्पस्येत्याहुः। तथासतितच्चेत्येतद्व्याख्या

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

गुणव्याप्यरूपवान् ४

संगतिः विशिष्यापीत्यभिधानं च पौनरुक्त्यमात्रसूचक २

३०९

109

नस्यातो नोक्तानुगमविरोध इत्युपसंहारस्य च नानंजस्यं सर्वग्रंथस्यानुगमपरत्वे च तादृशधर्मः क इत्याकांक्षा

यां तच्चेत्यादिना विशिष्य तदुभयावगाहित्वप्रदर्शनमिति प्रतिभाति। परे तु द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवा

न्द्रव्यत्वव्याप्यगुणवानित्यन्वयव्यतिरेकपरामर्शीयहेतुतावच्छेदकावच्छिन्नविषयते वह्नितीयादिविषय

ताशब्देन ग्राह्या। एवं स्पर्शव्याप्यरूपवानित्यन्वयव्यतिरेकपरामर्शीया पंचमी साध्यतावच्छेदकावच्छिन्नहे

त्वभाववत्तावच्छिन्नान्यतरविषयतामादायेति पञ्चकूटसूचकद्वयलाभाय यथाश्रुते व्यावृत्त्यभिधानं तथा

चोक्तं पक्षविशेष्यतामादायान्वयव्यतिरेकव्यापकत्वावच्छिन्नविषयतयोः पंचमत्वं साध्यतावच्छेदका

दिनिवेश एव संभवतीति नैतद्व्यावृत्त्यसंगतिरिति ध्येयमिति वदंति। इदं पुनरत्रालोचनीयं। नहि आचार्याणां

मते एकधर्मिविशेष्यतापन्नस्यापरधर्मिविशेषणतापन्नस्य प्रकारत्वाविशेष्यत्वयोर्भेदान्नायमनुगमः

साधीयान् तथाहि अन्वयपरामर्शे पक्षमुख्यविशेष्यतामारभ्य हेतुव्यापकताविषयतानिरूपितसाध्य

विशेष्यतां नव मीव्यतिरेकपरामर्शस्थले साध्याभावव्यापकहेत्वभावविषयता पक्षविशेष्यतामार

भ्याष्टमीति पक्षसंसर्गमादायापि न निस्तार इति चेत्। अत्राहुः। व्यतिरेकपरामर्शे यथा पक्षविशेष्यता

दि। विषयता निरूपिता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पक्षतावच्छेदकतावच्छिन्नविशेष्यतानिरूपितविषयतायाः निरूपितत्वावच्छिन्नत्वान्यतरत्वद्विषयतायाः निरूपितत्वावच्छिन्नत्वान्यतरत्वद्विषय
तायाः निरूपितत्वावच्छिन्नत्वान्यतरत्वद्विषयतायाः निरूपितविषयत्वावच्छिन्नविषयतानिरूपितविषयत्वावच्छिन्नविषयतां शो २

सांसर्गिकविषयताघटितत्वात्तथैवापरापि हेतौ प्रतियोगित्वविषयतानिरूपिताप्रतियोगित्वे हेत्वभावvi
षयतानिरूपिता वा सांसर्गिकविषयताघटितत्वेति ननवमीत्वानुपपत्तिरिति अनुगमप्रकारस्तु परिचिंत
प्प नीय इति। इदं त्ववधेयं। महाचार्याणामयमनुगमप्रकारः। यच्छेदकतावच्छेदकसाधारणकारणतावच्छे
दकतामंगीकृत्य। अथावच्छेदकतावच्छेदकसाधारणावच्छेदकत्वास्वीकारे नायमनुगमः साधीयानिति
चेन्न। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिष्ठानुमितिजनकता[redacted]वच्छेदकतायां निरूपि
तत्वसंबंधावच्छिन्नावच्छेदकतायाः अवच्छेदकतावच्छेदकतावच्छेदकतावच्छेदकताप्रयोज्याधिकरणत्वे वच्छेदकता
नधर्मानुगमस्य करणीयत्वात्। हेतुव्यापकसाध्यविषयताविशिष्टाधिकरणविषयताविशिष्टाधेयत्व
विषयताविशिष्टहेतुविषयताविशिष्टपक्षविषयताशालित्वेन जनकत्वात्तत्संगतिः। सर्वत्र वैशिष्ट्यं
निरूपितत्वसंबंधेन बोध्यं। संसर्गावच्छिन्नहेतुविषयताविशिष्टपक्षविषयताशालित्वेन हेतुविषयता
विशिष्टसंसर्गविषयताविशिष्टपक्षविषयताशालित्वेन वा विनिगमनाविरहेण जनकतया न सा
ध्यनाव्यापकहेत्वभावविषयत्वालाभ इति। जयदेवतर्कालंकारप्रभृतयस्तु किमिदं गमकत्वोप

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११० ल यिकोमित्यांशकपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्यादिक्रमेणपंचमविषयतांशेविशेषणविध
110 याप्रकृतानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवह्निविषयत्वावच्छिन्नप्रतिबंधकतावच्छेद
कविषयतात्वेनोदाहरणजन्यबोधीयविषयतायाःसंग्रह इति नद्वाचार्याणामभिधानंतत्राक्षिपंति। नन्वि
दमसंभवदुक्तिकांयतोव्याप्त्यंशेनिश्चयत्वानिवेशप्रयुक्तलाघवानुरोधेनव्याप्तिविशिष्टवैशिष्ट्यावगाहि
निश्चयत्वेनैवानुमितिजनकतायाव्यवस्थापिततयातादृशपंचमविषयतांशेतादृशजनकतावच्छेद
कतापर्याप्त्यधिकरणंव्यापकत्वनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतात्वमेवा तदवच्छिन्न
त्वंचनवह्निर्धूमव्यापकोनवेतिसंशयप्रतिबंधकतावच्छेदकतायांवह्निर्धूमव्यापकइतिज्ञानीयवि
षयतासाधारणव्यापकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यतात्वस्यैवतादृशसंशयप्रतिबंध
कतावच्छेदकतावच्छेदकत्वादिति। ननु तादृशरूपवह्निविषयत्वावच्छिन्नत्वोपलक्षितविशेष्यत्वावच्छिन्नप्र
तिबंधकताविशेषणीयातथाचानुमितिजनकपरामर्शीयतादृशरूपवत्तीयावच्छेदकतातदवच्छिन्न
व्यापकत्वा[redacted]प्रकारतानिरूपितसाध्यादिविशेष्यत्वावच्छिन्नांवह्निर्धूमव्यापकोनवेत्यादिसंशय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

प्रतिबंधकत्वाभावाद्यैवलक्षणसमन्वयान्नोक्तदोषइतिवाच्यम् एवंसतिपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्य
तानिविशेषिगोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान्गोत्वाभावादित्यादौप्रतिज्ञायामव्याप्ते
र्दुर्वारत्वात्। तत्रान्वियपरामर्शीयप्रमेयत्वव्यापकवाच्यत्वप्रकारतानिरूपितसास्नाभाववविशेष्यताया अ
पिनिरुक्तरूपवह्निघृपत्वावच्छिन्नतयातादृशप्रतिज्ञायाः सास्नाभावविशेष्यकतादृशवाच्यत्वप्रकारकसंशया
दिप्रतिबंधकतावच्छेदकविषयताशून्यबोधाजनकत्वात्। नचसाध्यतावच्छेदकावच्छिन्नविषयतानिरू
पिताधिकरणविषयतानिरूपिताधेयताविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपित
ता पक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वाव्यापकत्वेनतादृशविशेष्यत्वावच्छिन्नप्रतिबंधकताविशे
षणान्नायंदोषः। साध्यतावच्छेदकघटकपदार्थविषयसंशयादिप्रतिबंधकतायास्तादृशनिश्चयत्वाव्या
त्र पकत्वविरहात्। एवंचतत्रप्रमेयत्वव्यापकवाच्यत्ववद्गोत्वाभाववत्वादिनापक्षताहेतुताचसास्नाभावः साध्य
त्वस्थलीयप्रतिज्ञायांपक्षविषयतानिरूपितसंसर्गविषयतानिरूपितहेतुविषयतानिरूपितसंसर्गविष
यतानिरूपिततादृशवाच्यत्वविषयतांपंचमविषयतात्वेनोपादाययत्रवातेनरूपेणकेवलपक्षतावच्छे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२२२ दकघटकत्ता तत्तत्त्वप्रतिज्ञायां पक्षविषयतानिरूपितसांसर्गिकविषयतानिरूपित पदहेतुविषयतानिरूपितत
१११ दीयसांसर्गिकविषयतानिरूपितविषयताहेन पुनः पक्षविषयतामादायैवाव्याप्तिरपि प्रसुक्ता। तत्तद्विषयता
वच्छिन्नविशिष्टत्वावच्छिन्नप्रतिबंधकतायास्ताहशानिश्चयत्वाव्यापकत्वाभावात्। यदि च प्रमेयत्वव्यापकवा
ततोनेतिम। च्यत्वघटितस्य विशेषणत्वे यत्र्यनं नलि... न्यते घटवृत्तिगंधकालीनघटः गंधविशेष्टिदान्या व तिगंधत्वेपवानघ
टवृत्तिगंधवतद्दत्यादो तादात्म्येन हेतुतायां पक्षविषयतानिरूपितसंसर्गविषयतानिरूपितहेतुविषयतानि
रूपितसंसर्गविषयतानिरूपितविषयतांशे घटवृत्तिगंधविषयतात्वं ताहशधर्म इति प्रतिज्ञायामव्याप्ति
निरासोऽपकृष्टव्यः। गंधस्य चव्यभिचारित्वाद्विशिष्टस्य हेतुत्वं। एवं प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणघट
मवान् पर्वतो वह्निमान् धूमादित्सत्त्वापि अव्याप्तिः प्रसुक्तेतिवाच्यं पक्षविशेष्यतायां मुख्यत्वोपादानासं
गतेः। गोत्वाभाववपक्षकप्रमेयत्वव्यापकवाच्यत्वबत्सास्नाभाववसाध्यकगोत्वाभावहेतुकप्रतिज्ञायामव्या
प्तिवारणरूपतत्प्रयोजनस्य निरुक्तविशेषणेनैवसंभवात्। तथापि ताहशविषयपंचमतायां प्रकृतानुमि
तिजनकतावच्छेदकताभानिवेशेनैवोपपत्तौ तदंशे विशेषणविधयाजनकतावच्छेदकतापर्यो प्याधिकर

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

णधर्मवत्वनिवेशस्यवैयर्थ्यापत्तेश्चेति। अत्राहुः। व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेनैवानुमितिकारणत्वं
तद्विशिष्टवैशिष्ट्यावगाहित्वंतदवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गावगाहित्वं। नतुतन्निष्टविलक्षणा
वच्छेदकतानिरूपकप्रकारताकत्वं। अंतराभासमानपदार्थनिष्टप्रकारताविशेष्यतयोश्चावच्छेद्यावच्छे
दकभावेनत्वभेदइत्यभिप्रायकोयंग्रंथः। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यते त्यादिपंचमविषय
तांशइत्यंतस्यपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितानिरूपितविषयताविशिष्टविषयताविशिष्टविषयता वि
शिष्टविषयताविशिष्टविषयतांशइत्यर्थः। द्वितीयत्वतृतीयविषयतावैशिष्ट्यंस्वानिरूपितत्वस्वनिरूपितवि
शेष्यतानिरूपितप्रकारत्वावच्छिन्नानिरूपितत्वोभयसंबंधावच्छिन्नस्वनिष्टावच्छेदकताकभेदवत्वसं
बंधेन। द्वितीयविषयताहिसंसर्गताप्रकारतावातस्याएवविशेष्यतानिरूपितत्वाच्चातद्विशिष्टापितयोर्द्वि
कारताविशेष्यतावृत्तेः। तथाहियदिस्वपदेनसंसर्गताध्रियतेतत्रप्रकारतायामेवस्वानिरूपितत्वं तत्प्रका विरहा
रतायत्रध्रियतेतत्रापिप्रकारतायामेवप्रतियोगितावच्छेदकताघटकद्वितीयसंबंधविरहात् तस्याए
१० वताहशभेदवत्वसंबंधेनस्वविशिष्टत्वात्। यद्यपिस्वावच्छिन्नानिरूपितत्वमेवद्वितीयसंबंधःसंभवति तथापिसं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११२ सर्गतायत्रस्वपदेनधृतातत्रसंबंधप्रसिद्ध्यर्थंगुरुतरारंभः।प्रतियोगित्वीयसंसर्गतायाःस्वपदेनोपादानेपिपं
उक्तः२ चमीत्वप्रसिद्ध्येअयमेवसंबंधउक्तक्रमेणविशेष्यतायास्तथात्वसंभवेपितामादायदोषोऽग्रेनिराकरणीयः।
112 निरूपितत्वंचसर्वत्रसाक्षादेवनातोव्यवहितप्रकारतासंसर्गतोपादानदोषः।प्रतियोगितावच्छेदकताघटक
संबंधेनस्ववैशिष्ट्यंविशेषणत्वादौप्रसिद्धं।एवंचतुर्थविषयतावैशिष्ट्यंस्वनिरूपितप्रकारत्वावच्छिन्नत्वस्व
रूपितविशेष्यतानिरूपितप्रकारत्वावच्छिन्ननिरूपितप्रकारत्वानवच्छिन्नत्वोभयसंबंधावच्छिन्नभेदवत्त्वसं
बंधेन।एतादृशसंबंधेनतद्विशिष्टापंचमविषयताविशेष्यतेवसर्वंयुक्तं।।एवंचजनकतावच्छेदकंप्रतिबंधक
तावच्छेदकतावच्छेदकंचविशेष्यतात्वमेवेतिनासंभवः।नचैवमपिसाध्यतावच्छेदकवाच्यत्वादिप्रकारता
निरूपितसास्नाभावादिविशेष्यतायाअपिनिरुक्तपंचमविषयतात्वेनगोत्वाभावः।प्रमेयत्वव्यापकवाच्य
त्ववत्सास्नाभाववान्गोत्वाभावादित्यादिस्थलीयप्रतिज्ञायांमुख्यविशेष्यतानिवेशेप्यव्याप्तितादवस्थ्य
मितिवाच्यम्।स्वस्यस्वधर्मितावच्छेदकत्वस्यप्रकारांतरेणवारणीयतयातादृशविशेष्यतातःप्रकृतहे
तुव्यापकत्वप्रकारतानिरूपितविशेष्यतायावाततएवभेदोपगमेनविशेषणविधयाजनकतावच्छेद

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

कतापर्याप्त्यधिकरणंयत्प्रकृतहेतुव्यापकत्वप्रकारतानिरूपितत्वसहितं तादृशविशेष्यतात्वं तदवच्छिन्नप्रतिबं
धकतावच्छेदकविषयताशून्यबोधजनकत्वेनाव्याप्तेरभावात् एतेन पंचमविषयतायां प्रकृतानुमितिजनक
ता तावच्छेदकत्वनिवेशेनैवोपपत्तौ ईदृशरूपवत्त्वपर्यंतनिवेशनमफलमिति शंकानवकाशः। तादृशरूपवत्त्वस्य
प्रतिबंधकतावच्छेदककोटौ विशेषणविधया निवेशएवोक्तप्रतिज्ञायाः संग्रहसंभवेन तदनिवेशे तस्याः एवदुस्संग्र
हत्वापत्तेः। गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववद्गोत्वाभाववत्सास्नाभाववान् तादृशगोत्वाभावादित्यादौ हेतु
तावच्छेदककोटिप्रविष्टपदार्थविषयतां प्रमेयत्वव्यापकवाच्यत्ववद्गोत्वाभाववद्गोत्वाभावः सास्नाभाववान्
गोत्वाभावादित्यादौ अनुक्रमेण पक्षतावच्छेदककोटिप्रविष्टविषयतां चादाय दोषः प्रतिबंधकतायां प्रकृतहेतु
तावच्छेदकावच्छिन्नविषयतानिरूपितप्रकृतपक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वाव्यापकत्वानि
वेशप्रवारणीयइतिनकाप्यनुपपत्तिः अन्येतु विशेष्ये विशेषणमिति रीत्या व्याप्यवगाहि परामर्शस्यैवानुमितिका
रणत्वं अंतराभासमानपदार्थीयप्रकारताविशेष्यतयोश्चाभेद इत्यभिप्रायेण इदं तथा च साध्यादिव्यापकत्वप्र
कारतानिरूपितविशेष्यत्वादिकमेव जनकतावच्छेदकं तदेव च प्रतिबंधकतावच्छेदकमिति न काप्यनुपपत्ति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११२ रितिअन्यत्सर्वं पूर्ववदिति॥ तत्पल्लवितेन। यत्संतोत्त रेति। मूलोक्तप्रतिज्ञालक्षणघटकीभूतसंख्यत्वादुत्तरेत्य
113 र्थः। तेन जनकत्वेसती संतस्यनत्यागः। घटोद्वंद्वादितिप्रतिज्ञानुपगमेत्वाह। पटइति। तिङर्थस्येति। स्वर्गका
मोयजेतेत्यादौविध्यर्थकलिङः प्रत्ययः तिङ्रूपस्तदर्थइष्टसाधनत्वं तस्यधात्वर्थेभानं। समानेत्यादि। नीलो
घटः स्तोकं पचतीत्यादौ। आधेयत्वेति। भूतलेघटइत्यादौआधारतावद्भूतलवान्घटइत्येवबोधःस्यात्तत्र
दीधितिकृद्दर्शितनामार्थयोरितिव्युत्पत्तिविरोधइत्यर्थः। सप्तम्यर्थोऽधिकरणत्वमेवतत्रघटान्वयः घटा
न्विताधिकरणत्वस्य भूतलेइतिप्रत्ययार्थस्य विशेषणाविधयाऽन्वयस्वीकारेपिनव्युत्पत्तिविरोधइत्याशं
त क्तेनचेति। नोक्तातिप्रसंगःन भूलंघटइत्यादितो भूतलवान्घटइत्यादियोधप्रसंगः। आधेयतासंबंधे
नभूतलप्रकारकघटविशेष्यकबोधेसप्तम्यंतभूतलपदसमभिव्याहृतघटपदज्ञानस्यैवहेतुत्वादितिभा मि
वः भूतलेइत्यपा[illegible]तोधर्मादिति पृथक्। प्रत्येकं वाक्यप्रयोगेबोधोनस्यादित्यर्थः। केवलभूतलेइत्यादौ
भूतलेविशेषणत्तयाऽधिकरणत्वस्यैवभानान्नोनुभावकत्वापत्तिरितिसमाधानस्फोरणाय विभक्त्य
र्थः संसर्गतयैवेतिपक्षंपरित्यज्यतस्यविशेषणतयापिभानमंगीकृत्यनामार्थयोरितिव्युत्पत्तिंपरि

न२
इत्यत्वादित्यधिकदूषणनिरसनं नैत्रस्येत्यादि दूषणस्यदार्ढ्यनामार्थ·२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नैकपदमिति १

भयभेदसंबंधेनैवनामार्थयोरन्वयमुपगम्योक्तसम[illegible]व्याहारज्ञानकारणत्वोपगमेन भूतलं घट इति प्रयो
गापत्तिं वारयतामुपरि चैत्रस्येत्यादिदूषण[illegible]मवतारयति। अस्तु चेति। अधिकरणत्वं भूतले इत्यत्र। ज्ञापकत्वं
स्यादिति धूमादित्यत्र। न चैत्रस्येदमिति मैत्रधने एवं ताहृशव्यवहारो भवतीति सूचनाय मैत्रस्येत्यप्युक्तमिति बोध्यं। ता
दृशस्वत्वमेकमात्रनिरूपितं। यदीति। स्वमित्यनुवर्त्तते। ताहृशेति। समभिव्याहृतपदार्थेत्यर्थः। यदि संबंध
भूतस्वत्वाश्रयस्वामिनिष्ठभेदाप्रतियोगी एकपदार्थस्तदाप्याह। एकमात्रस्वत्ववदिति इदमेताहृशधनास
स्यादिति त्वे दोषाभावप्रकाशनार्थं एकत्वरक्षार्थं च स्वत्वसंबंधेन तथाविधचैत्रमैत्रयोः प्रत्येकस्य तत्र सत्त्वात्। अथ
त्रयाणामिदं न द्वयोरित्यत्र कीदृशो बोधः सजातीयद्वितीयराहित्यस्य दुर्वचत्वादिति चेन्न। तस्य तत्र स्वनिरू
पकनिष्ठभेदप्रतियोगितानवच्छेदकीभूतप्रकृत्यर्थतावच्छेदकरूपत्वात्। एतदभिप्रायेणैव सजातीयद्विती
यराहित्यमेकपदार्थ इत्यभिप्रायेणैवा अत्र सजातीयद्वितीयांतर्गतैकस्वत्वाभावपरतयापि द्वयोरिदं
नैकस्येति व्यवहार आनुभविकस्तन्निर्वाहाय वक्ष्यमाणप्रकारादरे च दीधितिकारीयस्वत्वसंसर्गतामत
दूषणस्याप्युद्धारो भवतीत्याशयेन दूषयति। इदमत्रेति। ~~द्वयोरिदं नैकमेकस्येति इदं पदद्वयं समभिव्याहारलंबना~~

द्वयोरिदं नेदमेकस्येति इदं पदद्वयं समभिव्याहारालंबनाभिप्रायेण २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

संबंधविशेषस्यावश्यकत्वे चगौरवात्२८

११४ उभयसत्वेति। एकमात्रस्वत्ववद्बूनांतराप्रसिद्धेर्द्वयोर्मध्येयएकस्तस्येतिक्रमेणव्यधिकरणसंबं

114 धावच्छिन्नाभावस्यैवप्रसंगः। अत्रस्वनिरूपकव्यक्तिवृत्तिभेदप्रतियोग्येवएकपदार्थइतितुनसत्१ निरूपितत्व

संबंधेनतद्विशिष्टस्वत्वस्यैवसत्वात्। एकमात्रस्वत्वस्याप्रसिद्धेः। इदमत्रावधातव्यं। नव्यमतेउभयनिरूपित स्वत्वा२

[redacted] त्वेनसंसर्गताविरहेपिनानुपपत्तिः। तथाहि एकत्वसंख्यावच्छिन्नएकपदार्थः। उभयनिरूपितस्वत्वस्वीका

रेउभयानिरूपितस्वत्वंषष्ठ्यर्थः। नानास्वत्वस्वीकारेस्वत्वासमानाधिकरणस्वत्वंतदर्थः। सामानाधिकरण्यं

चैककालावच्छेदेनैकधर्मिवृत्तित्वमिति। इदंतुचिंत्यते। द्वयोर्मध्येनेकस्येत्यर्थपरेषष्ठ्यर्थाप्रसिद्ध्यापत्तेः। म

हाचार्यमतेतुनायंदोषइति। अभावेति। अयंनिर्धूमोनिर्वह्निर्त्वादिस्थलीयस्ययोयोधूमवान्सवह्निमानि

त्यादेः। प्रतिज्ञालाघवेनेदेत्विति तुनाविजातीयज्ञानजनकत्वरूपप्रतिज्ञालक्षणस्यवैजात्यासामान्येनदूष

यिष्यमाणत्वंसूचितं। साध्यादेरपिहेतुत्वात्दाह प्रकृतेति। समयवंधादिनात्रितासानुदयस्यमूलेयुक्तत्वात्।

हाव्याप्तिमिति। एकेनकिंसंबंधउभयानिरूपितस्वत्वादेर्विवक्षणीयत्वमयुक्तं। द्वयोर्मध्येनेकस्येत्येतदर्थकेऽगते

[redacted] वह्निर्मत्त्वंतच्छालिनिश्चयत्वसमनियतप्रतिबंधकतानवच्छेदकत्वंअत्रस्वरूपसंबंधरूपावच्छेद

१ प्रतिज्ञारीयमग्रपं [illegible] प्रतिज्ञात्यादितत्वज्ञेतमागौरवं३

२ आपाद्यवत्वस्येति। प्रतिज्ञार्थयोधद्वारैयजिज्ञासायोपतेतिधीधर्मकेनैव [illegible] ऋणतिद्वाय [illegible] वत्वनिवेशेयोधजनकता न विषयत्वनिवेशेआप्रतिता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

संदिग्धत्वे तज्ज्ञाप्यत्वस्यापि संदिग्धत्वात्तया संदिग्धो ४

तादृशव्याप्यभावप्रतियोगितावच्छेदकधूमत्वत्वात् — तावन्मात्रेपि —

कत्वनिवेशे निगमने ज्ञेयत्वाद्व्याप्यत्ववत्स[illegible]द्दशहेतुत्ववाच्यज्ञेयत्वादित्यादौ च हेतावतिव्याप्तेर्व्यापकत्व
व्याप्यत्वयोर्निवेशः। मुखेति। नातस्तत्रातिव्याप्तिताद्दवस्थ्यं जलत्वस्यापीति। तथाचावयविजलत्वहेतुत्वसिद्धेरि
ति भावः। उक्तयुक्त्या। साध्यस्य जलत्वस्य हेतुरपीति युक्त्या। ननु पक्षविषयत्वानिरूपितव्यापकत्वविष
यतायाः हेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यगमकतौपयिकत्वाभावान्नोदाहरणावारणं भवतीत्यत आ
ह। उक्तेति। निरुक्तरूपं च[illegible]विषयतांशे तथाविधपर्याप्तिमद्धर्मवद्विषयताशून्यत्वमित्यर्थः। [illegible]व्यस्येति। अ
यं वह्निमान्वह्निसामग्रीमत्त्वादित्यादौ ननु तद्धेतुर्भावस्तन्निरूपकत्वाभावः साक्षात्परंपरासाधारणप्रति
रूपकत्वाप्रसिद्ध्या दुर्निवेश इत्यत आह। पूर्ववदिति। प्रकृतहेतुतावच्छेदकविशिष्टहेतुत्वविशिष्टहेतुत्वत्वा
वच्छिन्नविशेष्यताशालिनिश्चयत्वव्यापकप्रतिबंधकतानवच्छेदकत्वमित्यर्थः। धूमादालोकवानित्यादौ
तथाविधनिश्चयत्वावच्छिन्नप्रतिबंधकतामादाय व्या[illegible]प्तेर्व्यापकत्वनिवेशः। जन्यत्वे निरूपकतासं
बंधेन ज्ञानस्य ज्ञाने जन्यत्वस्य वा साध्यत्वे तद्धेतुत्वेन प्रमीयमाणत्वादिति हेतौ तादृशनिश्चयत्वव्यापकप्र
तिबंधकत्वसत्वादव्याप्तेर्निश्चयत्वव्याप्यत्वमपि देयं। विषयतामात्रेति। विषयताशालिबोधजनकत्वे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११५ 115 नेत्यर्थः। तादृशेति। हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतांतर्भूततायासाध्यविषयत्वात्तद्भिन्नत्वेऽर्थः
अंतर्भूतत्वं तच्छालिनिश्चयत्वसमव्यापकप्रतिबंधकतावच्छेदकत्वं। व्याप्यत्वनिवेशप्रयोजनं प्रागुक्तं। वह्नि
मान्धूमादित्यादौ हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुविषयतांतर्भूतसाध्यविषयत्वाप्रसिद्ध्याव्या
प्तिमाशंक्य तत्र लक्षणं भिन्नमेवेत्याह। यत्र चेति। सर्वत्रैकरूपानुगतलक्षणमाह। तादृशेति। तादृशा
भयाभावविशिष्टसाध्यविषयताशालिबोधजनकत्वासत्वमर्थः। हेतुरिति। अयं हेतुरित्यत्र हेतोरेव तादा
त्म्येन साध्यत्वं द्रव्यं हेतुत्वमित्यत्र च हेतुत्वस्य तादात्म्येन साध्यत्वं बोधितिकारानिप्रेतं। अन्यथा प्रथमे हे मे
तुत्वस्य साध्यत्वेतत्वेन प्रमीयमाणत्वादितिहेतुजन्यबोधे हेतुत्वांशे हेतुत्वरूपसाध्याभानात् द्वितीये हे
तुत्वत्वस्य साध्यत्वेऽत्र हेतुजन्यबोधे हेत्वंशे हेतुत्वत्वरूप[redacted]
साध्याभानादसंगतेः। विशिष्टविषयतावह्निर्भावश्चान वह्निर्भावत्रयं किंतु एकैव तथा च साध्यताव
च्छेदकावच्छिन्नविषयतानिवेशमते हेतुतावच्छेदकवह्निर्न्तत्वहेतुत्व वह्निर्न्तत्वयोरावश्यकत्वेन गौ
रवमिति विशिष्टविषयतावह्निर्भावनिवेशः दूषणयेनाह। विशिष्टेति। हेत्वंशमनिवेश्य विशिष्टस्य दु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ज्ञानत्वेति विषयतापर्यवसन्नज्ञानसाध्यकेमुख्यत्वपर्यवसन्नप्रयोजनमत्वसं

न्निवेशनतया विशिष्य निवेशे तन्निवेशनादित्याह। स्वातंत्र्येणेति। गौरवेति। हेतुतावच्छेदकादिप्रविष्टसाध्य
कप्रतिज्ञायामुक्ताव्याप्तिश्च बोध्या। तादात्म्येन प्रमेयसाध्यकं द्रव्यसाध्यकं वाधूममादित्यादिकं न्यूनत्ता
परिहारायदर्शयतिएवमिति। ननु लिंगिविषयकत्वस्य साध्यवन्मुख्यविशेष्यकत्वार्थकत्वं परित्यज्य दर्शिष्ट तद्विशि
ता विषयतावद्धिर्मतसाध्यविषयकत्वरूपगुरुतरारंभः किमर्थमुच्यत आह। लिंगीति साध्यवत्तया वास्तविकेत्या
दिः। गुर्विति। अयं च लिंगाविषयकेत्यत्र लिंगत्वमिति पक्षे व्यापकत्वविषयताशून्यतार्थकत्वएव न तु प्रथ लिंगं ५
मकल्पेइति बोध्यं। मतांतरमवतारयति। लिंगीति। धर्मोलिंगत्वं। दर्शितेति। यन्नन्नलं तन्निःसंसहत्वप्रकारक
प्रमाविषयः यन्नद्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषयइत्यप्रदर्शितेत्यर्थः। निगमनस्येति। लिंगिविषय
ऽवयवता कज्ञानजनकत्वनियतावच्छेदकरूपवत्त्वमात्रोक्तौ निगमने लिंगविषयकबोधजनकत्वानियतावच्छे ज्ञान
उदाहरणेऽ दकरूपवत्त्वमात्रोक्तौ चातिव्याप्तिरिति दलद्वयं निवेशितमित्यर्थः। [redacted] हेतूपनययोस्त्वेकत
रविशेषणेनाघिसुवारत्वात्यागः। प्रतिज्ञात्वेति। लिंगविषयकज्ञानज्ञानजनकत्वानियतत्वेसत्त्रसामा
नाधिकरण्यप्रवेशेनसंभवः। गंधवती तरेभ्यो भिद्यते इत्यादिप्रतिज्ञांतर्भावेण प्रतिज्ञात्वस्यतत्समा

उदाहरणाविशेषेऽतिव्याप्तेः ६ ऽवयवता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११६ 116 नाधिकरणत्वात्तादृत्वांतरे सामानाधिकरण्यप्रवेशेनूदाहरणेऽतिव्याप्तिरित्यर्थः।उदाहरणावि शिष्टत्वं यन्नजलं तन्नि
स्नेहत्वप्रकारकप्रमाविषय इत्याकारकनिष्ठतद्व्यक्तित्वादि।रूपवत्वादीत्यादिना हेतुत्वबोधकविभक्तिघटितत्वल
क्षणपरिग्रहः।आत्माश्रयेति।अवयवतावच्छेदकताग्रहेऽवयवतावच्छेदकत्वविशिष्टरूपग्रहोऽपेक्षित इत्यात्मा
श्रयः।तथाविधरूपांतरपरिचयवतामेव लक्षणस्य सुग्रहत्वेत्यं आह।तथाचेति।विशिष्यानुमित्स न्यूनेत्यादिरू
पेण।स्वयंदूषणांतरमाह।अत्रचेति।केचित्तु साध्यपक्षविशेषनियंत्रितं न प्रतिज्ञात्वं तथासति प्रतिज्ञापदस्य
नानार्थत्वं स्यात्किंतु जातिविशेषः कार्यतावच्छेदकत्वादीनामिव शक्यतावच्छेदकताया अपि जातिसाधकत्वादि
त्रौ तिवदंति तन्मतं दूषयति मूले प्रतिज्ञात्वमिति।अनतिप्रसक्तोपादानं च न्यायबहिर्भूतप्रतिज्ञासमानाकारवा
क्यसाधारणपशंकावारणाय।नांत्रिकेति।शक्यतावच्छेदकत्वेव जातिसाधिकाव्यवहारस्तु तांत्रिकेषु प्रसिद्ध इति
भावः।देवदत्तप्रभवत्वादिनेति।देवदत्तप्रभवतावच्छेदकवैजात्येनेत्यर्थः।अथैतद्वैजात्यं देवदत्तजन्यपंचाशद्वर्णा
नुगतं तथाचैतद्वैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरितप्रतिज्ञायां।प्रतिज्ञात्वं विहाय निरुक्तवैजात्यमुदासी
नवर्णे देवदत्तोच्चरितप्रतिज्ञायां च तद्द्वयसमावेशरूपसंकर इति न संभवति निरुक्तवैजात्यस्यैव सिद्धांतेऽसी

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

कर्त्तुमशक्यत्वात्। तस्य पंचाशद्गुणो नुगततया कत्वगत्वादिना संकरात्। तादृशवैजात्यं विहाय कत्वादियज्ञदत्तोच्चरित
ककारादौ। कत्वादिकं विहाय तादृशवैजात्यं देवदत्तोच्चरितत्वं ककारादौ। देवदत्तोच्चरितककारादौ कत्वतादृशवैजात्ययोः
समावेशात्। यदि च पंचाशद्गुणेषु देवदत्तप्रभवतावच्छेदकवैजात्यमेकमनुगतं न स्वीक्रियते येन नोक्तदोषः स्यात्। किं
तु देवदत्तमात्रोच्चरितककारमात्रसामान्य एव। एवं च देवदत्तमात्रोच्चरितककारमात्रसामान्यवृत्तिवैजात्यं वि
विहाय हायप्रतिज्ञात्वं[redacted] यज्ञदत्तोच्चरितप्रतिज्ञासु प्रतिज्ञात्वं तादृशवैजात्यं[redacted]दत्तोच्चरितककारे स[redacted]। देवदत्तो इत्यन
च्चरितककारघटितप्रतिज्ञायामुभयोः समावेश इति सांकर्य्यमुच्यते तदा कत्वादिकमादायैव प्रतिज्ञात्वस्य सां
कर्य्यं संभवति। कत्वं विहाय प्रतिज्ञात्वं ककाराघटितप्रतिज्ञायां प्रतिज्ञात्वं विहाय कत्वमुदासीनककारे ककारघ
तदुभय टितप्रतिज्ञायां समावेशादिति देवदत्तप्रभवत्वानुधावनमसंगतमेवेति चेन्नैव म्। प्रतिज्ञात्वस्य जातित्ववा
दिभिरेकदेशातिव्याप्तिवारणाय व्याप्यवृत्तित्वं स्वीकार्यं (अंशिकत्वं च न दोषाय) तुल्ययुक्त्यापरिकल्प्य
वैजात्यमपि न्यायान्तर्गतपर्वतो वह्निमानिति वाक्य उदासीनपर्वतो वह्निमानिति वाक्य साधारणं देवदत्त धा
मात्रोच्चरितपर्वतो वह्निमानिति वाक्यव्यतिरेकं एवं च देवदत्तमात्रोच्चरितवाक्यवृत्तितादृशवैजात्यं विहा
मात्र

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विहाय—

११८ यप्रतिज्ञात्वंयज्ञदत्तोच्चरितपर्वतोवह्निमानितिप्रतिज्ञायांप्रतिज्ञात्वंतादृशवैजात्यंदेवदत्तोच्चरितोदासीनप
117 र्वतोवह्निमानितिवाक्येतदुभयसमावेशश्चदेवदत्तोच्चरितन्यायांतर्गतपर्वतोवह्निमानितिप्रतिज्ञायांकल्पित
वैजात्यमपिव्यासज्यवृत्त्येवेतिएकधर्मावच्छिन्नपर्याप्तत्वरूपएकत्रसमावेशइतिकल्पितवैजात्यानुसरणं।
प्रतिज्ञात्वस्य एवंचकल्पितवैजात्यस्यैकत्वादिनासहनैकधर्मावच्छिन्नपर्याप्तत्वरूपएकत्रसमावेशः।कत्वादीनामव्यास
ज्यवृत्तित्वाद्वित्वेनतत्सांकर्यशंकावकाशः।एतेनेत्यादि।वक्ष्यंतमवक्ष्यंतं चपरिचापकंतेनैकदेशस्यप्रतिज्ञा
तदितरसमुदायस्यचव्युदासः।साधनांगं।न्यायघटिका।पक्षपरिग्रहेपक्षेसाध्यग्रहे।प्रमाणंज्ञापकं।प्राथ
म्यात्।प्रथममुचितत्वात्।समयबंधः।सदृष्टांतोदाहरणेनशब्दानित्यत्वंसाधनीयमित्यादिसंकेता।मि[illegible]ला
पः।शब्दानित्यत्वंसाधयेत्याकांक्षायां।शब्दानित्यत्वंकथमितिप्रश्नोवादिनःप्रतिवादिनः।यद्यपिविप्रति
पत्तितःसंशयोत्तरंपर्वतेवह्निर्निर्णयोजायतामित्येकतरकोटिकनिर्णयेच्छैवयुक्तातथापिप्रतिवादिवन्म
ध्यस्थस्यापिपर्वतस्यवह्न्यभाववत्त्वएवनिर्भरात्कोवह्निमानित्येवाकांक्षेतिप्रदर्शनायवादिनइत्यस्याप्यभि
धानं।तथाचानित्यःकइत्येवाकांक्षाबोध्या।यद्वाहेत्वर्थोन्वयाद्यपदिसाध्यवानित्येवप्रतिज्ञानीयात्तदा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

कोवह्निमानिति जिज्ञासास्यादतः पक्षः साध्यवानिति प्रतिज्ञाकार्येतिदीधितिकाराभिप्रायः। साध्यं हेत्वप
न्यासेन। साध्यनिर्देशं प्रतिज्ञां। तथा च हेत्ववयवार्थस्य साध्येऽन्वयं विना जिज्ञासानिवृत्त्यसंभवात् साध्यो
पस्थितये प्रतिज्ञावश्यकीति भावः। अतिप्रसंगात्। पदानुस्थितस्य विशेष्यतयाऽन्वये द्रव्यत्वावच्छिन्नेपि घटमादिसा
दिहेत्ववयवार्थान्वयप्रसंगात्। प्रतिवादीति। उक्तविप्रतिपत्तिः अभावकोटावेवप्रमाणमिति विरुद्धप्रतिपत्ति
जनकवाक्येनेत्यर्थः। यदि विप्रतिपत्तिपदं तदेकदेशपरं तदा नेत्याकारकप्रतिवादिवाक्यमेव प्रतिवादिविप्र
तिपत्तिरिति बोध्यम्। प्रमाणादीति। न्यायमते नैवमयाशब्दानित्यत्वे प्रमाणं वक्तव्यमित्यादि समयबंधे
नेत्यर्थः। सर्वमिदं तयोरावश्यकत्वे स्याच्चदेवनेत्यत आह। परेति। निराकांक्षत्वादिति। जनितान्वयबोध
कत्वादिति भावः। शंकतेन चेति। अवयवांतराणां। उदाहरणादीनां। अतदर्थत्वात्। हेत्वन्वययोग्यसाध्यो
पस्थापकत्वासंभवात्। पक्षविशेषणतापन्नसाध्यस्यैव हेत्वन्वययोग्यत्वादिति भावः। तदनुत्थानात्।
प्राकृनिगमनोत्थानासंभवात्। कथायामाकांक्षाक्रमेणैवाभिधानादिति भावः। अवयवांतरेण। उप
नयेन। व्याप्तिरेवसुदाहरणे साध्यवाचकपदानावाच्छकायास्तुच्छत्वमिति उदाहरणत्यागः। आक्षेपा

अवयवांतराणाधिलादिमत्वं फलित्वमदरस्पते

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

इति भावः॥ अयं चापूर्वस्य वाच्यतां विना यागस्य कामिकार्यताबोधस्याभाविनोनुपपत्त्या मीमांसकैरुपेतः प्रतीतेति॥ ४

कल्पनं विनापि भावि २

यथा

११८ 118 त्। उपनयेन प्रतीतस्य अर्थानुपपत्त्या साध्यवत्तया पक्षानुमानादित्यर्थः। तथा च हेत्वन्वययोग्यसाध्योपस्थि तेन
त्तिरिति भावः। साध्यान्वये इति। साध्ये हेत्ववयवार्थान्वये उदाहरणानंतरं साध्यव्याप्यवान्नकइत्याकांक्ष
योपनयाभिधानमित्यर्थः। दूषणांतरमाह। तस्मादिति। उपनयादित्यर्थः। पक्षस्य साध्यवत्त्वं [redacted] तद्या प्रतीतेति
प्यवत्त्वप्रतीतिसंभवात्। प्रतीतसाध्यव्याप्यवत्त्वान्यथानुपपत्त्या साध्यवत्त्वकल्पनस्योपनयोत्तरकालीनतया
हेत्ववयवप्रयोग एवनभवेदिति भावः। परोपस्थितार्थस्यैव शाब्दबोधे भानात् तथाविधपक्षस्य साध्यवत्त्वमप्रयोजकमित्य
पि द्रष्टव्यम्। निबंधकृतां मतमाह। अन्ये त्विति। नाकांक्षा न प्रश्नः। विशिष्टे शाब्दानित्यत्वे विशिष्टे। न शक्याभिधानं। नवि ग्राहकत्व
शिष्टबोधाभिप्रायं युक्तं हेत्वंपदेन बोधयितुं शक्यम्। वादीति। वादिप्रतिवादिनोः साध्यविवादे वस्तुगत्यायत्साध्यं
तत्प्रश्नाभावादित्यर्थः॥ ॥७॥ ॥७॥ अन्यथाप्रतिज्ञां विना। ननु हेतुविभक्तिमत्त्वमित्यस्य हेतुत्वबोधक
विभक्तिमत्त्वमर्थः। तत्र धूमादालोकवान्पर्वतो वह्निमानिति प्रतिज्ञायां यो यो धूमवान्स वह्निमान् यथा धूमा
त्र वह्निमन्महानसमित्युदाहरणे पर्वतो धूमादालोकवद्वृत्तिवह्निमानित्यादिस्थलीयधूमादालोकसमानाधि
करणवह्निव्याप्यधूमवानित्युपनये च किं वालोकाद्वह्निसाध्यकप्रतिज्ञोदाहरणोपनयेषु चातिव्याप्तेरकथने

प्रतिसाकृतरं। पंचवाक्यपूरणाय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नन्वनन्तेसाशंक्याह प्रतिज्ञेति। विवक्षणीयेति। तथा चोक्तस्थलेषु यथाश्रुतार्थेऽतिव्याप्तेरग्रेवक्ष्यमाणपरिष्कृ
तद्धेतुम[redacted]विभक्तिमत्त्वनिवेशेऽभावान्निगमनमात्रानुसरणमिति। नन्वेतादृश विषयत्तावच्छिन्नेत्तविषयता
शून्यत्वमेवास्तु किंसाध्यांशनिवेशेनेत्यतआह। साध्यांशे ति अखंडाभावघटकसाध्यांशनिवेशेऽग्निम
त्यतिरेक्युदाहरणस्यनिरुक्तविषयतावच्छिन्नेतविषयताशालिबोधजनकत्वेनैववारणसंभवात्तद्दलवैयर्थ्यं
स्यात्तानवविषयतावच्छिन्नेत्तसाध्यविषयताभिन्नातादृशविषयतावच्छिन्नेत्वसाध्यीयत्वोभयाभाववतीवाया
साध्यविषयतात्तच्छून्यत्वमित्यर्थोस्त्विति वाच्यम् द्वितीयस्यसाध्यस्यासंभववारकत्वेपिप्रथमस्यतस्याखं
डाभावसंपादकत्वानपायात्। गौरवस्यत्वाधिकत्वात्। दलांतरंहेतुविभक्तिमत्त्वदलं। [redacted]। पूर्वोपदर्शि
तेत्याद्यग्निमस्यानुषंगपक्षाभिप्रायकतया। ननुषंगपक्षे इदमेवसाध्याविषयकत्वमावश्यकं अवतारिका
इति तु अनुषंगपक्षेत्वो ध्यं[redacted]। एवेति प्रतिज्ञालक्षणेत्यर्थः[redacted]। अत्रपूर्वोपदर्शितप्रतिज्ञाजन्यबोधीयसा
ध्यविषयताशून्यत्वंननिवेश्यंनिगमनातिव्याप्ते[redacted]प्रकृतपक्षविशेष्यतानिरूपितानेदसंबंधावच्छि
न्नप्रकारतापन्नसंबंधांशेनिरूपितत्वसंबंधावच्छिन्नसाध्यप्रकारतायाअनुगतरूपेणशून्यत्वंतथाच श्र
रित्यतआह ...ति। तादृशसंबंधावच्छिन्नपक्षविशेष्यतानिरूपितसाध्यप्रकारतायाः १

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११८ 119

वह्न्यादिसाध्यकनिगमनवारणायैकविधसाध्यविषयकत्वमिति शेषः। एतन्मूलपर्यंतसाधारणं निरूपितत्वं नास्तीति स्वरूपसंबन्धः पर्याप्तौ शेषः तथा

निगमनजन्यबोधीयसाध्यविषयतायाः तादृशविषयतानिरूपितसंबंधविषयतानिरूपितविषयतारूपत्वान्नातिव्याप्तिरिति। इतरभेदादिसाध्यकनिगमनानां वारणाय तादृशतादृश साध्यविषयताशून्यत्वकूटं द्रष्टव्यं। हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुजन्यबोधे हेतुत्वे आधेयतासंबंधेन विशेषणतापन्नप्रमेयांश एव प्रकारत्वं न तु अभेदसंबंधेन विशेषणतापन्नप्रमेयांशप्रकारत्वं प्रमेयत्वस्येति नाव्याप्तिः साक्षात्त्वपर्यन्तं त्यादौ। पक्षतेति। नन्वयं वह्निमान् वह्निमत्त्ववत्ता वृत्ति धर्मशून्यत्वादित्यादौ हेतावेवमप्यव्याप्तिरिति चेन्न। सिषाधयिषान्यायप्रयोगानंगीकारात्। तदंगीकारे तु प्रकारतावच्छेदकत्वानापन्नत्वेन पक्षतावच्छेदकं विशेषणीयं। एतेन पक्षतावच्छेदकावच्छेदेन साध्यसाधनस्योद्देश्यत्वे तस्य सामानाधिकरण्येन साध्यस्य हेतुघटकत्वे सिषाधयिषाया अनपेक्षणेपि न क्षतिः। केचित्तु तदव्याप्तिवारणाय पक्षमुख्यविशेष्यत्वस्यावश्यकतया पक्षतावच्छेदकावच्छिन्नत्वमर्थमेवेत्याहुः। अननुषंगपक्ष इति। इदं विशेषणं अनुषंगपक्षे निगमनसामान्यवारकं न त्वननुषंगपक्षे एतत्पक्षे हि पक्षतावच्छेदकावच्छिन्नत्वविवक्षात्यागेपि वह्निमद्वृत्तिधर्मशून्यत्वादिति हेतुसंग्रहाय मुख्यविशेष्यतोपादानेपि तस्माद्वह्निमानित्यादिकं कतिपयनिगमनमेव वार्यते न सर्वं तस्मादितरेभ्योपि घ

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तेइत्यादौ भेदाश्रयत्वायाएवात्वयातोर्थस्यमुख्यत्वेन भानादितिभावः एतत्कल्पस्यद्वितीयकल्पस्य अयंतस्मादि
तरभेदोभिधतेइत्यनुषंगपक्षः। यद्दंडादिति। दंडसंयोगाजन्यत्वमात्रोक्तौ दंडरूपेव्यभिचारवारणायद्रव्यत्वनिवेशः।
द्रव्यत्वमात्रस्यघटादौव्यभिचारइतिदंडसंयोगाजन्यत्वनिवेशः। यद्दंडाज्जातंतद्दंडसंयोग जन्यद्रव्यमितितुनो
दाहरणंदंडरूपेव्यभिचारात् हेत्वभावालाभाच्च। दंडरूपेचदंडसंयोगाजन्यद्रव्यत्वाभावसत्वान्नव्यभिचारः।
सिद्धांतेतुविशिष्टाभावस्यातिरिक्ततयाव्यापकत्वं। अनतिरिक्तत्वेतुवैशिष्ट्यावच्छिन्नप्रतियोगिताकाभावत्वेन
वाच्यं। अन्वयुदाहरणस्येति। यद्दंडसंयोगाजन्यद्रव्यत्ववत्तन्नदंडाज्जातमित्यादेः। वह्निमान्धूमादित्यादिस्य
लीयस्येवचाएवंचान्वय्युदाहरणेएवातिव्याप्तिसंभवेव्यतिरेकिपर्यंतानुधावनंव्यर्थमित्याशयः। अत्रयद्दं
डाज्जातत्वाभावाभाववत्तद्दंडसंयोगाजन्यद्रव्यत्वाभाववदितिव्यतिरेक्युदाहरणस्यापिसंभवादन्वयि
पदंचिंत्यं। प्रथमकल्पेवह्निर्नैतत्साध्यविषयतासत्वादेवातिव्याप्त्यभावाद्द्वितीयकल्पेइति। ननुसाध्यविष
यतानिरूपितस्वार्थविषयताकबोधोननिवेश्यतेयेनोक्तदोषवारणायविनक्तिनिवेशःस्यात् किंतुसाध्य
विशेष्यतानिरूपितस्वार्थप्रकारताकबोधएवविनक्तित्वानिवेशेनलाघवादित्यतआह। विशेषणत्वेति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

साध्याभावत्वेन व्यतिरेकव्याप्य २

१२० सिद्धविभक्तित्वनिवेशानुरोधेन विशेषणत्वस्यैव निवेशो नास्तीति भावः। अत्र दीधितिकाराणां हेतुत्वमभिधेयं [redacted]

120 त्व [redacted] इतरभिन्नत्वं वा हेतुत्वादिस्थलीयोपनये विभक्तिव्यावृत्तिप्रदर्शनं किं प्रथमकल्पं किं वा द्वितीयकल्पमभिप्रेत्य उभ

यथापि न संभवतीत्याशंकते। न चेति। व्याप्तिघटकतयेति इतरभेदसाध्यकेष्वुपनयेऽन्वयव्याप्तिप्रवेशमभिप्रेत्य

द्वितीयकल्पाभिप्रायकत्वं चेद्व्यावृत्तिदानस्योच्यते तदा ऽतिव्याप्तिलापनं वास्तीत्याह। अनुषंगपक्ष इति। इदंपदा

र्थस्योपनयघटकेदंपदार्थस्य। एतेन साध्यान्वितस्वार्थबोधकपदशालित्वमात्रेणोपवारणमुक्तं। अनन्वयात्

भिन्नवाक्यत्वेनेत्यादिः। ननूपनयघटकायंपदस्यावृत्तिरेवानुषंगः तथा च निगमनेऽपस्याप्यसाध्यान्वितस्वा

र्थबोधकत्वं हेतुत्वबोधकोक्तोपनयघटकायंपदस्याक्षतमेवेति व्यावृत्तिः संभवतीति चेन्न। उपनयघटका

यंपदसदृशपदांतरस्यावृत्तिरेवानुषंगः न तूपनयघटकस्यैवावृत्तिस्तथेति द्वितीयकल्पेऽतिव्याप्त्यलग्नक

त्वस्याशयः। न च तथापि निगमनघटकायंपदस्य योऽर्थः स एवोपनयघटकतत्पदस्यापीति द्वितीयकल्पे सा

ध्यान्वितस्वार्थबोधकत्वसंभवादतिव्याप्तिर्लगत्येवेति वाच्यं स्वजन्यपदार्थोपस्थितिसहकारेण साध्यान्वि

तस्वार्थबोधकत्वासंभवादतिव्याप्त्यलग्नकत्वेत्याशयात्। तथापि पक्षविशेषणतया साध्यविषयत्वमादा

साध्यान्वितस्वार्थबोधकत्वनिवेशो दीधितिकृदभिप्रेतः उपनयघटकायंपदस्य तुल्यजन्योपस्थितिसहकारेण २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्वनित्यज्ञानत्वान्य

प२ दि२

यथा व्याप्तिः स्यादित्यत आह अननुषंगपक्षे चेति। अप्रयोजकत्वादिति। तस्यानुषंगपक्षाभिप्रायकत्वादिति भा
वः। अभावसाध्यकेति। हेतुत्वपक्षकेत्तरभेदसाध्यकहेतुत्वलोहेतुके इत्यर्थः। प्रकृतेति। अयं न धूमाद्गुणत्वाभाववान्
रूपत्वादित्यादौ यः धूमाद्गुणत्वाभाववान् सरूपत्वाभाववानित्युदाहरणस्य धूमाद्गुणत्वाभावस्य यः
कालिकसंबंधावच्छिन्नाभावः विषयितासंबंधावच्छिन्नाभावः विशेषणतासंबंधावच्छिन्नाभावो वा तस्य विशे
षणतासंबंधावच्छिन्नाभावस्य साध्यत्वे कालत्वादौ हेतौ यः धूमाद्गुणत्वाभावस्य यः कालिकसंबंधावच्छिन्ना
भाववान् सकालत्वाभाववानित्युदाहरणस्य च वारणाय प्रकृतेति। स्वार्थबोधजनकेति। स्वार्थे भानप्रयो
जकेत्यर्थः। क्वचित्तथैव पाठः। शाब्दबोधस्वरूपयोग्यहेत्ववयवसंग्रहाय आकांक्षादीति। निरुक्तसाध्यविषयत्वश
न्यशाब्दबोधजनकत्वं केवलहेत्वर्थबोधमादाय साध्यान्वितस्वार्थबोधकविभक्तिमत्त्वं तु प्रतिज्ञाहेत्वर्थवि
शिष्टवैशिष्ट्यबोधमादायेति। एकधा शाब्दबोधनिवेशेन संभवतीति ध्येयं। यद्यपि साध्यान्वितस्वार्थभान
प्रयोजकाकांक्षा साध्यवाचकपदे नैवेति तन्निवेशेत्यर्थस्तथापि धूमादालोकवानिति पूर्वोक्तोदाहरणे
आर्द्रेन्धनशून्यत्वादिति या पंचमी तस्याः साध्यान्वितस्वार्थविषयताप्रयोजकत्वेन नमविषयोदाहरणं घट

तेत

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२१ कथं चम्या अपि प्रयोजकत्वादित्याप्तिरतः आकांक्षाप्रकृतिसमभिव्याहाररूपाणि विष्ठा। आदिनायोग्यता तात्प
121 र्यपरिग्रहः। तत्र योग्यता स्वार्थरूपविशिष्टविषयकत्वं न तु स्वार्थघटकपदार्थीयनिरूप्यनिरूपकभावापन्नविष
त्यादि यताकूटं तेन पर्वतो वह्निमान् द्रव्यादिस्थले द्रव्यादिसांशेना तिव्याप्तिः द्रव्यनिष्ठस्वज्ञानजनकत्वसामान्यज्ञानवि
षयत्वनिरूपकत्वबोधस्य सामान्यत्वावगाहित्वेपि तादृशविशिष्टाविषयकत्वात्। तात्पर्यं च निरस्तात्पर्यकशुका
च द्युक्तस्यार्थान्तरपरस्य धूमादित्यादिवाक्यस्य वारणाय। अनुषंगपक्षे हेतुपदसार्थक्यं शंकते नेन चेति। विशेष
णेति। प्रमेयव्याप्यवाच्यत्ववदिदमित्युपनये इदमंशेऽभेदस्य विशेषणत्वात्पक्षीभूतसाध्यान्वितस्वार्थबो
धकत्वं प्रथमाविभक्तेरित्यतिव्याप्तिरित्यर्थः। योयइति। धूमाद्वह्निमन्महानसस्तद्भिन्नश्च धूमवान् धूमाद्वह्नि
मन्महानसस्तद्भिन्नः धूमव्यापकवह्निमांश्चेति बोधः। व्यापकतायामानसबोधविषयत्वापत्तेः धूमाद्वह्निमन्म
हानसो वह्निमानिति बोधानुदयात्। अपर्यवसितोद्देश्यतावच्छेदककोटिनिविष्टतया तथाविधबोधेन बाधक
मिति चेन्न। रक्तदंडवान् दंडवानित्यादौ शाब्दबोधवारणाय दंडवत्यरक्तवान् दंडवानित्यादेः संग्रहाय चावच्छे
दकविशेषणतानापन्नोद्देश्यतावच्छेदकतायाएव बाधकत्वादिति। येत्तु उद्देश्यतावच्छेदकतापर्याप्त्यधिकर

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

णस्य विधेयतावच्छेदकतापर्याप्त्यनधिकरणत्वे शाब्दबोधः रक्तदंडवान् दंडवानित्यादावपि दंडवान् रक्तदंडवानि
तिवत् नवत्स्येवेति वदंति तेषामुक्तबोधो नवत्स्येवेति। इत्यादिके चिदित्यंतं मतांतरं अननुषंगपक्षे प्रकृतहेतुवि
शिष्टहेतुत्वविषयतावच्छिन्नत्वसाध्यविषयताशून्यशाब्दबोधजनकत्वे सति साध्यान्वितस्वार्थबोधकविभक्ति
शालित्वं लक्षणं। अनुषंगपक्षे तु प्रकृतपक्षविशेषणतया साध्यविषयकत्वशून्यशाब्दबोधजनकत्वे सति प्र
कृतपक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधकपदशालित्वं लक्षणं। न तु पदे विभक्तिमत्त्वमपि प्रयोजना
भावात् पक्षविशेषणतापन्नसद्भावासद्भावाभ्यां लक्षणभेदस्येष्टत्वादिति भावः। साध्यान्वितेति पक्षविशेष
णतापन्नेत्यर्थः। तत्कल्पे। अनुषंगकल्पे। उपनयघटकस्यैवायं पदस्यावृत्तिः अनुसंधानरूपा न तु तत्सदृ
शपदस्येत्याशयेन सिद्धांतयति। वस्तुतस्त्विति। निगमनेति तदर्थसाध्यविषयतानिरूपितेदंपदार्थविषयता
कबोधजनकत्वेन। ननु विभक्तित्वं सुप्तिङन्यतरत्वं तान्निवेशगौरवं अनुषंगपक्षे इदंपदार्थसाध्यबो
धो निगमनजन्य एव नोपनयजन्य इति बोधे लाघवेन स्वजन्यत्वस्यैव निवेशादुपनयवारणादित्यत आ
ह। तादृशबोधे चेति। साध्यीभूतेति। ज्ञानाज्ञानाद्युत्पन्नमित्यत्र पंचमीविभक्त्यर्थस्य विशेष्यतया प्रकृत्यर्थप

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२२ पर्वतभिन्नत्वप्रकारकज्ञानाभावेऽन्वितत्वेन तादृशप्रकृत्यर्थस्य साध्यतया चेत्यादिः। नन्वेताव[illegible]तापि नाति
122 व्याप्तिर्भवति। पक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधकताया विभक्तावभावादित्यत आह। प्रथमेति। त
था च प्रथमकल्पे केवलसाध्यान्वितस्वार्थबोधकत्वमेव विभक्तौ निविष्टं न तु पक्षविशेषणतापन्नसाध्यान्वि
तस्वार्थबोधकत्वमित्यर्थः। ननु तथापि पंचम्यर्थो निरूपितत्वमेव न तु हेतुत्वं तथा च हेतुतावच्छेदकविशि ष्टहेतुबोधशि
ष्टहेतुत्वविषयतावद्धिर्नूतप्रकृत्यर्थरूपसाध्यविषयताशालित्वात्कथमतिव्याप्तिरिति चेन्न। न ह्यत्र पर्वत
भिन्नत्वप्रकारकज्ञानाभावजन्यमिति दृष्टांतः किंतु पर्वतभिन्नत्वप्रकारकज्ञानाॅप्रमेयत्ववत्पर्वतत्वज्ञा भावा
नं तस्यैव पर्वतभिन्न[illegible]त्वप्रकारकज्ञानाभावादुत्पन्नत्वादिति दीधितिभावः। अत्र च पंचम्याः प्रमेयत्वा
न्वये ज्ञानज्ञाप्यत्वार्थकतया तथाविधवह्निर्नूतसाध्यविषयताशून्यत्वादतिव्याप्तिः। अत्र पर्वतभि
न्नत्वप्रकारकज्ञानाभावात्प्रमेयत्वं तादृशज्ञानाभावात्प्रमेयत्ववद्धूमो वा उत्पन्नपदपरित्यागेन ता
दृशज्ञानाभावाज्ज्ञानमिति व्याख्यानानि बोध्यानि। प्रथमकल्पे इति। द्वितीयकल्पे तत्र तन्निवेशादेव
तत्र नातिव्याप्तिः। ननु इत्यत आह यदि चेत्यसंगतमिति चेन्न। इत्यत इत्याशंकायां यदि चेत्यादिना हेतायां

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यान् नादिपर्वतभिन्नत्वप्रकारकज्ञानाभाववान् येन तज्ञाप्यप्रमेयत्ववान् स्यात् द्रव्यत्वात्सत्तावान् [redacted] गुण इत्यादिप्रयोगात्. ४

तदेत्यादिना समाधानमाहेत्यर्थेनासंगतिः समवायेति। समवायसंबंधावच्छिन्नतयाविधज्ञानाभावस्य
साध्यहेतुभावेयः पर्वतभिन्नत्वेन जानाति स पर्वतभिन्नत्वेन जानाति यथा पर्वतभिन्नत्वप्रकारकज्ञानाभा
न वात् उत्पन्नज्ञानवान् प्रमेयत्ववच्चैत्राभावेति न सद्दृष्टांतोदाहरणासंभवः। जन्यज्ञानस्याव्याप्यवृत्तितया साध्यानधिक
रत्नोन जीवः ईश्वरस्तु नीयो यन्न ज्ञान [redacted] इत्यनयोर्न दृष्टांतता संभवतीत्युपेक्षितं। तादृशेति मज्ञानसत्वप्रकारके ति
त्यर्थः। साध्यस्येति। पर्वतभिन्नत्वेन ज्ञानाभाववान् पर्वतरूपादित्यादौ यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतश्चैन्यो रूप
यथा पर्वत[illegible]भिन्नत्वप्रकारकज्ञानाभावादुत्पन्नज्ञानमित्युदाहरणेन प्रथमरीत्या साध्याविषयकत्वं। पर्वतो रूपया
पर्वतभिन्नत्वेन ज्ञानाभावादित्यादावुदाहरणेन साध्यान्वितस्वार्थबोधकविभक्तिमत्त्वमिति साध्यहेत्वोरेकपादर
इत्यर्थः। असंसर्गाग्रहविधया बाधज्ञानाभावविधया। तादृशज्ञानाभावस्य पर्वतभिन्नत्वप्रकारकज्ञानाभा
वस्य। अयं पर्वत इति ज्ञानं प्रति अयं पर्वतान्य इति ज्ञानस्य [redacted] विरोधित्वात्किं भाव [redacted]
व नन्वेयं पर्वतान्तरेत्यादिदीधितिरसंगतः यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्व
प्रकारकज्ञानाभावादुत्पन्नज्ञानमित्युदाहरणे पंचम्याः प्रकृत्यर्थान्वितत्वं वक्तं तत एव प्रकृत्यर्थस्य तु वस्तु

न २

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विशेष्यविशेषण[illegible] स्वभिन्नत्वं यदि स्वनिष्ठावयवत्वपर्याप्त्यनधिकरणत्वं तदा स एव दोषः अ
नुयोगितयाध्ययवत्वपर्याप्त्यधिकरणप्रवेशो गौरवमतः स्वाघटकेति अन्वयः विशेष्यविशेषणभावाधारणः तेन न विभक्तित्वेऽपर्यवसि
१२३ गत्या पर्वतः पर्वतभिन्न[redacted]त्वप्रकारकज्ञानाभाववानिति प्रतिज्ञाघटकपदोपस्थित[redacted]तयाऽवयवांतरोपस्थि
123 तार्थान्वितस्वार्थबोधकतायाः अक्षततया अतिव्याप्तिस्तादवस्थ्यापादि स्यत आह स्वभिन्नेति उदाहरणाद्युद्धे ज
य ननीये स्वघटकपदजन्योपस्थितेरेव सामग्र्या घटितात्वं तु प्रतिज्ञाघटकपदजन्यपर्वतभिन्नत्वप्रकारक
ज्ञानाभावोपस्थितिस्तथा च तत्संवलितयोदाहरणघटकपंचम्यर्थोपस्थितेरेकसामग्रीघटकत्वाभावे
न स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण अवयवांतरघटकपदोपस्थापितार्थान्वितस्वार्थबो
धकत्वाभावान्नातिव्याप्तिरिति भावः [redacted] न चैवमनुषंगपक्षेऽद्भुतिः अत्र यद्य
पि स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण तत्पदार्थान्वितस्वार्थबोधकत्वघटित एकः कल्पः स्वा
घटकपदजन्योपस्थितिसहकारेण तत्पदार्थान्वितस्वार्थबोधकत्वघटितोऽपरो न योश्च कल्पयोस्तस्माद्
ह्निमानिति निगमने अनुषंगपक्षे उपनये कवाक्यतासत्वेपि तथाविधस्वार्थबोधकविभक्तिमत्त्वाभावा
त्साध्याविषयकत्वमनर्थकमेवेत्यनुषंगपक्षे इत्ययुक्तं तथापि अननुषंगपक्षे तस्मादितरेभ्यो भिद्यत इति
निगमनेऽतिव्याप्तिः उपनयघटकार्थपदार्थान्वितारव्यातार्थाश्रयताबोधकत्वादतः साध्याविषयकत्वं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

सार्थकं भवतीत्यनुषंगपक्ष इत्युक्तं। तत्र पक्षे तूपनयघटकमयंपदं निगमनघटकमेवेति स्वाघटकपदजन्योपस्थिति
सहकारेणेत्यनेनैव दर्शितं निगमनवारणात्साध्याविषयकत्वं वैयर्थ्यमिति। अथैवमनुषंगपक्षेपि स्वाघ
टकेत्यादिकल्पेतत्सार्थक्याभावेपि स्वभिन्नावयवघटकेत्यादिकल्पे[redacted]त्तस्मादित्तरेभ्यो भिद्यत इति निग
मने एवानुषंगपक्षे उपनयघटकस्यैवायंपदस्यावृत्तिरनुषंग इति स्वभिन्नावयवघटकपदजन्योपस्थि
तिसहकारेणास्याता थो अयत्ता बोधकत्वादति व्याप्तिरतः साध्याविषयकत्वं सार्थकमेव। उपनयघटकस्यायंपद
स्य स्वघटकत्वेपि स्वभिन्नावयवघटकत्वादिति चेन्न। उपनयघटकस्यायंपदस्यैवावृत्तिर्नानुषंगपदार्थः किं
तूपनयघटकायंपदसदृशस्यायंपदस्येति उपनयघटकायंपदस्य स्वभिन्नावयवघटकत्वेपि तत्सहकारेण
निगमनस्य न बोधजनकत्वमित्याशयात् तथा चा[redacted]स्वभिन्नावयवेत्यादि प्रथमकल्पे नायं दोष इति। नन्वे
वं वैयर्थ्यशंकालापनेपि संदर्भाः शुद्धिरेव हेतुतावच्छेदकं विशिष्टेत्यादि प्रथमरीत्या साध्याविषयकत्वनिवेश
कल्पे यदि चेत्यादिना दीधितिकारैः स्वरूपाहरणे ऽतिव्याप्तिमाशंक्यावयवांतरोपस्थापितेति समाधानस्य प्रदर्शि
तत्वात्तस्य स्वभिन्नावयवघटकेत्यादिपरिष्कारस्य कृतत्वेन प्रथमरीत्या साध्याविषयकत्वस्य चानुषंगपक्षा

विशिष्टहेतु ३

चैत्रः पचतीति प्रतिहानुभावनमिति ४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२४ 124 ऽभिप्रायकत्वाभावादनुषंगपक्षमवलंब्य साध्याविषयकत्ववैयर्थ्याभिधानस्यायुक्तत्वादिति चेन्न। प्रथमरी
त्यासाध्याविषयत्वकत्वस्यानुषंगानानुषंगोभयपक्षाभिप्रायकत्वेबाधकाभावादनुषंगपक्षमादाया[redacted]शंका
संभवस्यैवाऽयं चशंकास्वाघटको[redacted]त्वादिपरिष्कारेऽकृत एवागतेतिध्येयं। अत्रप्रथमरीत्यासाध्याविषयक
त्वस्यानुषंगानानुषंगोभयपक्षाभिप्रायकत्वेपि अवयवांतरेत्यादिपरिष्कारः प्रथमरीत्यासाध्याविषयकत्व
घटितलक्षणैकार्थ इति चेन्नः पचतीत्यादिप्रतिज्ञाघालोचयितृणां महाचार्याणामभिप्रायः। येतु ताहृशप्रति
ज्ञामनालोचयंतः प्रथमरीत्यासाध्याविषयकत्वस्यानुषंगानानुषंगपक्षाभिप्रायकतयायदिचेत्यादिनो
तत्र दाहरणेऽतिव्याप्तिरुक्तोत्त[redacted]त्यादिनासमाधानद्वयमुक्तंतत्राद्यमननुषंगपक्षएवानुषंगपक्षेतुद्वि
तीयमितिवदंति तन्मतमाह। प्रथमरीत्येति। इयं। अवयवांतरोपस्थापितेत्यादिप्रथमरीत्यासाध्याविष
यकबोधजनकत्वे सति स्वाघटकपदजन्योपस्थितिसहकारेणतत्पदार्था[redacted]न्वितस्वार्थबोधकविभक्तिम
त्त्यायावयवत्वमननुषंगपक्षे निर्गलितार्थः। नचाननुषंगपक्षमभिप्रेत्य भवतीयं विवक्षासाध्याविषय
कत्वं कथं सार्थकमिति शंक्यं। एतन्मतेपि तस्मादितरेभ्यो भिद्यत इति निगमनवारणाय तत्सार्थकत्वात्। स्वभिन्ना

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

एवं चनिगमनवारणाय साध्याविषयकत्वनिवेशः २

वयवघटकपदजन्योपस्थितिसहकारेण यं पदार्थान्वितस्वार्थबोधकारस्यात शालित्वादिति। उक्तोदाहरणं। पर्वतमि
न्नत्वप्रकारकज्ञानाभावसाध्यहेतुकस्थलीयोदाहरणं। उदाहरणान्यत्वे सतिप्रथमरीत्यासाध्याविषयकबोध
जनकत्वे सतिसाध्यान्वित स्वार्थबोधजनकविभक्तिमन्न्यायावयवत्वं निर्गलितार्थः। स्वाघटकपदजन्योपस्थि
तिसहकारेण तत्पदार्थान्वितस्वार्थबोधकसुरविभक्तिमत्त्वमित्युक्तौ तु अनुषंगाननुषंगपक्षयोः साध्याविषयकत्वं
व्यर्थमिति तत्त्यागः। इदमत्रावधेयं सिद्धान्ते प्रथमरीत्यासाध्याविषयकत्वं साध्यांशघटितं तदघटितं च अतएव द्वि
तीयरीत्यासाध्याविषयकत्वस्यावतारिकायां प्रक्षालनाद्धीति न्यायेन तत्परित्यागकस्योपयुक्तः। तत्राद्यदलांत
रे पक्ष विशेषणतापन्नत्वानिवेशमात्रं द्वितीये तु दलांतरोपादानवैयर्थ्यं। अतो द्वितीयरीत्या साध्याविष
वर्तत्र यकत्वं दर्शितं। तत्र हेतुविभक्तिमत्त्वमित्यस्य सार्थकं हेतोर्हेतुत्वस्य प्रकृतपक्षविशेषणतापन्नप्रकृतसाध्या
न्वितस्वार्थस्यबोधिका विभक्तिरित्यर्थात्। साध्यांशघटितप्रथमरीत्यातस्यतु पक्षद्वयाभिप्रायकतया तत्र हेतोर्हे
तुत्वस्यावयवांतरोपस्थापितार्थान्वितस्वार्थस्यबोधिकेत्यर्थः। उदाहरणान्यत्वं निवेश्य समाधानं त्वन्वाच
यद्वेति। साध्येति। वह्निसामग्रीमत्त्वादित्यादौ। उक्तेति। धूमादालोकाभावादि साध्यकेत्यर्थः। उक्तेति। वह्निसा

नहेतुपदवैयर्थ्यं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२५ 125 मन्त्रीमत्त्वादीत्यर्थः। उदेति अभावसाध्यकव्यतिरेकिणोरित्यादिः। नियतत्वमिति। हेतुविभक्तिमत्त्वनियतेति परिस्या
गेउभयत्राप्यतिव्याप्तिरित्यर्थः। दर्शितेति। यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्व
प्रकारकज्ञानानामाद्युत्पन्नज्ञानमित्युदाहरणवृत्तीत्यर्थः। वैकल्पिकमिति। एकलक्षणे द्वयोर्न प्रवेश इत्यर्थः। नि
रर्थकत्वेति। तत्सार्थकत्वे उदाहरणे उपनये चातिव्याप्तिः स्यात्। उदाहरणेति। यः पर्वतभिन्नत्वेन ज्ञायते इत्यादावित्यर्थः।
ये पूर्ववदिति। आत्माश्रयेनेन तथाविधावच्छेदकरूपान्तरस्य परिचयोऽपेक्षितः तच्च रूपं यदि निरुक्तसाध्याविष
यकशाब्दबोधजनकत्वे सति निरुक्तहेतुविभक्तिमन्न्यायावयवत्वादि तदा तस्यैव लक्षणत्वापत्त्यर्थविशेषणता
एवं साध्यादिभेदेन हेतुत्वभेदे वह्निसामग्रीमत्त्वादित्यादिवृत्तिहेतुत्वस्य ध्यविषयकज्ञानजनकता नियतत्वा सा
दव्याप्तिः। धूमादालोकाभावसाध्यकोपनयादावतिव्याप्तिः। साध्यादिभेदेन हेतुत्वाभेदे च मानाभावादित्यर्थ
ः। विभक्तीति। विभक्तिजन्यहेतुत्वोपस्थितिजन्येत्यर्थः। ननु हेतुत्वं प्रमेयात् वाच्यत्ववत् तादात्म्येन हेतुत्वादित्यादे
प्रतिज्ञायामव्याप्तिः। विभक्त्यजन्यहेतुत्वोपस्थित्यजन्येत्युक्तौ तत्रैव हेतावव्याप्तिरिति चेन्न। विभक्तिजन्यहेतु
त्वोपस्थित्यसमवधानप्रयुक्तहेतुत्वमुख्यविशेष्यकशाब्दबोधाभावकत्वस्य तादृशोपस्थित्यभावप्रयुक्ता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

भावप्रतियोगितन्मुख्यविशेष्यताप्रयोजकत्वपर्यवसितस्यवाच्यत्वात्।अकारणविरहस्याप्रयोजकतयोक्त
ति प्रतिज्ञायांनाव्याप्तिः।अनुषंगपक्षेपक्षस्यैवविशेष्यतया अनतिप्रसंगादाह।अननुषंगपक्षइति।तादात्म्ये
तत्र नेति।एतेनतर्कालंकाराणांयथाप्तिवादेतत्रस्वामित्वादिसंबंधेनव्यापकत्वप्रसिद्ध्यभिधानंतदीदृशादीधि
तिकारप्रदर्शितनियमविरुद्धमित्याविष्कृतं।असमवेतेति।अन्यविधहेतुत्वनिवेशइत्यादिः।अभ्युपेत्येति।
नि येनहेतुवाक्येनोदाहरणत्रिज्ञासानर्जतातत्राव्याप्तिरूपंदोषमभ्युपेत्येत्यर्थः।एवंचस्वरूपयोग्यतानिवेश
न एवन्यायावयवत्वसार्थक्यमितिमंतव्यं।फलोपधाननिवेशेपितत्संभवात्।लक्षणंतुस्वरूपयोग्यताघटि
तमेवकार्यमितिनाव्याप्तिरितिभावः।साध्येतिहेतुत्वपक्षकेतरभेदसाध्यकस्थलीयेतरत्व

फलोपहितमात्रस्यलक्ष्यतामभ्युपेत्येतिवार्थः ९

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१४

१२६
126

पत्रे १२६

श्लोक
५५३८

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

व्यापकाभावप्रतियोगिमदिदमित्याकारकस्येत्यर्थः। ननूपनयविशेषानुधावनं व्यर्थं धूमादालोकाभावसाध्यकव्यतिरेक्युदाहरणे एवमाह
त्रिसंभवादित्यत आह। उदाहरणस्यचेति। यत्र पटे दंडजन्यत्वाभावः साध्यस्तत्स्थलीयस्य यो दंडसंयोगाजन्यद्रव्यत्वाभाववान्स दंडादिसादेः पर्व
तः पर्वतभिन्नत्वप्रकारकज्ञानाभाववान् पर्वतत्वात् यः पर्वतभिन्नत्वेन ज्ञापनेस पर्वतत्वाभाववान् यथा न धूमादिसाद्देश्यव्यतिरेक्युदाहरणस्येत्यर्थः। हे
तुत्वेति। स्वघटकभागपूर्वत्वाभाववद्धेतुत्वबोधकपदकत्वमर्थः। एवं पंचम्यंतेस्वत्रापि। द्रव्यासमवेतत्वादिति। द्रव्यपदं संपातायातं भित्त्वधर्मिकत्वा
द्वैयर्थ्यं वा स्वं वा कार्यरूपं ततः प्राक्स्वरूपं। उदाहरणो व्यतिरेकिणि। कश्चित्तु तत्के द्वितीयलक्षणेऽदं द्रव्यासमवेतं गुणत्वादिति पाठः। उदाहरणेऽस्य
नंतरं द्वितीयपरीक्षासाध्याविषयकत्वे निर्वचनपक्षे गुणत्वाभावसाध्यके तादृशव्यतिरेकदृष्टांतप्रसिद्धिसुदाहरणे इति कश्चित्पाठः। प्रथमैवांतद्वति
। यद्यप्युदाहरणस्य प्रथमांतत्वाभावेपि न दोषः वक्ष्यमाणोनोदाहरणस्यत्वे नैव तद्धारणात् तथापि पंचम्यंतान्यत्वाभावे नैव वारणसंभवादुदाहर
णान्यत्वानुधावनवैयर्थ्यमित्याशयः।। साध्यसाधनवद्भेदेतिपाठे साध्यं व्यापकं साधनं व्याप्यं। साध्यसाधनाभाववद्भेदेति पाठः सुगमः। सदंडादि
ति। अत्र तु प्रथमांतत्वं नास्त्येव। पंचम्यर्थस्य प्रत्ययार्थत्वे न भेदसंबंधेनान्वये प्रथमायाः अनुसंधानं नापेक्षितं अभेदसंबंधेस्थल एव तस्या अनुसंधानापे
क्षणादिति भावः। यथा दंडादित्यादिस्वपरस्य तन्यतपातत्र हेतुत्वबोधकांतत्वं पंचम्यंतत्वं वा नास्त्येवेति तदुपेक्षा। अवयवांतरेति। अवयवांतरोपस्थापि
तार्थान्वितार्थकहेतुत्वप्रतिपादकपदांतत्वं तादृशपंचम्यंतत्वं वेत्यर्थः। अंतत्वं तु यदर्थं। उदाहरणान्यत्वकल्पे तु अंतत्वसार्थक्यं पूर्ववत्। पंचम्यंततेति।

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग॰टी॰
१२७
127

तथाच पंचम्याः परत्वासिद्धत्स्यादिति सूत्रार्थः। नन्वेवमर्थवद्ग्रागस्येत्युक्तावपि वह्निप्रमातद्वत्त्वतस्यहेतुपंचम्यंतत्वाभाव एव। अंतस्यतत्सिलो हे
तुपंचमीत्वाभावादित्यव्याप्तिः। किंच धूमादालोकाभावादि साध्यके साध्याविषयकबोधजनके धूमादालोकव्यापकीभूतेसादित्यतिदेशुपनयेऽतिव्या
प्तिः। धूमादिसत्त्वधूमइत्यर्थवद्ग्रागस्यहेतुपंचम्यंतत्वात अतः अंतपदस्यपूर्वत्वाभावोर्थः। अर्थवद्ग्रागस्यपूर्वत्वाभावइतियोजना। तथापि उक्तोपनयेऽति
व्याप्तिरितिपरिष्कारोति। स्वघटकेति। यत्रलक्षणं संगमनीयं तदेवलक्ष्यपदार्थः। धूमादालोकव्यापकेत्युपनयेलक्ष्यघटकीयार्थवद्ग्रागश्चालोकभागः त
त्पूर्वत्वाभाववत्त्वं नपंचम्याः संभवतीतिनातिव्याप्तिः। अत्रापितादृशपूर्वत्वाभाववद्धेतुत्वपदचरितत्वंतादृशपूर्वत्वाभाववत्पंचमीघटितत्वंच
मिलितंलक्षणाद्रूपंवेकस्मिन्कंदृष्टव्यम्। ननुस्वघटकार्थवद्ग्रागेत्यादिप्रवेशोऽननुगमइतिचेन्न। स्वघटकार्थवद्ग्रागपूर्वत्वाश्रयहेतुत्वबोधकपदघ
टितंयद्यत्त्वंतदन्यत्वस्यवाच्यत्वात्। स्वघटकार्थवद्ग्रागेसूत्रार्थवत्त्वं कीदृशमित्यतआह। अर्थवत्त्वमिति। एतत्तुशाब्दिकानुसारिमतविशेषः। वस्तु
तस्तु अर्थवत्त्वंस्वघटकेतरपदार्थान्वितार्थकत्वं एकाक्षरकोशलभ्यानामर्थानांतादृशेतरपदार्थान्वितत्वाभावान्नदोषः। एवंचतसिलादेराकांक्षा
निर्वाहकत्वानुगमेतत्प्रयोगवैयर्थ्यमित्यपास्तं। पंचम्यादेरिति। यद्यपि सप्तम्यादेःपरत्वलादरित्यर्थोपिसप्तम्यास्त्वलइत्यादेःसंभवति एवंचप्रत्यय
प्रकरणोक्तादेशकथनमपिनाक्षितथापिसप्तम्याव्यवधानेनकृत्वेतिप्रयोगोनस्यात् कान्तहोरित्यनुशासनाविषयत्वात्। अतस्तत्रयथाषष्ठीस्वी
क्रियतेतथाकृतइतिप्रयोगानुरोधेनइहापिषष्ठ्येवयुक्तेतिदृष्टांतार्थमादिपदं। अत्रपंचमीलोपेनतकारादिप्रत्ययाव्यवधानस्याश्रयणासंभवाद

राम॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्वरसस्तु रचनापदीधितौ तु काराः। सप्तम्यादेरित्यादिपदाभ्यां सर्वासां विभक्तीनां तत्तत्संस्थपरिग्रहः। दर्शितेति। हेतुत्वपक्षकेत्यर्थः। प्रथमलक्षणे। अनु
मितिकारणीभूतेत्यादिके। तथा च प्रथमलक्षणे हेतुत्वप्रतिपादकस्य विभक्तित्वेन प्रवेशः। अत्र तु हेतुत्वप्रतिपादकपदत्वेनैवेति भेदः। न च साध्यावि
षयकत्वज्ञानजनकत्वस्य वेति समुच्चयार्थकचकारेण तादृशपदशालित्वेपि निवेश्यमानतालभ्यते तथा च पूर्ववदिति दीधितिविरोध इति वाच्यं। च
कारस्यैवकारार्थत्वात्तथा च साध्याविषयकत्वमेव निवेश्यमानमित्यर्थः। ननु तादृशपदशालित्वं तस्य पूर्वमेव निरुक्तत्वात्। ननु प्रकृतसाध्यान्वितस्वा
र्थबोधकपदशालित्वमेवास्तु हेतुत्वप्रतिपादकेति किमर्थमित्यत आह। पर्वत इति। विशेष्यतया साध्यान्वितार्थकं पदं पर्वतपदादि न तु नादि वा तच्छालि
त्वादतिव्याप्तिरित्यर्थः। ननु हेतुत्वप्रतिपादकत्वनिवेशेपि क्वचिदतिव्याप्तिः स्यात्तद्द्वयेन विलक्षणानां तारकाणां तु हेतुत्वप्रतिपादकत्वे व्यर्थमित्यत आह। प्र
योजनांतरमाह। वह्नेरिति। पंचम्यर्थहेतुत्वस्य विशेष्यविधयान्वयिता भार्थपक्षतावच्छेदककोटौ वह्नेरिति। तथा च प्रकृतसाध्यान्वितस्वार्थबोधकहेतुत्व
प्रतिपादकपंचमीरूपपदघटितत्वात्तत्रातिव्याप्तिः सुदृढेति। सुंदरवह्नेरिति भागमादायेति शेषः। तदावश्यकत्वं हेतुत्वप्रतिपादकपदस्यावश्यकत्वं। विव
रणीयेति। एतेन धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञापरिग्रहवीजमाविष्कृतं तत्र धूमाद्वह्नीति भागमादायैव प्रकृतहेतुविशिष्टहे
तुत्वविशिष्टसाध्यज्ञानजनकत्वसत्त्वेन वारणासंभवात्। पूर्वं निरुक्ततन्निवेशे च हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतावहिर्भूतसाध्य
विषयताशून्यज्ञानजनकत्वनिवेशो चेत्यर्थः। प्रतिज्ञायाः सुंदरवह्निमत्सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञायाः संनिगमनं। तथा च तादृशं यन्निगमनं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

२

तदन्यत्वे हेतावितिभावः। नन्वितरस्यैतस्येष्टत्वेऽपीति व्यर्थं लाघवेन जनकतावच्छेदकधर्मपर्याप्तिमत्त्वस्यैव निवेशेन तादृशप्रतिज्ञाहेतुसमुदायत्वरूपध
ग॰ टी॰ र्मपर्याप्त्यनाश्रयत्वेनैव लक्षणगमनादित्यत आह। एतद्वेति। इतरस्यैतस्य पेक्षणाचेत्यर्थः। तादृशधर्मः। प्रतिज्ञाहेतुसमुदायत्वरूपः। धूमादिति। वह्निमात्रस्यसा
१२८ ध्यत्वे हेतो धूमादिति व्यर्थं स्यात्। साध्येतन्निवेशे तु अयोगोलके व्यभिचारः स्यादतस्तत्र तन्निवेशः। नन्वत्र हेतुतावच्छेदकग्रहे तेनैव व्याप्तिग्रहादुदाहरणाकां
128 क्षानुपपत्तिरिति चेन्न साध्याभाववद्वृत्तित्वस्य आप्यनात्मकत्वात्। धूमाद्वह्निमत्सर्ववृत्तित्वादन्यत्रावर्तमानधर्मस्य वा हेतुत्वात्। धूमशून्यवह्निमत्सर्ववृत्ते व्यभि
चारवारणाय हेतो धूमादिति निवेशात्। अनर्थकमिति। अवच्छेदकभावघटकत्वेऽपि प्रयोजनविकलमित्यर्थः। हेतुत्वपक्षकोपनये व्यतिरेकि।ति। उक्तेति
।गोत्वाभावविशिष्टहेतुत्वपक्षकस्य सास्नाभावसाधकस्य स्थलीय इत्यर्थः। निरुक्तहेतुत्वप्रकारकसाध्यविशेष्यकज्ञानाजनकत्वस्य सत्त्वात्। साध्यं गोति। साध्या
न्वितस्वार्थस्य त्रैस्यादिः। सास्नादिति। गोत्वाभावविशिष्टहेतुत्वं सास्नाभाववदित्यादिप्रतिज्ञापामव्याप्तिः। पदांतरीभूतस्वघटकगोत्वाभावपदार्थाभूतेन नवे
षिष्यस्य द्वारा परंपरया अन्वितहेतुत्वप्रतिपादकपदघटितत्वादतः साक्षात्पदं। तत्र साक्षाद्गोत्वाभावान्वितत्वं नास्ति किंतु वैशिष्ट्यद्वारेति नाव्याप्तिः। प्रकृतेति
।मूले साध्याविषयके सत्त्रविद्यमानस्य नञः अस्यासंदिग्धत्वाजनकत्वमित्यनेन संयोगाजनकत्वार्थकत्वमर्थः। साध्याविषयके सादेः प्रकृतहेतुविशिष्ट
हेतुत्वविशिष्टसाध्याविषयके सावधर्म्यस्यैव सम्यक्त्वादित्यर्थः। वारतोपीत्यपि पदं च पदांतरोपस्थापिते साध्यविवक्षतोपि नञ् अस्यासाधारे वैधर्म्यसूचना रम॰
र्थं। प्रतिज्ञावाक्यघटकजन्येति पंचममूले हेतुलक्षणं पक्षे साध्यज्ञापकाकांक्षानिवर्तकशाब्दज्ञानजनकत्वे सतिन्यायावयवत्वमर्थः। हेतुविभक्तिम
त्वं स्वरूपकीर्तनं न तु लक्षणघटकं वैयर्थ्यात्। यद्वा हेतुविभक्तिमत्त्वं पंचम्यंतत्वं। एवं च प्रतिज्ञोदाहरणनिगमनविशेषणतां वारणाय जनकांतप

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तिज्ञोदाहरणानिगमनान्यत्वार्थकं। एवंचोपनयवाद्दणायपंचम्यंतत्वनिवेशः। वाक्यत्वं। न्यायावयवत्वं। दीधितौ अनुमितिपरेति। केचित्तु अनुमि
तिपरवाक्यत्वमवयवत्वमितिन्यायाख्यानांतरमेवपंचम्यंतेतिपाठधारणां युक्तं। चतुर्थलक्षणास्यतत्त्वदृष्ट्याख्यानेनपद्दलक्षणास्यतस्यद्दस्यव्याख्यातत्वा
दितिप्राहुः। पंचम्या इति तथाचलाक्षणिकपदवत्त्वमात्रोक्तौ निगमनेपंचम्यालाक्षणिकत्वादतिव्याप्तिरतः पंचम्यंतेति। तथाचतत्रपंचम्यंतत्वसद्दत्वा स्यत
लाक्षणिकत्वान्नातिव्याप्तिरित्यग्रेस्फुटं। नन्वित्यादौ शंकेः लक्षणत्वादिति दीधिति। संगतोऽपार्थकत्वादत्तो आचष्टे इत्यादीति। विनिगमनाविरहं यथाऽ
वधित्वेऽवधिमत्वेवाशक्तिः स्वीक्रियते तथा हेतुत्वादावपि मास्वीक्रियतामितितन्मूलकशंकां। लाघवेनेतीति। तथाचगौरवान्नहेतुत्वादौ शक्तिरिति
भावः। नद्दृष्टादिति विभजत इति प्रकृतं। अतिप्रसंगः प्रसक्तातिप्रसंगः। तज्ज्ञानेति। अवधितावगाने इत्यर्थः। अवधिमत्त्वमेवेति। यद्यवधित्वएवस्वरूप
संबंधरूपत्वं स्वीक्रियते नावधिमत्वे तदावधिमत्वे एवस्वरूपसंबंधरूपत्वं स्वीक्रियतां नत्ववधित्वे इति विनिगमनाविरहादनायत्तो भयोरेवस्वरूपसंबं
धरूपत्वं भवतीत्यर्थः। द्दत्यग्रहे लक्षणायाश्रयहेः। अवधित्वादिसंबंधः। अवधित्वादिरूपद्दकसंबंधः। उत्तरसंयोगेति। आश्रयोन घटक इत्यतः कर्मत्वा
पत्तिसंगतिः। अथ संयोगेति। आश्रयोद्घटक इति अकर्मकत्वनिर्वाहः। त्वनिष्टेति। संपंचम्यंतोपस्थाप्यद्दृष्टादिसद्दितइतिसाहित्यं स्वरूपजनकताघटितं
। सामानाधिकरण्यं पुगपदितिक्रियायामित्यादिः। अप्रयोगः। स्वकक्षास्तत्रपततीतिनप्रयोगः। तथाचविभागमात्रेपंचम्याशक्तिः। भेदप्रतियोगितावच्छे
दकत्वंचप्रयोगोपाधिरितिभावः। नहिविभागएवशक्तिरस्त्विति। विभागेशक्तिमुपसंहर्तुं युक्तिमाह। वस्तुतइत्यादिना। विशिष्टस्यैवचेति। भेदस्यैतिशे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

३

ग॰टी॰ १२९ 129 षः क्रियायामन्वयः। भेदेति। यत्रांतरं विशिष्टभेदे इत्यर्थः। तस्य च निष्ठप्रतियोगितावच्छेदकत्वबाधात् तदाश्रये इति। तत्पदस्य यत्रांतरं विशिष्टभेदोऽर्थः।
एवं सति वृक्षांतरं तात्पर्यगोचरविषयत्वपर्याप्ततीति प्रयोगाय निर्दुर्वारापोऽपत्ताया अनयायादितीदं चिंत्यं। विभाग एवेत्येवकारेण भेदस्य व्यवच्छेदः। भेदत्व
स्याखंडोपाधित्वे प्रमाणाभावः विभागत्वस्य शक्यतावच्छेदकत्वे लाघवं च सूचितं। पूर्ववत्। अवधित्वस्य पंचम्यर्थतामतेन वत्। अत्र तत्पदेन लक्षणेति दी
धितेः किं निगमनघटकतत्पदस्य धूमज्ञाने लक्षणा नास्तीत्यर्थः आहोस्वित् तस्य लक्षणारूपवृत्तिसहकारेण धूमज्ञानबोधजनकत्वं नास्तीत्यर्थः तत्राद्यं दूष
यति तत्पदस्येति। तत्पदशक्यधूमादिना तज्ज्ञानस्य संबंधसत्त्वाल्लक्षणापादुरपवादत्वेपीति योजना। द्वितीयं दूषयति। शक्तिज्ञानेति। तत्पदस्य बुद्धिस्थ
वाचकत्वेपि तस्य धूमज्ञाने इति शेषः। तथाबोधकत्वस्य लक्षणया धूमज्ञानबोधकत्वस्य। नन्वेवं निगमने पंचम्यंतलाक्षणिकपदवत्त्वरूपलक्षणा
तिव्याप्तिरत आह। लक्षणेचेति। तथा च पंचम्यंतशक्यार्थतात्पर्यविरहितपदवत्त्वमिति निष्कर्षः। धूमादित्यादौ धूमादिरूपशक्यार्थतात्पर्यं नास्तीति ल
क्षणासंगतिः। तत्पदतात्पर्यस्य धूमज्ञानरूपशक्यार्थे सत्त्वात् निगमनातिव्याप्तिः। निगमनस्थतत्पदस्य शक्त्यैव लक्षणया वा विशिष्टधूमज्ञाने भव
तूभयथापि तात्पर्यं तत्रैवास्य च शक्यार्थ एवेति शक्त्यैवेत्येवकारोपादानसंगतिः। तत्र तत्पदस्य प्रक्रांतवाचितया धूमज्ञाने शक्तिर्दुर्घटेत्याशंकां निराक
रोति। तत्पदस्येति। तत्प्रयोगेण। तत्पदप्रयोगेण। लाक्षणिकपदेति। शक्यार्थतात्पर्यशून्यपदे इत्यर्थः। अप्रक्रांततादिति। एतेन तत्पदस्य बुद्धिस्थवाचकत्वं राम॰
प्रथमसंगतिः सूचिता। अत एवानुपदमग्रे स्फुटतरेति तत्पुरुषान्तः। पंचमीमितितेन वह्निपदमादाय निगमनेऽव्याप्तिसंभवेपि न क्षतिः। तस्मान्न दंडादिति।

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

निगमने नञ एवाभाववत्ता नेलक्षणानन्तु पंचमीपदे त्यासीतिन पंचमीमादायव्याप्तिसंभवः। एतत्साभिप्रायोपसंहारात्तु रोधेनाभिप्रायमात्रं। निर्भरस्तु प्र
थमावतारिकायामेवेतिबोध्यं विवयत्ता विशेष्यता। अभेदेनेतिपाठे मतुवर्थः मतुब्जन्यप्रतीतिप्रकारः। मतुपः स्वंवं अर्थकत्वानुरोधा [illegible]ह। ज्ञानेति।
जन्यज्ञानकभावस्येति। स्वरूपसंबंधरूपस्य तस्यासंभवेन तत्र पंचम्या लक्षणाया आवश्यकत्वादिति भावः। तत्र लक्षणार्थज्ञापकत्वादौ विभक्तेः पंचम्यादेः
।षष्ठ्यादीति कर्तृकर्मणोः कृतीति सूत्रेण योगे कर्त्तरि कर्मणि च षष्ठ्यादिति वृत्तिः। कृदंतशब्दयोगे कर्तृवाचकात्कर्मवाचकाच्च शब्दात्षष्ठी भवतीति तदर्थः। भाव
तस्य श्रवणं वापतस्य हृति रित्यादुदाहरणं। एवं चेच्छापाएव लक्षणाकल्पने नियामकत्वे कर्तृकर्मणोः कृतीति सूत्रे वैयर्थ्यमित्यर्थः। उभयप्राप्तावित्या
नात्। विभाषागुणेऽस्त्रियां। अस्त्रीलिंगात्गुणवाचकात्विकल्पेन पंचमी जायते इत्यर्थः। गुणाभावेतिवाक्यमिति तच्छब्दस्य तज्ज्ञानेलक्षणेति सूच
नाय स्वप्रयोगे इति। तथा तात्पर्यात्। अनादितात्पर्यात्। पंचम्यर्थत्वामते चेति। एतन्मते धूमादित्यादौ धूमादिपदस्य मुख्यार्थतया नैतल्लक्षणमिति तु बोध्यं। त
तज्ज्ञानादीति। वह्निज्ञानादीत्यर्थः। परंतोपीति। अनंतरमपीत्यर्थः। तथा च पुनर्निर्दिष्टप्रमाणप्रतीत्यास्य साध्यपदस्य तज्ज्ञानार्थकत्वमुपेयतइति भावः। मु
ख्यार्थो। जन्यद्रव्यादिः लक्ष्यार्थो नित्यद्रव्यादिज्ञानं। उभयपदे तत्पाकारणज्ञापको भयपदतया अन्यतरपदत्वेतु अन्यतरबोधः स्यात्। अनुद्दिजिज्ञासाया उत्तरा
ननुकूलत्वादाह। प्रश्नइति। एतेन जिज्ञासायाः कुतइत्याकारकताभावात्प्रश्नइत्युक्तमिति परास्तं। जावता केवलजिज्ञासाया उत्तराननुकूलत्वकथंतायाश्चानिवृ
त्तेः। ननु ज्ञाने प्रश्नइत्यसंगतं। किं वह्निमदिति वाक्यस्यतान जिज्ञासाबोधकवाक्यत्वसंभवादत आह। प्रश्नस्येति वह्नेरेवेत्येवकारेण वह्निज्ञानव्युदासः। प्रथम
प्रश्नः। किं वह्निमदित्येवंरूपः। वह्निपदस्य ग्रहं वह्निमदित्युत्तरस्य स्मेत्यादिः। नानार्थस्थले सैंधवमानयेत्यादौ। प्रश्नः कुतइत्याकारः। न तु नरं वाकं। धूमादित्या

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग०टी०
१३०
130

दिः। प्रश्नस्याप्रश्नवाक्यस्य। हेत्विति। हेतोर्जिज्ञासायाः। किं वह्निज्ञानजनकमिति जिज्ञासायाः। एवमग्रेपि। अज्ञानेनयाद्वोधानुदयेन। पदांतरेति। प्रकृ
तेज्ञातमित्साध्याहृतं पदं बोध्यं। अत्र गृहं वह्निमदित्यत्र रस्य वह्निपदस्य प्रथमप्रश्नानुरोधाच्छकार्थपरत्वेन तु द्वितीयप्रश्नानुरोधात्तज्ज्ञानार्थतापीत्य
क्तं दूषयति। इदंत्विति। हेतुजिज्ञासेति। हेतोर्जनकस्य जिज्ञासेत्यर्थः। एवं हेतुजिज्ञासायामित्यत्रापि। तज्ज्ञानेन। अभिप्रायज्ञानेन। हेत्वन्वयमाहेप्रतिज्ञादे
नादृशप्रश्नतदुत्तरयोरस्य साध्यपदस्य साध्यज्ञानलक्षणांन्यवस्थापयतिपुरतेचेति। दृष्टांतादीति। ज्ञानं प्रमा। विषयतायाः। विशेष्यतारूपायाः। विरहा
संभवादिति। विशेष्यपर्याप्तस्य विशिष्टानुयोगिकाभावानुपगमात्। विनिगमनाविरहादिति। पंचम्यंतपाठे प्रथमांतपाठे वा गौरवं बोध्यं। ननु पदद्वये लक्ष
णामपेक्ष्यैकपदे लक्षणालघीयसीत्यत आह। एकपदस्येति। पंचमीपदस्य। पदद्वयस्यैव पंचमीसाध्यपदयोरेव। एवं च पंचम्यंततत्वानुपादाने प्रतिज्ञायाम
तिव्याप्तिर्भवत्येवेति बोध्यं। व्युत्पत्तिभेदादिति। प्रत्ययानामिति व्युत्पत्तिभंगस्य बोध्यः। पदार्थांतरमिति विशेषणमिति पूर्वेणान्वयः। अन्यथेति। अन्यदाहसं
बंधि दहनस्य दाहजनकतावानित्यर्थः। एतद्दिंधनस्येति। दाहसंबंधि एतद्दिंधनं दाहजनकत्वाभाववद्दहन इति वोधस्यादित्याशयः। सिद्धांते च दहनपद
स्यैतद्दहनपरतया एतद्दिंधनदाह एतद्दहनाजन्य इति तस्य यथाश्रुतपरतया दहनजन्यदाह एतद्दिंधनासंबंधीति वा बोधो बोध्यः। जन्यत्वे पंचम्यर्थे। लक्ष
णयेति। प्रकृते रितिशेषः। घटजनकादिति। दंडादिसायुक्तोक्तकपालादिजन्यतायाः सत्वात्प्रतिः स्यादतः सामान्येन घटजनकत्वेनाभिधानं। जन्यत्वभ्रमे राम०
ति। अग्निमंजलादेः कार्यजनकत्वभ्रमेति विरोधिज्ञानसंपादनं। तत्र गगनं न पारिपांऽत्यादित्यादौ। अवधेयत्वादिति। यद्यपि पंचम्यर्थे जन्यत्वे व नञ्प्रत्यले
चावच्छेदकावच्छेदेनैव प्रकृत्यर्थनिरूपितत्वाभाववोधोव्युत्पत्तिसिद्धः तदसंभवे च प्रकृत्यर्थनिरूपितत्वाभाववोधोनैव जायते एवं च दाहो न पारिमांडल्यादि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्यादेः प्रामाण्यं घटो न घटजनकादित्यादेश्चाप्रामाण्यमुपपद्यते। जन्यता भ्रमस्थले च भ्रान्तस्य तादृशभ्रम एवोपेयते न तु द्वेधाऽभावान्वय इति परिष्कारः सं
भवत्येव तथापि निखिलजन्यस्थले एवोभयाभावबोधः संभवतीति तदादरणं द्रष्टव्यं। शशविषाणं नास्तीति। अधिकरणधर्मावच्छिन्नाभावं निराकृत्य
मणिष्ठताशशीयशृङ्गाभाव इत्यर्थस्य प्रामाण्यप्रतीतेरेव दर्शितत्वात्। शशपदस्य शशीयत्वप्रकारकज्ञानविषयत्वलक्षणाया आसार्वत्रिकत्वान्न तदपेक्षया तद्वाक्य
स्य भ्रमकरणतया एवोचितत्वादिति। जन्यज्ञानविषयत्वमिति। एतस्य धर्मितावच्छेदकावच्छिन्नत्वविशिष्टाश्रयतासंबन्धेन साध्येऽन्वयः। तेन वन्ह्यादेर्मेयत्वादिना
पृथिवीत्वादिना व्याप्यत्वेऽपि पर्वतो वह्निमान् पृथिवीत्वादिति न प्रयोगः। तत्र वह्नित्वस्यैव धर्मितावच्छेदकतात्। न चैवमपि पर्वतो वह्निमान्वाच्यत्वादित्यत्र समूहालं
बनानुमितेः पृथिवीत्वज्ञानजन्यतया तत्प्रयोगो दुर्वार इति वाच्यम्। जन्यतावच्छेदकविषयत्वविवक्षणात्। न च गुरुणः सत्तावान्द्रव्यत्वादिप्रयोगप्रसंग इति
वाच्यं। तस्य पक्षविशेष्यतानिरूपितत्वेन विशेषणात्। वस्तुतस्तु पंचम्यर्थविशिष्टसाध्यवैशिष्ट्यभानोपगमान्न क्षतिः। द्रव्यनिष्ठविशेष्यतानिरूपितविधे
यताविशिष्टस्य द्रव्यभिन्नेवाधात्। पटादौ घटत्वप्रकारकज्ञानस्यैवपि घटत्वप्रकारकत्वविशिष्टसत्त्ववत्। एतेनोक्तविशेषणप्रक्षेपेनानार्थत्वंस्यादित्यपा
स्तत्वं। पक्षस्यर्थेति। धूमादित्यादौ लाक्षणिकधूमादिपदार्थे धूमादिज्ञानं। तादृशेति। तद्वाक्यस्थपंचमीप्रकृत्येति शेषः। यो भ्रमोऽप्रसिद्धस्तदन्यत्वमात्रं न प्रती
पत्तेयस्तु सप्रसिद्धस्तदन्यत्वं तु प्रतीयत एवेति सूचनाय तादृशेत्युक्तं। ननु स्वरूपसंबंधावच्छिन्नघटाद्यभावेऽदेत्वाभासे वक्ष्यमाणरीत्या प्रमेयत्वादेर्भ्रमः
संभवत्येवेति चेन्न तर्हि तदन्यत्वं प्रतीयत एव। अत्र भ्रमत्वं न तदभाववद्विशेष्यकतत्प्रकारकज्ञानत्वं। तस्य पदार्थाननुगमात्। नापि प्रमासामान्यभिन्नत्वं प्र

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

५

मात्वस्याननुगमात् । तत्तद्भ्रमभेदकूटस्याप्रसयात् अननुभवाद्दूष्यणादोषाच्चाह । वस्तुतस्त्विति । स्वेति स्वं संबंधः वह्निप्रतियोगिकहृदानुयोगिक
संयोगाभ्यां हृदादिविशेष्यकवह्न्यादिप्रकारकभ्रमद्वयस्य समवायेन पर्वतादिविशेष्यकवह्न्यादिप्रकारकभ्रमस्य च संग्रहार्थं क्रमेणां संबंधत्रयोपादा
ग०टी० नं अन्यथा प्रकारतायां आद्ये द्वितीयतृतीयसंबंधाभ्यां द्वितीये प्रथमतृतीयसंबंधाभ्यां तृतीये प्रथमद्वितीयसंबंधाभ्यां संयोगादिमत्त्वयाऽसंग्रहप्रसंगा
१३१ त् । नच वायू रूपवान् इति समवायेन भ्रमासंग्रहः समवायस्यैकत्वादिति वाच्यम् । स्वाश्रयनिष्ठविशेष्यतानिरूपितत्वस्वनिरूपकसंबंधप्रतियोगिता
131 श्रयवृत्तित्वस्वनिरूपकसंबंधावच्छिन्नत्वैतत्त्रितयसंबंधेन संबंधानुयोगिताविशिष्टान्यत्वस्य विवक्षितत्वात् । ननु तथापि लौहितः स्फटिक इति स्वाश्रय ८ौ
संयोगात्मकपरंपरासंबंधेन प्रमायामतिव्याप्तिः स्वपदेन संयोगोपादाने प्रकारतायाः स्वप्रतियोगिनिष्ठत्वाभावात् । समवायोपादाने च तदनुयोगिनिष्ठविशे
ष्यताकत्वाभावात् । नच स्वपदेन परंपरासंबंधोऽग्राह्य इति वाच्यम् । परंपरायाः प्रत्येकानन्यत्वादिति चेन्न । स्वानुयोगिनिष्ठविशेष्यतानिरूपितेऽनेन स्वावच्छि
न्नप्रकारतानिरूपितविशेष्यतानिरूपितसंसर्गताश्रयानुयोगिनिष्ठविशेष्यतानिरूपितत्वस्वनिरूपकसंबंधावच्छिन्नप्रकारताघटितोक्तस्यैव वाच्यत्वा
त् । नच परंपरासंबंधस्थले प्रत्येकं संसर्गतायाउपगमे विशेष्यतायास्तन्निरूपितत्वापत्तिरिति वाच्यम् । पर्वतो निर्वह्निरिति ज्ञानस्य परंपरया पर्वते वह्निम
ज्ज्ञानप्रतिबंधकत्ववारणाय प्रकारताविशेष्यतानिरूपितसंसर्गतयोर्भेदोपगमात् । केचित्तु समवाये रूपमते रूपप्रतियोगिकत्वविशिष्ट[illegible] समम राम०
वायेन वायावारोपरूपादिभ्रमेऽव्याप्तिरिति स्वविशिष्टपर्याप्तावच्छेदकताकत्वत्वावच्छिन्नप्रतियोगिनिष्ठत्वस्वविशिष्टावच्छिन्नप्रकारतानिरूपितविशेष्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तानिरूपितसंसर्गतावच्छेदकीभूतधर्मविशिष्टानुयोगिनिष्ठविशेष्यतानिरूपितत्वेन त्रितयसंबंधेन संसर्गतावच्छेदकविशिष्टान्यप्रकारताशालित्वे
नानुगमः समवायेन वायू रूपवानिति प्रमेवा। परंपरासंबंधेन प्रमावारणायभूतांतमित्याकुलत्तदसत्। हृदो वह्निमानिति भ्रमासंग्रहात्। वह्निप्रतियोगि
कैकसंबंधः हृदानुयोगिकैकसंबंधस्तद्द्वयसंसर्गकहृदो वह्निमानिति भ्रमासंग्रहाच्च। वस्तुतस्तु स्वाश्रयावच्छिन्नत्वस्वाश्रयप्रतियोगिवृत्तित्वस्वाश्र
यावच्छिन्नप्रकारतानिरूपितनिरूपितविशेष्यताविशिष्टसंसर्गताविशिष्टानुयोगितावद्विशेष्यतानिरूपितत्वेन त्रितयसंबंधेन संसर्गताविशिष्टान्यप्र
कारताशालित्वेनानुगमः। अनुयोगितायां संसर्गतावैशिष्ट्यं च स्वाश्रयनिरूपितत्वस्वावच्छेदकावच्छिन्ननिरूपितत्वोभयसंबंधेन। तेन हृदो वह्निमान्
वायू रूपवानिति भ्रमयोः संग्रहः। उक्तसंयोगद्वयावगाहिभ्रमसंग्रहाय च स्वनिरूपितत्वस्वसमानाधिकरणावृत्तित्वोभयसंबंधेन विशेष्यतावैशिष्ट्यं बो
ध्यं। न च तादृशविशेष्यतानिरूपितसंसर्गताविशिष्टानुयोगिताव्यापकविशेष्यतानिवेशोऽस्तु किं वाच्यम्। घटो रूपवानिति प्रमायामतिव्याप्तेः। न च त
द्वारणाय संसर्गताव्यापकप्रतियोगिताकानुयोगिताश्रयविशेष्यतानिवेश्या। पटघटोभयसंयोगवति तत्संयोगाभ्यां घटवद्भूतलमिति भ्रमासं
ग्रहात्। अस्माकं तु स्वाश्रयप्रतियोग्यप्रतियोगिकावृत्तित्वेन संसर्गताविशेषणान्न दोषः एवं सति वह्निप्रतियोगिकहृदानुयोगिकसंयोगाभ्यां भ्रमस्य
वारणो यत्र एक एव घटः विभिन्नाधिकरणयोः संयोगाभ्यां वर्त्तते तत्र तदेकतराधिकरणे ताभ्यां संयोगाभ्यां तद्वद्भ्रमसंग्रहाय स्वसमानाधिक
रणावृत्तित्वस्यावश्यकत्वं बोध्यं। वस्तुतस्तूपदर्शितसंयोगद्वयावगाहिभ्रमस्य संसर्गताभेदेन प्रकारताभेदात्तादृशविशेष्यतानिरूपितत्वस्य निरूपि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

६

ग॰टी॰
१३२
132

तत्प्रकारतानिरूपितत्वोभयसंबंधेन संसर्गता विशिष्टापासंसर्गता तद्विशिष्टेत्यादि प्राग्वत्। एवं च प्रमेयवानिति प्रमासत्त्वाभावादृशविशेष्यतासमा
नाधिकरणासंबंधाप्रसिद्धावपि न क्षतिरिति। स्वाश्रयावच्छिन्नत्वस्यानेनैवाघवात्त्वनिरूपितत्वमपि निवेशयंति। केचित्तु स्वानुयोगिनिष्ठविशेष्यता
निरूपितत्वे सत्येतत्तादात्म्यस्वनिष्ठसांसर्गिकविषयतानिरूपितसांसर्गिकविषयताश्रयत्वान्यतरसंबंधेन स्वविशिष्टेयः स्वावच्छिन्नप्रकारतानिरू
पितसंसर्गताश्रयः तदनुयोगिनिष्ठविशेष्यतानिरूपितत्वे सत्यर्थः। साक्षात्संबंधेन प्रमावारणाय तादात्म्यनिवेश इत्याहुः। प्रमेयत्वमिति। वाच्यत्वा
दिज्ञानजनकभ्रमात्मकज्ञानविषयः प्रमेयत्वमिति भ्रमदशायामित्यर्थः। तद्भ्रमात्मत्वेन। प्रमेयत्वभ्रमात्मत्वेनां। सा च संभवतीति योजना। अप्रसि
द्धाभ्रमात्मकप्रमेयत्वज्ञानाप्रसिद्ध्या। अनवकाशमिति। प्रमेयत्वभ्रमाप्रसिद्धावपि वाच्यत्वादिज्ञानजनकप्रमेयत्वज्ञानं भ्रम इति भ्रमत्वनिश्चयस्य
वित्तेऽपि निश्चयत्वेन विरोधितया तत्सत्त्वे भ्रमसामान्यभिन्नत्वशाब्दबोधासंभवादिति भावः। हेतुमिधानं। द्वितीयप्रतिज्ञोत्तरमिति शेषः। बोधकांतार्थ
इति। उक्तप्रतिज्ञाघटकपंचम्याः पक्षतावच्छेदकावच्छिन्नविषयतांतर्गततादृशसाध्यविषयतानिरूपितज्ञाप्यत्वविषयतामात्रप्रयोजकत्वान्नाति
प्रसंग इति भावः। पक्षांशे साध्यस्य विषयता च पूर्वोपदर्शितसाक्षात्परंपरासाधारणी बोध्या। पंचमीत्वमिति। बोधकांतपंचमीपदार्थ इत्यन्ये। हेतुवाक्यज
न्यशाब्दबोधे जातेऽपि कथमस्य गमकत्वमित्याकांक्षां विना नोदाहरणादिकं प्रदर्शयितुं शक्यत इत्यतस्तादृशशाब्दबोधस्य तादृशजिज्ञासाहेतुतां प्रदर्श राम॰
यति। अनुमितीति कथमस्य गमकत्वमित्याकांक्षायाः पद्रूपावच्छिन्नस्य तादृशविषयतया हेतुवाक्यादुपस्थितिस्तद्रूपं धर्मितावच्छेदकीकृत्येव तादृश

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

विषयता निर्वाहकविषयकत्वेन ज्ञानविषयकत्वात्। निर्वाह्यज्ञानस्य निर्वाहकजिज्ञासाजनकत्वादिति भावः। लक्षणानुपगमे विषयद्विषयकेत्यादि
नियमाव्याहतेः। अवच्छेदकनिवेशप्रयोजनमाह। यदिति। तथा च यद्रूपावच्छिन्नविषयकज्ञानत्वं तज्जनकतावच्छेदकं तद्रूपावच्छिन्नस्येत्यर्थः। शाब्दबोधे तु
ल्पवित्तिवेद्यत्वे मानाभावादर्थत इति। तत्र हेतौ निर्वाहकाकांक्षायां। निर्वाहकावान्तरधर्मजिज्ञासायां। तत्र शुद्धज्ञानतावच्छिन्ने परामर्शे। तन्निर्वाहकेति।
अनुमितिजनकत्वनि[illegible]र्वाहकेत्यर्थः। वक्ष्यमाणस्येति। तथा च यद्रूपावच्छिन्नविषयकत्वं अनुमितिजनकतावच्छेदकं तथाहेत्वर्थे तद्रूपावच्छिन्नस्यैव
व्याप्त्यादिप्रदर्शनमिति न नियमः किन्तु यद्रूपावच्छिन्नस्यजनकत्वेन प्रतीतज्ञानीया। विषयता तद्रूपावच्छिन्ने तन्निर्वाहकाकांक्षायोदाहरणादीत्य
र्थः। उक्तप्रतिज्ञादौ। धूमादालोकवान्पर्वतो वह्निमानितिपंकोक्तप्रतिज्ञादावित्यर्थः। कस्याश्चित् धूमादालोकवानित्यादेः। तत्र। अन्यतमत्वघटिते। पु
त्रः जन्यत्वविशिष्टः पुमान्। निष्प्रतियोगिक एवेति। ज्ञानस्य निष्प्रतियोगिकत्वादिति भावः। लक्षणा। गोपदस्य गोत्वे इति शेषः। आकांक्षा जिज्ञासा। स
चेति। तथा च ज्ञाप्यत्वस्य पंचम्यर्थतामते प्रकृत्यर्थान्वयानुपपत्तिर्दुर्वारैवेति भावः। कस्यकेति। ज्ञानवदर्थकाख्यपदादौ व्यभिचारात्। यत्केत्यादाविति आदि
नायाच कइत्यादौ तुमादि कृत्स्य संपरिग्रहः। जिज्ञासारूपाकांक्षायाः शाब्दबोधजनकत्वं दूषयति। इदं त्विति। अक्षततत्वादिति। तथा च शक्त्युपस्थापितगोपदा
र्थैकदेशगोत्वे नित्यपदार्थान्वयापत्तिरिति भावः। ज्ञाप्यत्वमात्रस्य पंचम्यर्थतामते जन्यतायाः स्वतंत्रोपस्थित्यभावे न प्रकृत्यर्थान्वयानुपपत्तिवत् ज्ञानज्ञाप्य
तायां पंचम्यर्थतामते ज्ञानस्य स्वतंत्रोपस्थित्यभावेन तदनुपपत्तिरिति दूषणासमाधानप्रदर्शनेनोद्धरति। एवं चेति। विषयतादीत्यादिना निरूपितत्वसंबं

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग०टी० धपरिग्रहः। ज्ञानादीति। आत्मानन्दमिति स्यादीत्यादौ शाब्दबोधमये नेत्यादिः। तर्हि स्वतन्त्रज्ञानाद्युपस्थितेः कापि शाब्दसामग्रीघटकत्वेनास्तीति आत्मानन्द
१३३ मित्युक्तस्थले ज्ञानादौ द्वयमभेदबोधप्रसंगादित्यत आह। तादृशेति। उक्तातिप्रसंगः। यत्रैकरूपेणाकांक्षाग्रहो ऽन्यरूपेण वृत्तिग्रहस्तत्र वक्तव्यं। अव्यवहि
तोत्तरत्वनिवेशः। दर्शितेति। पंचम्यर्थघटकज्ञाने प्रकृत्यर्थबोधे स्वतन्त्रज्ञानोपस्थितेरित्यादिः। एतेन। वस्तुतस्त्विति कल्पस्याद्येन। जन्यतांशे। दंडजन्यो
न दंडजन्य इत्यादौ। औपगवः। उपसमीपवर्तिनी गौर्यस्य स उपगुः उपगोरपत्यं पुमानौपगवः। अधिकमिति। जन्यज्ञानविषयत्वस्य पंचम्यर्थत्वे तु नैतदि
133 तिभावः। यत्र पदे। अनादित्वपरंपरित्वं। धीहेतुत्वं। धूमज्ञाननिष्ठं। स्वारसिकेति। लक्षणायेत्यनुषंगः। धूमज्ञानपदोपस्थिते। अर्थात् इति। धूमादित्यादौ
पंचम्या लक्षणया विषयत्वेनोपस्थापिते तत्र धूमपदार्थान्वय इत्यर्थः। अत्र लक्षणया ज्ञानविषयत्वपायत्वमेविशिष्टः पंचमीप्रकृत्यर्थस्तत्रैव व्या
प्त्यादिप्रदर्शनमिति नियमोपगमान्नेत्युक्तवक्षदत्यारुचिरस्वरसः। धूमहेतुकस्थले धूमज्ञानादित्यभिधायतस्माप्यतोपदर्शनापत्तिः नहि तत्र ज्ञानज्ञा
नस्य ज्ञापकत्वे तात्पर्यं येन लक्षणा स्यादिति कश्चित्। अत्र स्वारसिकोपस्थापितज्ञाप्यत्वे प्रकृत्यर्थान्वये आकांक्षाया अनुपगमेन धूमज्ञानादित्यादौ ज्ञाप
कत्वाबोधकत्वमिति समाधानमयुक्तं निरूढलक्षणयोपस्थापिते ज्ञाप्यत्वे तथैवोपस्थापितप्रकृत्यर्थज्ञानान्वये आकांक्षोपगमे विशेष्योपस्थापिततदन्वये
आकांक्षायाः लक्षणाकर्त्रभिरप्यनंगीकारस्य सुवचत्वादिति बोध्यं। यत्तु कारोक्तदीधित्याशये दूषणान्तरमाह। वस्तुत इति। लक्षणाद्वयमपेक्ष्यैकलक्षणा एम०
यां लाघवमभिप्रेत्य पंचम्यर्थस्योन्नराभिधानं। विषयत्वे वेति त्वन्मत इत्यनुवर्त्तते। अवच्छेदकत्वस्य तद्गृतत्वाप्यादिनिर्वाह्यत्वोपगमे धूमत्वादौ। तन्निर्वाह

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

काकांक्षायाः दुर्वारत्वात्तदुक्तमाप्ताप्रदर्शनप्रसंग इति युक्तिस्फोरणाय धूमवत्वादावितिदर्शितमभिधानं । लघुनीति । एतेन न्यायावयवसामान्यलक्ष
णयोर्लघुप्रतिज्ञादिघटितयोर्मूलोक्तयोरेव लघुत्वं न तु मूलोक्तगुरुतरप्रतिज्ञाघटितयोरिति सूचितं । उदाहरणमावर्त्तनं । यो यो धूमवान् स स वह्निमा
निव्युदाहरणोंऽस्य भिन्नपदस्य दार्थविशेष्यकान्वयबोधजनकोऽतिव्याप्तिवारणं । यथाश्रुते इतरः स्वार्थभिन्नो यः साध्यादिः तदन्वितस्वार्थबोधकतया नो
दाहरणमात्रव्यतिरेकितो व्याचष्टे । स्वभिन्नेति । अवयवत्वं नावयवप्रतिपाद्यत्वपर्याप्त्यधिकरणत्वं तच्च स्वार्थसाध्यस्य संभवति । हेतुघटकपंचम्यर्थान्वय
सत्वेऽपि तद्घटकप्रकृत्यर्थान्वयाभावादित्यत आह । स्वभिन्नावयवघटकपदेति । यद्यपि तादृशपदप्रयोज्यविषयतानिरूपितस्वार्थविषयताशालि
त्वं लभ्यते तथापि वैयर्थ्यात्तदुपेक्ष्याह । एवं चेति । न च सहकारेणाऽसनेन बोधेजन्यत्वेन चैतावतोदाहरणमात्रव्याप्तिरिति वाच्यम् । तदभावप्रयुक्तस्वाभा
वकत्वं सहकारः । वैशिष्ट्येन तृतीयाबोधेऽन्वयः । स्वजन्यतावच्छेदकीभूतबोधवृत्तिधर्मावच्छिन्नाभावत्वेन च प्रयुक्तत्वं यद्ज्ञानादृशपदप्रयुक्तविषय
तानिरूपितस्वतात्पर्यविषयबोधीयविषयताप्रयोजकत्वं हेतूदाहरणबोधमादायोदाहरणवारणाय तात्पर्यनिवेश इत्यदोषात् । नन्वेवं गापस्से
निगमनेऽतिव्याप्तिः । स्वभिन्नावयवघटकाघटकं पदे यद्यपि तार्थान्वितस्वार्थबोधकत्वात् । अतो द्वितीयदले अंशे स्वभिन्नपदविशेषणं स्वीयत्वं स्वेत
रघटकत्वरूपं निवेश्यं यथाश्रुते न तेन वारणं तथा च गौरवमित्यत आह । स्वाघटकेति । न च स्वविषयकनिष्ठभेदप्रतियोगितावच्छेदकविषयि
ताकत्वं । विभक्त्यर्थस्येति । न चास्य त्वे विभक्त्यन्तत्वं न घटकं । एवं च पदे विभक्त्यन्तत्वविशेषणं तथाप्युक्तदोषनिरासादिति वाच्यं । तथा सत्युपनयेऽ

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

८

ग॰टी॰ १३४ 134

तिव्याप्तेः। अंशत्वे विभक्त्यंतत्वस्यावश्यकत्वात्। अंशभिन्नेति। मुख्यविशेष्यतानिवेश्यात्तेन नोपनयपादावतिव्याप्तिः। नन्वयंपदसमुदायेव निगमनत्व
पर्यवसानस्याभिधानात् उपनयसहकारेण बोधकत्वेनात्तीसत्त्वग्राहकतादात्म्येनेति। द्रव्यत्वसाध्यके इदं द्रव्यत्ववदित्येव प्रतिज्ञा तत्र द्रव्यत्वपदं
नविभक्त्यंतमतत्समुदायस्य संबंधानुसरणं। एतल्लक्षणे च स्वघटकविभक्त्यंतपदप्रागभावासमानकालीनस्वघटकविभक्त्यंतपदभिन्नस्वघटकवि
भक्त्यंतत्वप्रवेशाद्धूमादित्येकपदहेतुवारणात् तत्पदद्वयघटितहेत्वनुसरणम्। हेतावितिं। न च तादृशपदसहकारेण स्वार्थमुख्यविशेष्यकबोधोपा
दानात्तद्दोषः। एवमप्युपनयेऽतिव्याप्तेः। अंशीभूतेदंपदान्यनिगमनसहकारेण स्वार्थमुख्यविशेष्यकबोधजनकता त्स्वीयत्वमिति। यद्यपि स्वीयाद्य
पदार्थविशेष्यकान्वयबोधजनकत्वोक्तावपि उपनयादिसुदासः संभवति तथापि धूमादालोकवानित्यादिप्रतिज्ञास्वव्याप्तेस्तत्त्यागः। अत्र स्वघटकवि
भक्तिप्रागभावसमानकालीनस्वघटकविभक्तिप्रकृत्यर्थविशेष्यकबोधजनकत्वं सम्यगिति वदंति। ननु स्वघटकपदवृत्ति स्वघटकपदप्रागभावसमानका
लीनत्वस्याभाववत्स्वघटकतद्रूपांशत्वे स्वघटकपदवृत्तित्वप्रवेश्यदोषदानमसंगतमत आह। एकमात्रेति। स्वघटकपदप्रागभावासमानकालीन
स्वघटकपदत्वमंशत्वं। पदिति। उपनयादिकमित्यभिप्रायः। स्वघटकेति। सधूमादित्यादिपदं तद्घटकमपि तदेव तदुत्तरमुदाहरणादिघटकपद
मेव तदविषयकप्रतीतिविषयत्वाद्धूमादित्यादौ नातिव्याप्तिः प्रतिज्ञायां च घटकपदोत्तरं वह्निमानिति पदं तदविषयकप्रतीत्यविषयत्वाल्लक्षणसम राम॰
न्वयः। स्वघटकविभक्त्युत्तरविभक्त्याघटितपदत्वं तदन्यत्वेनुलघुत्वाज्ज्यायः। अत्र स्वीयांशपदार्थविशेष्यकान्वयबोधजनकतावच्छिन्नभेदः तादृ

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

शजनकसमुदायभेदो वा। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदानुपगमान्न सुनिवेश इत्याशंकते। नचेति। अतिव्याप्तिरिति। स्वीयानंत्यपदा
र्थविशेष्यकान्वयबोधाजनकत्वाप्रसिद्धिरित्यर्थः। तादृशबोधेति। ननु महावाक्यार्थबोधेऽवांतरवाक्यार्थज्ञानस्य हेतुत्वेन वह्निव्याप्यधूमवान् पर्व
त इत्युपनयार्थबोधे वह्निव्याप्यो धूम इति ज्ञानस्य निगमनजन्यबोधे च तस्मादित्यर्थज्ञानस्य तस्माद्वह्नीत्यर्थज्ञानस्य वाऽपेक्षणीयतयाऽतिव्याप्ति
वारणेऽपि इदं स्पर्शवत् भूतत्वे सति मूर्त्तत्वादित्यादिन्यायांतर्गतहेतावतिव्याप्तिः। स्वीयानंत्यपदार्थविशेष्यकबोधस्यैव तत्रानुदयादिति चेन्नाशोभनं
भूतत्वमित्याकारकबोधप्रसिद्धेः। स्वीयानंत्यपदप्रयोज्यमुख्यविशेष्यताशालिबोधजनकतासामान्यस्याभिधानात्। भूतत्वे इत्यस्माद्विभक्त्यर्थविशेष्यक
बोधे विभक्त्यंतभूतत्वपदस्य जनकत्वात्। तेन यादृशहेतुघटकप्रथमपदात्स्वाघटकपदार्थप्रकारकबोधोऽप्रसिद्धस्तत्रापि न दोषः। उपनयादिनिष्ठबोध
जनकतायाः सामान्यांतर्गततया मुपनयाद्यशक्तित्वाभावादप्रसिद्धेर्वारणाय मुख्यत्वोपादानं। धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञासंग्रहाय सामान्य
पदं। अथ स्वीयानंत्यपदार्थविशेष्यकबोधजनकं यद्यत्त्वं तद्भिन्नं यद्यत्तद्भिन्नत्वं कुतो नोक्तमिति चेन्न। भिन्नभेदस्य प्रतियोगितावच्छेदकरूपत्वेऽनुयो
गिन्येव सत्त्वनिवेशपर्यवसानात्। अभावांतरतया वैयर्थ्यमिति पक्षे च व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदानुपगमेनोपनयाद्यवारणात्। तादृ
शजनकान्यत्वस्योपनयादावसत्त्वादिति। इदं तु बोध्यं। स्वीयानंत्यपदाप्रयोज्यत्वजन्यशाब्दबोधीयमुख्यविशेष्यताकमजनकं तादर्थः। अननुगमपक्षे
च सत्संते निगमनव्युदास इति। अवयवांतरभेदः। हेत्वन्यतोदाहरणान्यत्वं। केचित्तु संत्यपदत्वपरिष्कारो व्यर्थ एव भेदे साहुस्तन्न। स्वघटकपदोत्तरपद

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग॰ टी॰ १३५ 135

घटितत्वं पादश्यासमुदायावृत्तितादृश्यासमुदायरूपत्वभिन्नत्वमिति परिष्कारस्य निष्प्रयोजनकत्वात्। घटितत्वस्य स्वघटकपदसाधारणतया समु
दायावृत्तित्वाद्याधारासंप्रदायमतमुपन्यस्यति पृथिवीत्वादिनाकेचिद्याचक्षते तदसंगतेनात्। तस्मादुक्तिमानित्यत्र स्वघटकविभक्त्यंतपदमध्ये यदंतं
मनुपपदं तदन्यार्थविशेष्यकबोधजनकत्वादाह। निगमनविशेषेति। एतच्च प्रयोजनं स्वघटकविभक्त्यंतपदमध्ये इत्यत्र पदस्य विभक्त्यंतत्वाविव
क्षणेन घटतइत्यत्रतत्रापि तद्विवक्षति। अंत्यपदशाऽऽरे इति। अंतइति। तथा चांसी भूतमनुपपदमित्रे दंपदार्थविशेष्यकबोधजनकत्वादति व्याप्ति
रित्यर्थः। उपनयस्येति। स्वघटकविभक्त्यंतपदप्रागभावासमानकालीनविभक्त्यंतभिन्नविभक्त्यंतपदेति। अंत्यपदयोर्विभक्त्यंतरूपयोरुपादानेपि स्वघटक
पदप्रागभावासमानकालीनत्वरूपांत्यत्वघटकपदं विभक्त्यंतमेव निवेश्यं। अन्यथोपनयनिगमनयोस्तद्घटकीभूते दंपदमनुपपदयोस्तद्घटकचरमसुप्
विभक्तिपदप्रागभावसमानकालीनतयातदन्यत्वविरहे तादृशान्यत्वाश्रयतदुत्तरकालीनवाक्यांतरघटकविभक्त्यंतपदभिन्नतयाविभक्त्यंततयाचाति
व्याप्तिवारणासंभवात्। तत्पदस्य विभक्त्यंतरूपस्योपादाने चांत्यपदभिन्नपदयोर्विभक्त्यंतत्वानुधावनं निष्फलं। उपनयनिगमनघटकयोरिदंपदमनुपप
दयोः स्वघटकविभक्त्यंतपदप्रागभावासमानकालीनतयांत्यभिन्नत्वासंभवेनातिव्याप्त्यभावादित्यर्थः। नचांत्यत्वघटकपदस्य विभक्त्यंतरूपस्य ग्रहणे एवदी
धितितात्पर्यं। तथा सति पदस्य विभक्त्यंतत्वाविवक्षणे निगमनवदुपनयेपि उक्तरीत्यातिव्याप्तिसंभवेन निगमनमात्राभिधानस्य निरभिप्रायकत्वापत्तेरिति राम॰
भावः। अत्रोक्तानुपपत्तिभयेनांत्यभिन्नपदस्य विभक्त्यंतरूपस्य विवक्षा वीजं स्पष्टमाह। वस्तुतस्त्विति। यत्रानुषंगपक्षे तस्मान्नेतराणीति निगमनमेव नोपगम्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ते। अनुषंगपक्षे च नञर्थमुख्यविशेष्यकबोधाजनकत्वस्यैव सत्त्वेन तदन्यत्वस्यैव दुर्घटत्वादिति। तन्न साधीयः। अनुयोग्यमिश्रितनञर्थविषयकमहावा
क्यार्थबोधानुपगमात्। अवांतरवाक्यार्थबोधे बाधकाभावात्। अन्यथा तादृशसंप्रदायसिद्धनिगमनापलापापत्तेरिति सिद्धांतमभिप्रेत्यैतदभिधानात्। केचित्तु
प्राचीनमते नेदं व्याहतिप्रदर्शनमित्याहुः। तथा चानुषंगपक्षेऽनुषक्तस्य निगमनघटकत्वं पक्षद्वये निगमनत्वसमनियमात् तत्तदनुसंधानं तु सामग्रीघट
कमात्रं। अपंपदांतर्भावेण निगमनत्वपक्षे तु न्यायावयवत्वं तदंतर्गतत्वमात्रं। नीलः पर्वतो वह्निमान् धूमादित्यादौ धूमाद्वह्निमान् पर्वत इति बोधस्यावांतरवा
क्यार्थबोधत्वाभावेन वादितात्पर्यगोचरतया स्वीयानंतपदार्थविशेष्यकान्वयबोधाजनकान्यत्वाभावेनैव वाक्यन्यायावयवत्वपर्यंतवैयर्थ्यात्। तथा च नि
गमनैकदेशे अतिव्याप्तिः। प्राचीनैस्त्वनुयोग्यमिश्रितनञर्थबोधकत्वादिभिस्तस्मान्नेतरागीत्समस्तवाक्यत्वस्वीकारादननुषंगपक्षे तन्मते व्याहतिरिति सिद्धम्। अलं
स्तराख्येऽलनेनांसपदस्य तथात्वात्तत्र विभक्त्यंतत्वविवक्षायां नदीषितितात्पर्यमिति संप्रदायमतदूषणानां रंस्तु चिंतं। नन्वेवमव्ययानामपि विभक्तिप्रकृतित्वेन
स्यात् तदर्थेनापि विभक्त्यर्थान्वयात् तथा च स्वः पुरुषार्थ इत्यादिप्रतिज्ञायामव्याप्तिः। तत्राह। स्वरादीति। अव्ययीभावसमासयोरिति। सुवंतान्वयस्यैवाव्ययीभा
वसमर्थपदत्वात्। न चार्थाभावेऽव्ययीभावविधानसामर्थ्यादसुवंतत्वेऽप्यव्ययीभावो भविष्यतीति नञ्भिन्नाव्ययेनार्थाभावेऽव्ययीभावानुपगमादिति वाच्यम्
। अव्ययं विभक्तीत्यनुशासनघटकस्याव्ययपदस्यैकतया केवलान्वयसुवंताव्ययरूपार्थद्वयासंभवात्। एवं चाव्ययांतरेण निर्मक्षिकमित्याद्यव्ययीभावोऽपि सि
ध्यतीत्यवधेयं। ननु नञः सुवंतत्वोपगमे घटः पटो न घटश्चेति विग्रहे असंभवान्नञ्घटादावतिव्याप्तिरत आह सुवंतेति। समासेति। अथ षष्ठ्यंतस्य विशेषणयो

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१

ग०टी० गोनेति व्युत्पत्तेः तदर्थस्य समासघटकपदोपस्थाप्ये समासाघटकपदार्थस्यानान्वयः। अन्यथा अद्दस्य राजमातंगइत्यादिप्रयोगापत्तेः राजाद्यद्वादिपदार्थयो

१३६ रुपतासत्त्वात्। एवं तद्धितांतस्य कृदंतस्य नामधातुपदस्य च घटकपदोपस्थाप्ये नात्तद्घटकपदार्थान्वयः। तेन पौत्रं न वैयाकरणाद्दत्यादौ अध्ययनरूपप्रत्यया

र्थैकदेशेन शोभनाद्यन्वयः। तत्कस्य हेतोरिति चेत्। आकांक्षाविरहात्। आकांक्षापि न समभिव्याहारमात्रं किंतु बोधविशेषे पदविशेष्ययोः समभिव्याहारः।

136 नामार्थयोरभेदबोधे च समानविभक्तिकनाम्नोः समभिव्याहारः उक्तस्थले च नास्तीति राजपदस्य निर्विभक्तिकत्वात्। न चैतावता यथा राजमातंगइति समा

सो वार्यते तद्वत् नञ्पदेन द्वंद्वसमासः कथं वार्यते नञर्थे इतरान्वयमात्रस्य वारणीयत्वादिति चेत्। शोभनेवनेचरन्त्याक्रोशार्थे अरूपापादास्याः पुत्रइत्यादेः सा

धुतावारणाय सापेक्षमसमर्थवद्वृत्तौ इत्यसामर्थ्यातिदेशात्। अन्यथा तत्र शोभनाद्यभेदान्वयबोधौपयिकाकांक्षासत्त्वेन शाब्दबोधापत्तेः। अत एव ऋद्धस्य रा

जमातंगइत्यादावपि राजपदोत्तरविभक्तिस्मृतिकल्पनेऽप्यसामर्थ्यमेव तथाविधप्रयोगवारकं शाब्दिकैरभिधीयते। सापेक्षत्वं च प्रकृतसमासाघटितविशेषपदार्था

न्वितस्वार्थपरत्वं। तादृशपदार्थान्वितस्वार्थो तात्पर्यकत्वमिति यावत्। नन्वेवमुत्तमो राजपुरुषः दर्शनीयो राजमातंगइत्यादेः साधुतापस्वार्थः प्रधानाभिन्नत्वेन वि

शेष्यः। प्राधान्यं च समासजन्यबोधे मुख्यविशेष्यत्वमेव। न च यवीयांसं राजपुरुषमानयेति प्रयोगो न स्यात्। सामासिकार्थस्य विभक्त्यर्थकर्मत्वेप्रकारत्वादिति वा

च्यम्। समासजन्यावांतरबोधे मुख्यविशेष्यतामादायोपपत्तेः। समासप्रयुक्तमुख्यविशेष्यतात्वं वा विवक्षणीयं। एवं च प्रकृतसमासे नञर्थस्य मुख्यविशे राम०

ष्यत्वान्नासामर्थ्यमित्याशंकावारणाय प्रतियोगीत्युक्तं। प्रधानीभूतस्वार्थैः भेदेनेतरनामार्थान्वये समासः नञु भेदेनेति भावः। एतेन नञ्धानार्थकबोधकप

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

दस्य सापेक्षत्वे समासस्य साधुत्वे शोभनाचित्रगुरिति समासापत्तिः मुख्यविशेष्यीभूतचित्रगोः स्वामिबोधकगोपदस्य प्रधानार्थबोधकत्वमात् तद्रूपस्याप्र
ति गविशेषणपदार्थान्वयसंभवादिति रत्नम्। तत्र स्वामिविशेषणस्य गोः प्रधानत्वात्। ननु प्रकृतसमासाघटकविशिष्टपदार्थान्वितप्रधानस्वार्थतात्पर्यक
त्वस्य सापेक्षत्वरूपत्वे कथं चैत्रस्य दासभार्या शरैः शातितपत्रो वृक्ष इत्यादिप्रयोगः दासत्वशातनादिरूपप्रधानस्वार्थस्य तथाविधचैत्रीयत्वशरकरणकत्व
सा रूपपदार्थान्वये न दासशातितादिपदस्य विभक्तत्वं न चैत्रशरादिपदसापेक्षतया समासासाधुत्वापत्तेः। अभेदेनेतरान्वयस्य सापेक्षताघटकत्वे चैत्रसं
बंधान्वयविवक्षया चैत्रस्य गोरूपमित्यादिप्रयोगापत्तेः। एवं चैत्रस्य समृद्धं धनमित्यर्थे चैत्रसखिधनमित्यादिसमासो न स्यात् पदत्रयतत्पुरुषाभा
वेन समृद्धं सखिधनमिति समासानंतरं चैत्रस्य सखिधनं चैत्रसखिधनमिति समासस्यादरणीयत्वात्। तथा सति चैत्रसंबंधिन एव प्रकृत
समासानिविष्टचैत्रपदलक्ष्यार्थस्याभेदेन सखिपदार्थान्वयात्। चैत्रस्य सखा चैत्रसखा तस्य धनमिति समासादरे च सखिपदोत्तरं समासांतटच्प्र
त्ययप्रसंगो न चैत्रसखधनमित्येव प्रयोगः स्यात्। एतेन कारकप्रतियोगिपदातिरिक्तपदसापेक्षपदेनैव न समासः तदुक्तं प्रतियोगिपदादन्यद्यदन्यत्का
रकादपि। वृत्तिशब्दैकदेशेन न तस्यान्वय इष्यते इति। कारकप्रतियोगिभ्यां यदि चान्यदपेक्षते सापेक्षत्वादसामर्थ्यं इति तत्र तु नेष्यते इति च। चैत्रस्य दास
भार्येत्यादौ दासत्वं सप्रतियोगिकमिति चैत्रादिपदस्य समासपदार्थस्य प्रतियोगिबोधकतया शरैः शातितपत्र इत्यादौ शातनादिक्रियायां शरादिः का
रकमिति शरादिपदस्य समासस्थपदार्थक्रियाकारकबोधकतया च समासः साधुरिति निरस्तं। चैत्रसखिधनमित्यादौ चैत्रसंबंध्यर्थकचैत्रादिपदस्यापति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग॰टी॰

योगिपदत्वाभावात् । चैत्रादिसंबंधिनः स्वत्वाद्यप्रतियोगित्वात् मैवम् । यत्र हि विशेष्यरूपे समस्यमानपदार्थे इतरान्वयविवक्षा तत्र न समासः । यत्र
चैतादृशपदार्थतावच्छेदक एव तदन्वयस्तत्र भवत्येव । चैत्रस्य दासभार्येत्यादौ दासत्व एव चैत्रादिसंबंधान्वयः न तु दासपदार्थदासे । पौरैः प्रातितपत्र
इत्यादौ प्रातिनेयारकरणत्वान्वयः न तु प्रातितपदार्थे शातनकर्मणि अतो भवत्येव समासः । चैत्रस्य स्वविधनमित्यादावपि स्ववित्त्वे एव चैत्रसंबंधस्यान्व
यः न तु स्वविपदार्थे स्वत्वे इति नानुपपत्तिः । न चैवं दासत्वादौ प्रमेयपदार्थान्वयविवक्षायां प्रमेयस्य दासभार्येत्यपि प्रयोगः स्यात् प्रमेयो दास इत्यादाव
पि दासत्वादावभेदेन प्रमेयाद्यभेदान्वयाभावेन तत्राभेदेनान्वयस्याव्युत्पन्नत्वात् । षष्ठ्याद्युपस्थितप्रतियोगित्वस्य लक्षणया नामोपस्थाप्यत्वप्रतियो
गिकस्य च भेदाभेदसंबंधाभ्यां स्वसंबंधिकदासत्वादावन्वयोत्पत्तिसिद्ध एव चैत्रस्य दासश्चैत्रदास इत्यादौ तादृशबोधोदयात् अतः चैत्रस्य दासभार्येत्या
दि समासनिर्वाहः । पितुः स्वर्गकाय इत्यादौ तु स्वर्गपदार्थस्वर्गादौ न पित्रादिसंबंधान्वयः किं तु कामनायामेव स्वर्गभागित्वेन विषयताविशेषस्य पित्रादि
संबंधस्यान्वयः । अत एव पितुः स्वर्गकामेऽपि न तादृशबोधस्यायोग्यता । न चैवमपि कामनाबोधकपदस्य सापेक्षतया समासो न स्यात् तत्सदस्य प्रधाना
र्थकत्वेऽपि प्रधानार्थकपदस्याप्रधानार्थे इतरान्वयेन सापेक्षत्वात् । अन्यथा शोभनश्चित्रगुरित्यत्रापि गवादौ शोभनान्वयविवक्षायां समासापत्तेरि राम
ति वाच्यम् । क्रियाभिन्नप्रधानार्थकपदोपस्थाप्ये एकदेशे इतरान्वये नैव प्रधानार्थकपदस्य सापेक्षतया असामर्थ्यप्रयोजकत्वोपगमात् । प्रकृते काम
नायाः क्रियात्वेनानुपपत्त्यभावात् । एवं चैत्रस्य प्रकृतोपकारकोयमित्यादावप्यूह्यं । क्रियाभिन्नत्वं च तत्प्रतियोगिकान्यत्वमपि विशेषणं देयं । तेन चैत्रस्य

पं१

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्वपुत्रो यमित्यादौ पुत्रत्वादौ चैत्रसंबंधानुयोगित्वेपि न समासानुपपत्तिः। न चैवं चैत्रस्य दुष्टपुत्रो मैत्र इत्यादिरपि प्रयोगः स्यात्। इष्टत्वादिति दिक्
शाब्दबोधो यथिकेति। केचित्तु विभक्त्यंतत्वं विभक्त्यर्थान्वयित्वं तद्धि पमे यमित्यादौ चतद्धीत्यादाविव लुप्तविभक्त्या एकत्वप्रत्याय्यत इति नाव्याप्तिः।
ननूक्त विभक्तेः स्वार्थाविवक्षया न तस्मान्नेतद्राणीत्यादाववतिव्याप्तिः। निपातसमभिव्याहृतविभक्तेस्तत्तदर्थान्वितस्वार्थबोधस्य केनाप्यनंगीकारादि
ति प्राञ्चः। स्वरादीति। सोऽयमणी यमित्यादौ। अत्र वदंति। एतल्लक्षणे तत्पदवत्त्वं स्वार्थमेव तथा हि स्वीयानंतपदे त्वस्य तत्पदभिन्नपदे त्वर्थः। तत्रानंत
त्वं स्वघटकपदप्रागभावसमानकालीनत्वं। तथा च स्वघटकविभक्तिप्रागभावसमानकालीनविभक्त्यंतार्थविशेष्यकान्वयबोधजनकत्वं ता
दृशान्वयबोधजनकतायाः दृशयाः दृशसमुदायावृत्तिता दृशतादृशसमुदायात्मकं यत्त्वं तदन्यत्वं वा समुदायार्थः। धूमादित्यादौ च स्वघटकपंचमी
विभक्तिप्रागभावकालीनविभक्तेरप्रसिद्ध्या नातिव्याप्तिः। उपनयनिगमनयोश्च स्वघटकपदप्रागभावाकालीनपदं दृढं पदोत्तरामत्तुप्पदोत्तरा च वि
भक्तिः तदंतार्थविशेष्यकान्वयबोधजनकत्वादेव नातिव्याप्तिरिति। एतेन स्वघटकविभक्त्युत्तरविभक्त्याघटितत्वं तदन्यत्वमप्यनादेयमेवेति। व
स्तुतस्तु स्वघटकपदप्रतियोगिकयावद्ध्वंसाधिकरणोत्पत्तिध्वंसप्रतियोगित्वं। प्रागभावाघटितमंतत्वं। यत्किंचिदेकध्वंसान्यस्वघटकयावद्ध्वंससमा
नकालीनत्वं तदित्यन्ये। पक्षसंसृष्टत्वेन प्रतीयमान इत्युक्तावव्याहृ। पाषाणमय इति। वाक्यादुदासीनता। पक्षतावच्छेदकावच्छिन्नविषयतानिरूपि
तस्वार्थविषयताप्रयोजकपदप्रयोज्यविषयतात्वेनोपादानस्पर्शिरोवेष्टनम्यापत्तत्वादाह। पक्षतेति। ननु स्वार्थैकदेशस्य स्वार्थत्वाभिमानमूलाति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

व्याप्तिशंकया प्रमेयत्वमित्यादिग्रंथो नावतारणीयः। किंतु चरमविषयतायाः विषयतात्वेन प्रवेशाभिमानमूलातिव्याप्तिशंकयैव तथा सति प्रका
ग०टी० रतारूपत्वविवक्षया तदुद्धारसंभवादित्यत आह। एवमिति। न तु द्वितीयविषयतायाः प्रकारतारूपत्वाभिधाने नायमतिप्रसंग इत्यत आह। पक्ष
१३८ तावच्छेदकेति। विशेषणतयेति। यत्किंचिद्विषयतानिरूपितप्रकारतानिरूपितेत्यर्थः। निगमनार्थस्येति। उपनयस्थेदंपदार्थेन प्रकारतेति भावः। पक्ष
साध्ययोरिति। प्रमेयत्वं प्रमेयमभिधेयत्वात् ज्ञेयत्वाभावो गोत्वाभाववान् सास्नाभावादित्यादौ। न च पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितविषयता
138 त्वेन तन्निरूपितविषयताप्रयोजकत्वनिवेशादेव निर्वाहात्कुड्यत्वमर्थमिति वाच्यम्। अभिधेयत्वव्याप्यप्रमेयत्ववांश्चायमित्युपनयार्थघटकप्र
मेयत्वरूपपक्षतावच्छेदकात्मकहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितेदंपदार्थविषयतात्वेन तन्निरूपितसाध्यार्थविषयताप्रयोजके निगमनेऽति
व्याप्तेः शुद्धत्वस्यावश्यकत्वात्। शुद्धत्वनिवेशवैयर्थ्यवादिमतमुपन्यस्यति। यत्विति। बाधकविरहेणेति। न च दंडि पुरुषवानिति बुद्धेः पुरुषादिनिष्ठप्र
ति कारतानिरूपितदंडादिनिष्ठविशेष्यतांशात्वेन दंडः पुरुषी न वेति संशयप्रतिबंधकत्वापत्तिः। दंडः पुरुषाभाववानिति बाधबुद्धिप्रतिबध्यतापत्तिश्चे
ति वाच्यम्। दंडत्वावच्छिन्नविशेष्यतात्वेन पुरुषत्वावच्छिन्नप्रकारतात्वेन निरूप्यनिरूपकभावानुपगमात्। दंडवान् पुरुषः पुरुषवांश्च देश इति समू
हालंबनाभेदवारणाय तयोरभेदोपगमः विषयतयोरभेदमते शुद्धत्वनिवेशावश्यकत्वं दर्शयितुं तयोरवच्छेद्यावच्छेदकभावमते तन्निवेशमाह। राम०
यद्देवेति। हेतुपक्षयोरिति। प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादावभिधेयत्वव्याप्यप्रमेयत्ववांश्चायं तस्मादभिधेयत्ववानिति बोधे अभेदविद्धेषिस्त्व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

च्छेदकतान्यप्रकारतादिस्वीकारेण तत्र दिहाप्रसंगतेरिति। यद्यपि तत्तत्तादृशविशेष्यतयोः सद्भावमात्रेण स्वस्वधर्मितावच्छेदकतापत्तिः सुवारा
तथापि अवच्छेद्यावच्छेदकभावापन्नसमानाधिकरणविशेष्यताद्वयसत्त्वे तथाविधप्रकारताविशेष्यतयोर्नावच्छेद्यावच्छेदकभावः सिध्येतु अ
नियमादिति विशेष्यतयोरप्यवच्छेद्यावच्छेदकभावोऽङ्गीकृतः। एवं च गुरुत्वनिवेशश्चावश्यक इति भावः। स्वार्थपदस्य द्वितीयस्य। निगमने तस्मा
दभिधेयत्ववानित्याकारको तादृशार्थेति। उपनयार्थपक्षे विशेषणतयान्वितसाध्यरूपार्थे स्वार्थः। अपिकारश्च प्रकृततातिव्याप्तिवारणे उभयोरन्यतर
स्यैवोपयोगित्वमार्थः। वस्तुतउपनयातिव्याप्तिवारणाय पगुर्ई पक्षतावच्छेदकावच्छिन्नेत्युपादानावश्यकत्वादुक्तं निगमनेऽतिव्याप्तिरेव नास्ती
ति विशेषणतया पक्षान्वितत्वं न निवेश्यं। पंचम्यर्थेति। धूमज्ञानज्ञाप्यत्वमिति बोधः। लक्षणात्रयमिति। प्रथमलक्षणान्तर्गतीयबोधघटितं द्वितीयंप्र
थमबोधघटितं तृतीयं च द्वितीयबोधघटितं। क्वचित्तथैव पाठः। स्वज्ञाप्यर्थेति। स्वं हेत्ववयवः। स्वार्थबोधः। स्वार्थमुख्यविशेष्यकबोधः। अव्यावर्त्त
कत्वात्। सर्वावयवार्थसाधारणत्वात्। स्वार्थविशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानविषयसर्वावयवार्थज्ञानस्य हेतुत्वादतिव्याप्ति
रतः स्वतात्पर्येति। अवयवजन्येति। न च गोत्वाभावो गोत्वाभावो गोत्वाभाववत्वादित्यादौ तादात्म्येन साध्येऽवयवप्रयोगस्य विशेष्यतावच्छेदकावच्छिन्नत
पर्यन्तोपादानेऽपि हेत्वर्थे विशिष्टसाध्यविशेष्यकबोधमादाय हेतावतिव्याप्तिः। घटो घट इतिवत् तादृशप्रतिज्ञाया एवासत्तात्। अननुषंगपक्षेऽवयव
प्रयोज्यमुख्यविशेष्यतानिरूपितस्वार्थप्रकारतया उपादानाद्वा अवयवघटकपदप्रयोज्यत्वं निवेश्यम्। अनुषंगपक्षे संग्रहेतुधूमाद्वह्निरिति बोधमादा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यद्दे तावतित्याप्तेरिति। स्वार्थप्रकारकेति। अन्यूनातिरिक्तविषयकबोधजनकतावच्छेदकविषयिताघटितलक्षणेऽनतिरिक्तपदप्रयोजनदानाया
ग॰टी॰ नुषंगपक्षोपन्यासेपि तदप्रामाणिकत्वमेवात तस्याप्रामाणिकत्वेपि निगमनत्वमपंपदांतर्भावेणैव तथैवमव्यवहारात्(जनकतावच्छेदकविषयिताघटि
तलक्षणेऽत्वनापत्त्याऽऽपंपदांतर्भावेण तथात्वमितिबोध्यं। मूलेहेतुविभक्तीति। प्रत्यर्थेहेतुविभक्त्यर्थान्वयोनप्णत् धूमादिनिष्ठजनकताप्रसिद्धेरिति
१३९ भावः। पुनस्तं तस्मादस्माहा। तथैवेति। धूमादिज्ञाननिष्ठजनकताबोधनस्यैवकुतोवह्निमानितिजिज्ञासानिवर्त्तत्वादित्यर्थः। कस्यचिल्लक्षणमाहा। अ
139 नुमितीतिहेत्वंतमव्याप्तिशंकायाअहेत्वंतमतिव्याप्तिशंकायाश्चवारणार्थं। तन्न्यायार्थज्ञानस्यमहावाक्यार्थबोधरूपस्यान्यादृशस्यबोपनयार्थवि
षयकत्वेनपरामर्शत्वेनानुमितिकारणत्वमित्यभिमानेनकारणांतमुपात्तमित्यभिप्रेत्यदूषयति। जातिंविनेति। परामर्शत्वंनजातिर्मानाभावात्।
जातित्वेपिमहावाक्यार्थबोधेतदनुपगमात्। अन्यरूपेणचनकारणत्वंमानाभावादिति अनुमितिकारणत्वंन्यायार्थबोधेनास्तीत्यसंभवइत्यर्थः। नन्वे
वंकारणांतंपरित्यज्यतांतथापिशेषस्यलक्षणत्वसंभवादित्यतआह। वाक्येति। जन्यत्वेनेति। धूमादित्युदासीनवाक्यजन्यबोधव्याप्त्यजन्यतावच्छेदकं
विनेत्यर्थः। दुर्ग्रहात्उदासीनतद्वाक्यातिव्याप्तवारकत्वात्। तत्साधारणपास्तुतस्याः प्रमाणाभावेन प्रागेव निराकरणादितिभावः। सामान्यलक्षणामुक्त्वा राम॰
विशेषलक्षणमाह। अन्वयेति। व्यतिरेकव्याप्तिविषयताशून्योपइतरान्वितस्वार्थबोधस्त्वजनकः तदुपस्थापकजिज्ञासाजनकबोधजनकन्यायाव
यवत्वमर्थः। हेतुविभक्तिमत्त्वंस्वरूपकीर्त्तनं। व्यतिरेकेति। अन्वयव्याप्तविषयकेतरान्वितस्वार्थबोधजनकत्वमर्थः। अन्वयेति। इतरान्वितोपावन्व

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पव्यतिरेकव्याप्तिघटितत्स्वार्थो तदुभयबोधजनकाकांक्षोत्थापकताकांक्षाजनकबोधजनकत्वे सतिन्यायावयवत्वमर्थः। वस्तुतस्तूदाहरणस्यैकव्या
प्तिमात्रबोधकत्वेनोक्तलक्षणासंभवग्रस्तत्वात्प्रागुक्तलिंगत्रैविध्याभिधानात्तदनुरोधेन हेत्वाद्यवयवत्रयं लक्षयति। यदेति। प्रकृतहेतुविशिष्ट
हेतुत्वविषयतावद्विभूतसाध्यविषयताशून्यशाब्दज्ञानजनकत्वे सति प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थितिजनकविभक्तिमन्न्यायावयवत्वा
दिरूपहेतुत्वं हेतुवचनार्थः। सपक्षवृत्तित्वं साध्यसामानाधिकरण्यं विपक्षव्यावृत्तत्वं साध्याभाववदवृत्तित्वं आभ्यां व्यतिरेकिसाध्यसाध्यसामानाधि
करण्येन लिंगज्ञानकालीनत्वं तद्घटकशाब्दबोधविशेषणं विवक्षितं शेषवैयर्थ्यात्। एतदेवागृहीतस्वसामानाधिकरण्यकव्यतिरेकिसाध्यक
शाब्दबोधघटितं केवलव्यतिरेकिहेतुलक्षणं। एतस्मात्तेव्यतिरेकिसाध्यकएवान्वयसहचारग्रहाग्रहाभ्यां अन्वयव्यतिरेकित्वकेवलव्यतिरेकित्वव्य
वहारात्। केवलान्वयिहेतुलक्षणमाह। अत्यंताभावेति। तादृशसाध्यसमानाधिकरणत्वेन लिंगज्ञानकालीनत्वं तद्घटकशाब्दबोधविशेषणं। शे
षवैयर्थ्यात्। वस्तुतस्तु स्वार्थविशिष्टगृहीतान्वयव्यतिरेकिसाध्यवैशिष्ट्यावगाहिशाब्दज्ञानजनकत्वमन्वयव्यतिरेकिहेतुत्वं। स्वार्थविशिष्टागृ
हीतान्वयव्यतिरेकिसाध्यवैशिष्ट्यावगाहित्वघटितं व्यतिरेकिहेतुत्वं स्वार्थविशिष्टात्यंताभावाप्रतियोगिसाध्यवैशिष्ट्यावगाहित्वघटितं अन्वयि
हेतुत्वं शेषं मूले स्वरूपकीर्तनं। व्याप्तिग्राहकसहचारभेदएव हेत्वयवभेदकः। व्यतिरेकव्याप्त्यभावादितिप्रतमनुसृत्य विशेषलक्षणत्रयमाह। पदे
ति। कारणं तन्न्यायावयवत्वार्थकं। साध्याविषयकत्वं प्रकृतहेतुविशिष्टहेतुत्वविषयतावद्विभिन्नेण। हेतुविभक्तिमत्त्वं प्रकृतसाध्यान्वयबोधनक्षमा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

र्थोपस्थितिजनकहेतुविभक्तिमत्त्वंहेतुपदंसंपाततायातं।अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वंवासर्वत्रप्रयोजनंपूर्ववत्तत्प्र
ग०टी० तीतसाध्यान्वयसाधनत्वंचव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं।स्वनिष्ठप्रकृतसाध्यविधेयिताप्रयोजकप्र
कृतव्याप्तिविषयताप्रयोजकसहचारविषयतात्वव्यापकप्रकृतव्याप्तिघटकसहचारविषयतात्वकानुमितिकरणत्वमितियावत्।तद्वाचकत्वंन
२८० विशेषणांज्ञानानुमानमतेबाधात्।किंतुतथाविधकरणज्ञानविषयप्रकृतहेतुतावच्छेदकावच्छिन्नविषयताकत्वंप्रकृतसाध्यविषयतानिरूपितवि
षयताविशेषणं।अप्रतीतेति।स्वनिष्ठप्रकृतसाध्यविधेयताप्रयोजकप्रकृतव्याप्तिविषयताप्रयोजकसहचारविषयतात्वव्यापकप्रकृतव्याप्त्य
140 घटकव्यतिरेकसहचारविषयतात्वकानुमितिकरणज्ञानविषयप्रकृतहेतुविषयतानिरूपितत्वमर्थः।प्रकृतव्याप्त्यघटकव्यतिरेकपदोविकल्पेनोपा
दानं।एतच्चतथाविधसहचारविषयतात्वव्यापकप्रकृतव्याप्तिघटकतद्घटकसहचारविषयतात्वकानुमितिकरणज्ञानविषयप्रकृतहेतुविषयताक
त्वरूपंविशेषणांप्रवेश्यान्वयव्यतिरेकिहेत्ववयवलक्षणंबोध्यं।केचित्तुपक्षेतिह्रदोद्देश्यंधूमादिसाध्येआभासीभूतहेत्ववयवेऽतिव्याप्तेःपक्षवृत्तित्वनिवे
शः।पृथिवीतरेभ्योभिद्यतेपृथिवीत्वादित्यादौव्यतिरेकिणितद्व्याप्तेःसपक्षवृत्तित्वनिवेशः।सपक्षत्वंनिश्चयगर्भं।धूमवान्वह्नेरित्यादौमासेइदंवा पा
च्यंज्ञेयत्वादित्यादौकेवलान्वयिनिचातिव्याप्तेर्विपक्षव्यावृत्तत्वनिवेशः।विपक्षत्वंनिश्चयागर्भं।तेनवह्निमान्धूमादित्यादौपर्वतोनिर्वह्निरितिज्ञान रम०
दशायांनातिव्याप्तिः।एतन्मतेपूर्वोक्तकेवलान्वयिहेतुलक्षणंनसम्यक्।पर्वतोवह्निमान्धूमादित्यन्वयव्यतिरेकिण्यपतिव्याप्तिरतःकेवलान्वयिहेतुल

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

लक्षणमाह। असंतेति। एतन्मते केवलान्वयिसाधकः सर्वोपि लक्ष्यः। आकाशाभाववत्त्वाभावो नास्तीत्याशयेनेदं। तेनाकाशाभाववादिसाधकस्य नासंग्रहः
।प्रतियोगितानवच्छेदकस्साध्यतावच्छेदकावच्छिन्नत्वनिवेशान्नासंभवः। अनवच्छेदकांतोपादानादन्वयव्यतिरेकिहेत्ववयवेऽतिव्याप्तिः। सर्वप्रमेयं
प्रमेयत्वादित्यनुपसंहारिहेत्ववयववारणाय सपक्षत्वनिवेशः। सपक्षत्वं निश्चयगर्भमतो न तद्दोषतादवस्थ्यम्। आचार्यमते तु विशेषे वृत्त्यादिसा
धकधूमादेरन्वयितया तन्मतमनुवर्त्तमान आह। यद्वेति। कारणं तन्न्यायावयवपर्वार्थकमुदासीनवाक्यवारणाय धूमादालोकवानित्यादिप्रतिज्ञादिवारणा
य जनकांतं। प्रकृतहेतुविशिष्टहेतुत्वविषयता वह्निमान्वेन साध्याविषयकत्वनिवेशात् पर्वतो वह्निमान् वह्निसामग्रीमत्त्वादित्यादावव्याप्तिः। व्यतिरे
किहेत्ववयववारणाय बोधकांतं। प्रतीतः साध्यान्वयः साध्यसहचारमात्रं येन दृष्टांतपदार्थेन तद्बोधके तथा। प्रतीतान्वयपदं ध्येतिपाठे व्याख्यासेन साध्या
न्वयो बोध्यः। एतन्मतेऽन्वयव्यतिरेकिणि कदाचिद्व्याप्तियोगात् पूर्वोक्तव्यतिरेकिहेत्ववयवलक्षणातिव्याप्तिरतस्तल्लक्षणमाह। एतदेवेति। प्रतीतो यस्य
सहचारकत्वघटितमन्वयव्यतिरेकिलक्षणं द्रष्टव्यमित्याहुः। मीमांसके तु प्रतिज्ञादित्रिकं वा पियद्वोदाहरणादिकमिति मतभेदेन लक्षणत्रयं प्रदर्श्य पक्षध
र्मताया अप्रदर्शनात्प्रतिज्ञादित्रिकस्यालक्ष्यता द्व्यवयववादिभिः विपक्षधर्मताप्रदर्शकांतर्भावेणोक्तलक्षणस्वीकारात् तद्व्यावर्त्यसमाधानं धूमादिति
न हेतुः किंतु धूमवत्त्वादित्येवं तथा च हेतुसंबंधिनः पञ्चांतपदस्य लाभमात्रं दोषद्वयमिति हि तं दूषयति। कथायामिति। व्याप्तिपक्षधर्मतामात्रप्रदर्शकाव
यवद्वयवादिबोधानामपि हेतुसाध्ययोर्व्याप्यव्यापकभावाप्रदर्शने आकांक्षितव्याप्तिप्रदर्शनासंभवात्प्रतिज्ञाहेतूभयप्रदर्शनमावश्यकं। उपनय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग.टी.
३४३
141

त्वग्रैम्यवस्थाप्यः। एवं पक्षे साध्यस्यप्रतिज्ञात अवगमेपि दोषविशेषजन्यबाधशंकानुच्छेदात् निगमनप्रदर्शनमिति पंचानामवयववत्वसिद्धौ मनुप
आधिकमित्यर्थः। अपार्थक विशेषः। अन्वयबोधाजनकः। हेतुप्रयोगानंतरं उदाहरणमेव नोपनयइत्यत्र विनिगमकमाह। व्याप्तेः। प्राथम्यादिति। स्वा
यार्थज्ञानानंतरं मध्यस्थेपरामर्शो ज्ञायते तत्र व्याप्तेः प्रकारतावच्छेदकत्वादित्यर्थः। अवच्छेदकाभिलापपूर्वकप्रकाराभिलापादिति भावः। यद्वा कथम
स्यगमकत्वमिति जिज्ञासायाः गमकत्वोपयिकलिंगनिष्ठप्रकारविषयकत्वादित्यर्थः। अनुमितीति। जनकीभूतन्यायावयवार्थकं। तद्धर्मधर्मितावच्छेद
कतद्धर्मव्यापकताविशिष्टवैशिष्ट्यावगाहिताप्रयोजकविषयताश्रयवीप्सावत्वं विशेष्यदलार्थः। योयो धूमवान्सवह्निमानित्यादौ स्वघटकीभूतवीप्सा
समभिव्याहृतसाध्यबोधकपदस्य हेतुव्यापकताविशिष्टसाध्ये लक्षणा योयो नवह्निमान्सनधूमवानित्यादौ तु तथाविधहेत्वभावबोधकपदस्य साध्याभा
वव्यापकताविशिष्टहेत्वभावे लक्षणा। प्रयोजकीभूतसमभिव्याहारविषयताघटकवीप्साविषयतायाः प्रयोजकत्वाल्लक्षणासमन्वयः। यत्र गोत्वं तत्र गो
त्वमित्युदाहरणस्यसंग्राह्यत्वे तु प्रकारः परिचिंतनीयः। योयो वह्निमान्सतेजस्वीत्यादिवाक्यवारणं तु प्रकृतन्यायावयवत्वविशेषणेनेति भावः। विशे
षणालक्षणद्वयमाह। साध्येति। प्रकृतहेतुधर्मितावच्छेदककप्रकृतहेतुव्यापकताविशिष्टसाध्यवैशिष्ट्यावगाहित्वप्रयोजकविषयताश्रयवीप्सा एम.
वत्त्वं प्रकृतसाध्याभावधर्मितावच्छेदककतद्व्यापकताविशिष्टसाधनाभाववैशिष्ट्यावगाहित्वप्रयोजकविषयताश्रयवीप्सावृद्धाक्यत्वं चार्थः। तादृश
साध्यतादृशसाधनाभावावगाहितान्यतरघटितं तु न सामान्यलक्षणं केवलान्वयिन्यव्याप्तेरिति बोध्यं। प्राचां मतमाह। न्यायेति। न्यायावयवत्वे सति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

यथापदार्थान्वितस्वार्थबोधकनामोत्तरप्रथमावत्त्वमर्थः। यथापदार्थस्य हेत्वादिमतिहेतुव्यापकताविशिष्टसाध्यादिमत्त्वमेव। एतन्मते वाक्यद्वयात्म
कमुदाहरणं। यथापदार्थः क इति जिज्ञासायामुदाहरणाय। प्रथमवाक्यस्यावश्यकत्वे इति। सामयिकत्वेन मया स दृष्टान्तमेवोदाहरणं प्रयोजकमित्यभिमित्यभिलापवि
शेषनियंत्रितत्वेन। असार्वत्रिकत्वात्। सकलोदाहरणाघटकत्वात् तथा चाव्याप्तिरिति भावः। स्वलक्षणेऽव्याप्तिशंकां निरस्यति। यो यइति। इत्येवइति वा
कादेव। व्याप्तिर्व्यापकत्वं। प्रकृतेति। तस्यस्यसाध्यकानुमितिजनकज्ञानविषयव्याप्तिबोधकत्वे सति न्यायावयवत्वं तत्तत्साध्यकानुमितिप्रयोजकोदाहरण
त्वमित्यर्थः। उपनयेति। इदमापाततः। व्याप्तिबोधस्य पक्षधर्मताविषयकत्वेन विशेषणात्। पंचमविषयतांशे विशेषणात् तथा प्रकृतानुमितिजनकतावच्छे
दकतापर्याप्त्यधिकरणधर्मवद्विषयकत्वे सति चतुर्थविषयताशून्यबोधजनकत्वे सति न्यायावयवत्वं समुदायार्थः। उपनयेत्यादि। उपनयजन्यशाब्द
बोधनिवर्त्यायाः जिज्ञासायाः कः साध्यव्याप्यवानित्याकारिकायाः जनकत्वे सति न्यायावयवत्वमर्थः। पक्षः साध्यव्याप्यवान्न वेति संशयस्तु जिज्ञासाप्रयोजकः।
अन्वयेति। अन्वयव्याप्तिबोधकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वमन्वय्युदाहरणत्वं। व्यतिरेकव्याप्तिबोधकोपनयप्रयोजकजि
ज्ञासाजनकत्वे सति न्यायावयवत्वं व्यतिरेक्युदाहरणत्वं। अन्वयव्यतिरेक्युदाहरणं च नास्त्येवेति भावः। गादाधर्या। युगपत्सकलधर्मिप्रसाधनेच्छावीप्सेसा
शयेन शंकते। नन्विति। उद्देश्येति व्यभिचारशंकानिवृत्तौ सहचारग्रहे च मानसव्याप्तिग्रहे इत्यर्थः। तत्र व्यभिचारशंकानिवर्तकत्वं प्रदर्शयति। यावदिति। इदमु
पलक्षणं व्यतिरेक्युदाहरणे साध्याभाववति साधनाभाववत्तानिश्चयोऽपि विपरीतनिश्चयत्वेन तच्छंकाविरोधी बोध्यः। शाब्दतो व्याप्तिप्रसयार्थमेव व्याप्तिग्र

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्वापत्तेच्छारूपावीप्सेति मतं निराकर्तुमुपक्रमते। सर्वत्रैवेति। द्वित्वक्रपदसमभिव्याहारस्थले तत्पदार्थांशे विधेयबोधकपदस्य पदार्थविधेयव्यापकता
ग॰टी॰ विशिष्टस्वार्थे लक्षणेति निरस्यति। द्वित्वेत्यादियोगोपीत्यादिना। महानसत्वादिनेति। महानसत्वादिनोपस्थितेष्वधिकरणेषु साध्यवत्त्वप्रतीतावपि धूमवत्ता
१४२ वच्छेदेन वह्निमत्त्वाग्रहात्तद्रूपसामानाधिकरण्येन तेष्वेवाधिकरणेषु साध्याभावावगाहिव्यभिचारबुद्धेर्बाधकाभाव इत्यर्थः। इदमुपलक्षणं व्याप्तिबो
धानुपगमे धूमवत्त्वस्याधिकरणानामेव यत्र बुद्धिस्थता तत्र योयो वह्निमान् स धूमवानिति प्रयोगस्याप्रामाण्यापत्तेः। तादृशतत्तत्पदार्थेषु सर्वेषु धूमव
142 त्त्वाबाधात्। धूमवत्त्वाधिकरणस्य बुद्धिस्थत्वेन तत्पदार्थताविरहादित्यपि द्रष्टव्यम्। शब्दानुरोधादिनेति। अत्र तत्पदे न वीप्सेति न नियमः। किं तु वीप्सि
तत्पदसमभिव्याहृतपदार्थतावच्छेदकव्यापकत्वबोधे यत्र तात्पर्यं तत्र तत्पदे न वीप्सेत्येव यद्यप्यस्यापि मितादौ नाशप्रतियोगिताद्रूपकर्मत्वे महीपपात
व्यापकताबोधात्। यत्र तथाविधव्यापकताबोधेन तात्पर्यं तत्र तत्पदेऽपि वीप्सा यथा संचारितौ सादौ तत्रपतिं वराकर्त्तृकव्यत्यपक्रमेता विशिष्टमहीपाल
त्वव्यापकत्वस्यैव वर्णप्रातिवोधनासंभवात्। तादृशकर्मतात्वेनानुपस्थितेः। किं तु तत्तत्तद्विन्नकर्मकानीतव्यस्ययस्यसमानकालीनवैवर्त्यप्राप्तिमत्तद्वि
न्नमहीपालस्य समूहालंबनबोध इति। अत्रापि न। सकृदुच्चरितः सकृदर्थं गमयतीत्याकाराद्। द्वित्वादिपदस्य देनापि। द्विर्वचनस्याप्यदेशरूपतयापदभेदाभावात्। अवि
रोधमिति अथ सकृदुच्चरित इत्यत्र एकपदानुसंधानं उभयस्यार्थावोधकमिति नियमः। एकत्वं च समानार्थकपदान्तरानुसंधानासमवहितत्वमिति न संभ राम॰
वति। घटो घट इत्यादौ एकघटपदानुसंधानेऽनेकघटबोधकत्वेन व्यभिचारात्। न च तत्रैकपदेनैव स्वरूपपदान्तरलोपात्तत्प्रतिसंधानादेव नानाघटबोधः। ध्ये

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

घटपदानुसंधानस्य समानार्थकपदांतरानुसंधानासमवहितत्वरूपैकत्वाभावादुक्तनियमस्याप्यभंग इति वाच्यम्। तथापि घटावानयेत्यादौ एकेन धातुप
देनानयनद्वयबोधजनियमासंभवाद् [redacted] तानच प्रातिपदिकमंतर्भाव्य नियमोस्त्विति वाच्यम्। तथापि घटं पटं चानयेत्यादावेकेना
ना पि क्रियापदेन नानानयनादिबोधसंभवान्नानावृत्तिस्वीकारविरोधात्। एतेन नानावृत्तिविषयार्थबोधकत्वमिति नियमोपि प्रत्युक्तः। उक्तस्थले घटपटानयन
योरेकशब्देनैव बोधस्यापत्तेर्नानावृत्तिस्वीकारविरोधतादवस्थ्यात्। न चानेकवाक्यार्थबोधकत्वनियमः। घटावानयेत्यादौ घटद्वयरूपवाक्यार्थस्यैकत्वाद्घटं पटं चा
नयेत्यादौ घटानयनपटानयनरूपवाक्यार्थस्य भेदात्तात्पर्यमिति वाच्यम्। पदार्थभेदेन तद्भेदे तु वाक्यार्थभेदस्यावश्यकतया घटावानयेत्यादौ वाक्या
लै र्थभेदस्य विचारासहत्वात्। न चैकपदानुसंधानजन्यबोधे तदर्थनिष्ठानेकविषयताकत्वाभावनियमः। घटावानयेत्यादिशाब्दजन्यबोधे घटद्वयता
द्यवच्छिन्नघटद्वयादितदानयनत्वाद्यवच्छिन्नानयनद्वयविषयताया भिन्नैवा घटं पटं चानयेत्यादिशाब्दजन्यसमूहालंबनबोधे घटानयनत्वपटानय
नत्वादिरूपविभिन्नधर्मावच्छिन्नविषयताद्वयसमवच्छेदकभेदाद्भिद्यत इति नानुपपत्तिरिति वाच्यम्। घटावानयेत्यादिशाब्दजन्यबोधे एकघटानयनविष
यतायाः अपरघटानयनविषयताया अभेदे पत्रानयनेयद्वद्द्रव्यकर्मकत्वं वाधितं तदानयननिष्ठविषयताया तदानयनावृत्तितद्घटकर्मकत्वावच्छिन्नतद्घटा
नयनादिविषयताभेदेन तद्बोधस्य तदवृत्तिधर्मावच्छिन्नतन्निष्ठविषयताकत्वेन भ्रमत्वप्रसंगात्। तत्र विषयताभेदस्यावश्यकतया तत्रेतादृशनियमेपि
नयै १ व्यभिचारात्। तत्सदृशविषयकैकानुसंधानजन्यबोधे मिथोविलक्षणतदर्थविषयताकत्वाभावनियमः। मिथोविलक्षणत्वं च परस्परानवच्छिन्नप्रतिबंध

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

८

ग॰टी॰

१८३

143

कत्तावच्छेदकत्वं। घटंपटंचानयेत्यादिवाक्यात्समूहालंबनबोधे घटपटानयनविषयतयोरानयनं घटकर्मकं न वा आनयनं पटकर्मकं न वेत्यादिसंश
यनिरूपितप्रकारत्वानवच्छिन्नप्रतिबंधकतावच्छेदकतयामिथो वैलक्षण्यमित्यानयनपदाद्दृत्तिस्वीकारः। तत्स्वीकारे चैकमेकार्थबोधः। घटं वा नये
त्यादौ घटद्वयानयनविषयतात्वेन तद्विषयतयोर्निरुक्तवैलक्षण्यं विपरीतज्ञानस्य समानप्रकारकत्वे नैव प्रतिबंधकतया तद्वदानयनत्वनिष्ठो
करूपावच्छिन्नविषयतायास्तदानयने तद्वृत्तीयत्वकोटिकपारदृश्यसंशयविरोधितावच्छेदकत्वं अन्यघटानयननिष्ठतद्रूपावच्छिन्नविषयताया अपि
तदानयने तद्वृत्तीयत्वकोटिकसंशयविरोधितावच्छेदकत्वादिति वाच्यम्। घटपटावानयेत्यादिवाक्यात्समूहालंबनविलक्षणस्यानयनत्वावच्छिन्ने यु
गपद्घटपटकर्मकत्वोभयविशेषणकबोधस्योपपत्तेस्तादृशबोधीयघटकर्मकत्वावच्छिन्नतदानयनविषयतायाः पटकर्मकत्वावच्छिन्नतदानयन
विषयतायाश्च निरुक्तवैलक्षण्यस्यासत्त्वात्। तत्रावृत्त्याक्रमिकानयनद्वयबोधोपगमस्तु न संभवति तथासति घटपदपटपदयोः सामर्थ्याभावेन द्वंद्वानुप
पत्तेरेवम्। एकतत्पदानुसंधानजन्यबोधे एकविषयतानिरूपिततत्तदर्थविषयताद्वयाभावनियमः अभिप्रेतः। घटावानय घटपटावानयेत्यादौ आन
यनभेदेन विषयताभेदेपि तन्निरूपितानयनत्वप्रकारतारूपविषयताया एकैवोपेयते विषयभेदविरहात्। घटंपटंचानयेत्यादौ घटानयनं पटानयनं चे राम॰
ति समूहालंबनबोधोपगमे तत्तदानयनविषयतानिरूपितानयनत्वविषयताभिद्यते समूहालंबनस्य प्रत्येकज्ञानोत्पादकसामग्रीसमाजाधीनतया
प्रत्येकज्ञानीयविषयताद्वयनियामकवशादेव विषयताद्वयसंभवात् तत्रावृत्त्याक्रमेणानेकार्थबोधस्वीकार इति। एवं च यादृशस्थले एतत्पदविषय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

कमेकमनुसंधानमेमस्यदस्यार्थद्वयंबोधयत्विसाकारकतात्पर्यंतत्रघटंपटंचानयेत्यादौसमूहालंबनबोधस्योक्ततात्पर्यघटितज्ञानेकार्यबोधसामग्रीव
शेनोत्पादसंभवात्।तथाविधनियमेदर्शितेतात्पर्यानधीनत्वस्योद्देश्यविशेषणत्वावच्छेदकतयाप्रकृतेतत्त्वदेपितदविरोधइत्यर्थः।प्रकृतेचतुद्दिश्य
वाच्यित्वंप्रकांतवाच्यित्वोपलक्षणंदीधितिकाराणांविरूपोपस्थितयोरितिलिखितांचप्रक्रांतवाच्यित्वेएवनिर्भरः।समूहालंबनबोधोपिव्यापकत्वानव
गाहीतद्वगाहीवेतिदीधितिव्याख्यानावसरेग्रंथकारेणैवोक्तं।इदानींमुद्राहरणाभासानाह।मूलेइदंचेति।साधसाधनोभयाप्यविकलःइत्यादेराभा
सइत्यनेनान्वयः।धूमवान्वह्नेःवह्निमान्धूमादित्यादौदृष्टांतस्यायोगोलकस्यसाध्यवैकल्यंसाधनवैकल्यंचोदाहरणाभासः तदुभयमात्रयोनिरूप
कंयस्याव्याप्तेरितिव्युत्पत्त्यापर्वतोधूमवान्वह्नेरित्यादौयोवह्निमान्सधूमवानितिप्रकृतसाध्यसाधनव्याप्तिवैकल्यादाभासः।अनुपदर्शितान्वयं।
अनुपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेतिव्युत्पत्त्याइदंवाच्यंज्ञेयत्वादित्यादौयोयोवाच्यत्वाभाववान्सज्ञेयत्वाभाववानित्यनुपदर्शितान्वयव्याप्तिकत्वा
दाभासः।विपरीतोपदर्शितान्वयं।विपरीतक्रमेणोपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेतिव्युत्पत्त्यापर्वतोवह्निमान्धूमादित्यादौयोयोवह्निमान्सधूम
वानितिविपरीतक्रमेणोपदर्शितव्याप्तिकत्वादाभासः।अनुपदर्शितव्यतिरेकः।अनुपदर्शितोव्यतिरेकोव्यतिरेकव्याप्तिर्येनेतिव्युत्पत्त्या अयमेत
द्वटाभिन्नःएतद्वटत्वादित्यादौयएतद्वटत्ववान्सएतद्वटाभिन्नइतिअनुपदर्शितव्यतिरेकव्याप्तिकत्वादाभासः।विपरीतोपदर्शितव्यतिरेकः।विप
रीतक्रमेणोपदर्शितोव्यतिरेकोव्यतिरेकव्याप्तिर्येनेतिव्युत्पत्त्याउक्तस्थलेयोयएतद्वटत्वाभाववान्सएतद्वटभिन्नइतिविपरीतोपदर्शितव्यतिरेकव्या

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग॰टी॰
१४४
155

त्रिकत्वादाभासः। एवं च प्रकृतत्वसिध्योपयिकव्याप्तिप्रमानुपधायकत्वमाभासत्वप्रयोजकं बोध्यं॥ ॥व्याप्तमितिापक्षः साध्यव्याप्यहेतुमान्नवेत्याकां
क्षोपलक्षणमेतत्। साध्यनिष्ठव्यापकतानिरूपकहेतुमान्कइत्यर्थः। अनुमितीतिापक्षांशे। प्रकृतसाध्यानुमित्योपयिकव्याप्तिविशिष्टप्रकृतहेतुवै
शिष्ट्यावगाहिशाब्दज्ञानजनकत्वमर्थः। अवयवत्वं न्यायावयवत्वं। साध्येति। हेतुव्यापकत्वविशिष्टसाध्यवद्वृत्तित्वविशिष्टहेतुवैशिष्ट्यावगाहिशाब्द
बोधजनकत्वं बोधकं तार्थः। साध्येति साध्याभावव्यापकीभूताभावप्रतियोगिताविशिष्टहेतुवैशिष्ट्यावगाहिशाब्दबोधजनकत्वं बोधकं तार्थः। तृती
येति। प्रकृतसाध्यानुमित्योपयिकव्याप्तिविशिष्टपक्षधर्मताज्ञानस्योपनयमित्राद्लाभादित्यर्थः। तथा च तत्संपत्यर्थमुपनयस्यावश्यकइति भावः।
ननु मीमांसकानां विशिष्टपरामर्शोनानुमितिजनकइति किमुपनयनैयेनेत्यत आह। तदिति। मीमांसकैरनुमितिहेतुत्वेन विशिष्टज्ञानानुपगमे
पि तेषां व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यानुमित्योपयिकतयोपनयं विना तदसंभवादित्यर्थः। तथा चोपनयप्रयोगस्यावश्यकइतिभावः।
धूमवत्त्वादित्यादिहेतुप्रयोगाभिमानं निराकरोति। न चेति। हेतुवचनात्। हेत्ववयवात्। तस्य हेत्ववयवस्य कोत्र हेतुः। कुतः। पञ्चत्वेन। प्रयुक्तत्वेन। हेत्व
ति। प्रकृतहेतुविशिष्टहेतुत्वोपस्थापकत्वेनेत्यर्थः। अनतसरत्वात्। पक्षधर्मत्वबोधकत्वात्। पक्षधर्मतायाअनाकांक्षितत्वादिति भावः। प्रत्युतमनुपस्था राम॰
धिकमपिप्राग्युक्तं दुष्टत्वं। शंकते। वादीति। हेत्वंतादित्यर्थः। हेत्वंतेन पक्षे हेतुज्ञाप्यसाध्यवत्त्वात्परूपेनयोपयोग्यज्ञाप्यसाध्यवान्नत्वतद्धानितिसामान्यमुखी
व्याप्त्याहेतोपक्षधर्मतानुमानादेव निर्वाहादुपनयवैयर्थ्यमित्यर्थः। समाधत्ते। तदर्थस्येति हेत्वंतार्थस्य अस्तिद्भुत्वेन। हेत्वंतार्थजन्यज्ञानस्य वादिवाक्यज

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न्यत्वेनाभासमानत्वशंकाकलंकितत्वात् तदभावविशिष्टहेतुमत्तानिश्चयासंभवेन अज्ञानाक्षेपकत्वात् । पक्षे हेतुमत्तानुमापकत्वासंभवात् । अन्यथा । प्र
कारान्तरेणाहेतुमत्तानिश्चये माभासमानत्वाभावापेक्षत्वोपि ज्ञ वपवाधीनेतत्वतदभावानपेक्षत्वोपपत्तिरेतेति । प्रतिज्ञाजन्यशाब्दबोधानंतरं योयोयत्साध्य
वान् स तत्ज्ञापकहेतुमानिति व्याप्त्याताद्दशज्ञापकानुमानसंभवाद्धेतुत्ववपवाभिधानवैयर्थ्यप्रसंगादित्यर्थः । तथा च प्रतिज्ञाजन्यबोधस्याभासमानत्व
ज्ञानानात्मकं दितत्वाद्धेत्वभिधानस्यैवोपनयाभिधानस्याप्यावश्यकत्वमिति भावः । ननूपनयवाक्याभावेपि प्रतिज्ञाहेतुभ्यां साध्यवत्पक्षहेतोरूपस्थि
तेरुमध्यस्थाद्देः पक्षो हेतुमानिति पक्षधर्मतोपनीतमानसंभवादुपनयनैरर्थक्यमित्याशयेन शंकते । प्रतिपाद्यानामिति । मध्यस्थादीनां । स्वत एव उप
नयप्रयोगं विना । तदवगमः । हेतोपक्षधर्मतोपगमः । समाधत्ते । तेषामिति । प्रतिपाद्यानां । व्युत्पन्नेति । केषांचित्साकूपक्षे हेतुमत्ताज्ञानप्रसक्तिकेषांचित्तत
ज्ञात्तीति सर्वसाधारण्येन पक्षधर्मतोपनीतमानासंभवादित्यर्थः । एतच्च तद्व्युत्पत्तिकतदुपनीतमानेतद्व्युत्पत्तिकतदुपनायकज्ञानमेव हेतुरिति मतेन । उ
पनायकज्ञानमात्र हेतुत्वेप्याह । प्रतिपादकेनेति । वादिनेत्यर्थः । कः साध्यव्याप्यवानिति जिज्ञासायाः शाब्दबोधावगाहित्वेन तन्निवृत्त्यर्थं त्वव्यापारस्योन प
पप्रयोगरूपस्यावश्यकत्वादित्यर्थः । अ[illegible]निति जि[illegible]न्यथाकांक्षायाः ज्ञानावगाहित्वमुपगम्य तन्निवर्तकशाब्दानभिधाने । अवयवांतरेति । उक्तरीत्या
ज्ञापकोपनीतमानसंभवेन हेत्ववयवादेरनभिधानापत्तेरित्यर्थः । तत्रापि जिज्ञासायाः ज्ञानविषयकत्वोपगमसंभवादिति भावः । अनुमितीति । कारणांतं
। न्यायावयवार्थकं । प्रकृतसाध्यीयप्रकृतव्याप्तिविशिष्टप्रकृतपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यावगाहिबोधजनकत्वं वि

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

शेष्यदलार्थः। अनुषंगपक्षेचेदं। प्रतिज्ञायामतिव्याप्तिवारणाय विशिष्टांतं। तत्रापिधूमाद्वह्निमतः सधर्मीपर्वतो वह्निमानिति प्रतिज्ञावारणाय विशि
ग॰टी॰ ष्टांतं। वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वविशिष्टधूमाद्वह्निमतः सधर्मीपर्वतो वह्निमानिति प्रतिज्ञावारणाय प्रकृतपक्षनिवेशः। पर्वतो वह्निव्याप्यप
१४५ र्वतवृत्तिधूमाद्वह्निमान् धूमादित्यत्र प्रतिज्ञावारणाय प्रकृतसाध्यनिवेशः। प्रकृतसाध्यं च पक्षे यद्रूपावच्छिन्नबोधिकाः प्रतिज्ञाः संप्रदायसिद्धास्त
145 त्तद्रूपावच्छिन्नं एवं च तादृशात्तत्तद्रूपावच्छिन्नवैशिष्ट्यबोधानुकूलबोधजनकत्वमर्थः। नेमन्तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनानां संग्रहः। निगम
नवैयर्थ्यं शंकते। नचेति। पर्याप्तेः लाभात् तेन निगमनेन। अपर्यवसानात्। अनुमितिसामग्रीसंपादकत्वात्। अभिधानाभिधेययोः। अनुमित्यौपयि
कार्थबोधकशब्दतत्प्रतिपाद्ययोः। पर्यवसानं। पूर्णत्वं। अवश्यकतांतराणां। निगमनानां। ननु निगमनानंगीकारे पक्षः साध्यवानेवेति शंकायाः कथं नि
वृत्तिरित्यत आह। विपरीतेति। तत एव। साध्यव्याप्तिविशिष्टवैशिष्ट्यबोधकशब्दादेव। अन्यथा। तथाविधादुपनयात्तादृशशंकानिवृत्त्यनंगीकारे। तद
वारणाप्रसंगात्। विशेषदर्शनत्वरूपविरोधिताबीजसाम्यं व्युत्पादयति। नहीति। तथाच ग्राह्याभाववगाहित्वमिव ग्राह्याभावव्याप्तिविशिष्टवैशिष्ट्याव
गाहित्वं विशेषदर्शनत्वमेवेति निगमनं व्यर्थमितिभावः। शंकते। सिद्धेति। निगमनं सिद्धत्वविशिष्टसाध्यबोधकं तथा तच्छंकाविरोधीत्यर्थः। स्वरूपेति। मात्र
पदं सिद्धत्वविषयताव्यवच्छेदार्थं। तथाच वादिवाक्ये लक्षणाविरहाद्वह्निपदस्य न सिद्धत्वविशिष्टवह्निरूपस्थापकत्वं किंतु वह्नित्वस्वरूपमात्रस्येति न सि राम॰
द्धत्वबोधसंभव इत्यर्थः। एतच्च सिद्धत्वं प्रमाणासिद्धत्वमित्याशयेन हेतुविभक्तिसाकांक्षताभावः सिद्धत्वमित्यत आह। साध्यत्वेति। तथा च निगमनघ

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

टकवह्निमत्त्वादेर्हेतुविभक्तिसाकांक्षत्वानुगमेन तत्साकांक्षत्वस्यैवासत्त्वेन तज्ज्ञानाभावात् वन्ह्यादौ हेतुविभक्त्यर्थान्वयेन स्यादित्यर्थः। जिज्ञासारूपा
कांक्षायावद्वाबुभुत्सेप्समभिव्याहाररूपाकांक्षायाः शाब्दबोधोपयिकत्वासंभवेनाकांक्षाज्ञानाभावासंभवादिति भावः। व्याप्तीति। बाधज्ञानंप्रति व्याप्ति-
विशिष्टवैशिष्ट्यावगाहित्वेनैव विरोधित्वाउपनयेच पक्षधर्मताज्ञानमात्रभानमित्याशयेनेदं। साध्येति। साध्यवत्ताज्ञानप्रतिबंधकत्वादित्यर्थः। तदभावेति।
अबाधितत्वादिबोधकनिगमनानुगमेदित्यर्थः। समीहितानिर्वाहादिति। अवयवांतरादबाधितत्वादिविशिष्टसाध्यबोधासंभवाद्बाधनिश्चयादितः
साध्यवत्ताज्ञानानुदयप्रसंगादित्यर्थः। साध्याभावनिश्चयोबाधइति तदभावोऽबाधितत्वम्। एवं सत्वेतिप्रसिद्धत्वंनिश्चयगर्भमित्याशयेनशंकतेऽथेति।
नन्वबाधितत्वबोधेऽनुमितिसत्वमित्यन्वयव्यतिरेकानुविधानमेवमानमित्यतआह। असिद्धेरिति। बाधसत्वेतिपक्षेणनिश्चयागर्भाविसाशयेन व्याप्ति
मुपन्यस्य समाधत्ते। यत्नानेत्यतीति। अन्वयइति। अबाधितत्वबोधकप्रत्यक्षाभावादितिभावः। हेत्वनाकांक्षितत्वलक्षणासिद्धत्वं अबाधितत्वादि। तथाच
वह्निपदसाधितत्वादिविशिष्टवह्नेर्लक्षणा। विभक्त्यर्थान्वयोनरमेवहेतुत्वेनेत्ययं विभक्त्यर्थान्वयेजातेपुनर्विभक्त्यर्थान्वयप्राप्त्यर्थानुपपत्त्यालक्षणेति
स्फुटयति। नत्विति। वस्तुतस्तुनिगमनात्साध्येसाध्यव्याप्यपक्षवृत्तिहेतुज्ञानज्ञाप्यत्वतत्समानदलप्रभासतेतद्धेतुकाअबाधितत्वादेरनुमितिरूपनयोवा
तत्रसाध्येहेतुविभक्त्यर्थान्वयः कथं सिद्धत्वादित्याशंकावारणायहेत्विति। ज्ञानादितिसत्त्वादित्यर्थः। हेतुविभक्त्यर्थान्वयप्रयोजककांक्षाशून्यत्वं हेत्वना
कांक्षितत्वंनतत्सत्वेपिनेहाकांक्षाप्रतिबंधोऽस्तिशुद्धहेतुज्ञाप्यत्वासिद्धावपिविशिष्टहेतुज्ञाप्यत्वासिद्धेरितिभावः। एवंचसाध्यांशेऽबाधितत्वादिबोधेतु

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

ग॰टी॰
१४६
156

पनमो पक्ष्यापि तत्साध्यव्याप्तिविशिष्टपक्षवृत्तित्वस्य न हेतुतावैयधिकरणात्। नापि तादृशपक्षवृत्तिहेतुकत्वस्य अप्रयोजकत्वशंकासत्त्वात् इति निगम
नानुधावनं। तथा सति साध्याभावस्य पक्षवृत्तित्वे प्रमात्मकपरामर्शजन्यप्रमाविषयत्वानुपपत्तिरूपतर्कसंभवान्न तच्छंकेति बोध्यं। तस्मात्तथेति निगम
नं। निराकर्तुमाहेति। अशेषरूपं व्याप्तिपक्षधर्मत्वोभयं। सिद्धस्थले मैत्रः पचति अयमपि तथेत्यादौ। लोकप्रसिद्धस्थले। विरोधः। उपक्रांतप्रतिज्ञयासहो
पसंहृतनिगमनस्यैकार्थबोधाजनकत्वरूपः। तस्मात्तथेत्युक्ते तत्सदृशप्रक्रांतार्थत्वान्नोक्तविरोधग्रहः। तस्माद्वह्निमानित्यभिधाने तु वह्निपदस्य तथात्वात्तप
तद्वह्निपदस्यान्य एवार्थ इति भ्रमेणोक्तविरोधग्रहापत्तिरित्यर्थः। अन्ये तु तस्मात्तथायमिति निगमने प्रतिज्ञया सहान्यूनार्थबोधाजनकत्वात्मको न विरोधः। तस्मा
द्वह्निमानित्यादौ तु पक्षाभावेन विरोध इत्याहुः। तच्चिंत्यम्। तथा सति तस्माद्वह्निमानयमिति निगमनेऽदोषात्। वस्तुतस्तु तस्माद्वह्निमानिति वाक्यं प्राचीनमते सं
प्रदायविरुद्धमेवासम्यक्। स्वरूपे। पूर्ववाक्यजन्यशाब्दबोधविशेष्ये। प्रकारे तथाविधशाब्दबोधविशेष्याभिन्नप्रकारे। सादृश्ये। तथाविधशाब्दबोधविशे
ष्यसादृश्ये। तथेति। हेतुमानित्यर्थः तथा शब्दाद्धेतुमदुपस्थितिः। ननु हेतुत्वज्ञानज्ञाप्यो हेतुमानिति शाब्दबोधोऽस्त्वित्यत आह। नहीति। तादृशज्ञाप्य
त्वस्योद्देश्यतावच्छेदकत्वे उद्देश्यालाभः। हेतुमत्त्वस्य तथात्वे च न तात्पर्यं अभेदे ज्ञाप्यज्ञापकभावान्वयस्याव्युत्पन्नत्वात् साध्य एव तस्माच्छब्दार्थान्वयाभिप्रा
याच्चेति भावः। पक्षस्योपनयजन्यबोधविशेष्यस्यापि सामान्यतोऽधिकरणत्वादिनाऽन्वयव्याप्तिघटकत्वेन प्रकारत्वात्। तन्नैव निगमनजन्यबोधीयप्रका
रान्वयो वाच्यः। पर्वतो हेतुमत्त्वज्ञानज्ञाप्य इति बोधे च न तात्पर्यमित्यर्थः। हेतुः पूर्वोक्त एव। अभेदेति। चकारो भिन्नक्रमः। तस्मादिति। उक्तनिगमनघटकत

राम॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

याशक्यार्थस्य दृष्टान्तपासंभवादित्यर्थः। घटो घटाभिन्नो घटत्वादित्यादौ घटस्य दृष्टो घटत्वाव्यापकत्वेन घटत्वव्याप्यत्वाभावात्। प्रमेयपक्षके भेदघटितपक्षे सा
दृष्टान्तप्रसिद्धेश्चेति भावः। ननु तथापदं बुद्धिस्थत्वेन साध्यबोधकमिति साध्ये पंचम्यर्थान्वयइत्यत आह। बहूनामिति। प्रक्रमे बुद्धिस्थे। विशिष्य नियमतः साध्ये
एव तदन्वयस्य दुर्वचत्वात्। अन्यस्यापि बुद्धिस्थत्वादिति भावः। नन्वन्यत्र बाधान्न पंचम्यर्थान्वयइत्यत आह। वादीति। वादिवाक्ये इति बुद्धिस्थे इत्यर्थः। योग्य
तया बाधाभाववत्त्वात्। पंचम्यर्थान्वयांगीकारेऽतिप्रसंगात्। बुद्धिस्थधूमसंयोगादावपि निगमनघटकपंचम्यर्थान्वयप्रसंगात्। तथा चोपक्रमोपसंहार
योर्विरोधो दुष्परिहर एवेति भावः। एतच्च तथा चायमित्युपनयदृष्टान्तोपलक्षणं। तदुपनये तथाशब्दस्य पूर्ववाक्यजन्यबुद्धिविशेष्यकार्थकत्वे हेतुमद्दृष्टा
न्तस्य तत्र विशेष्यत्वात्तत्रायं पदार्थान्वयः। तद्विशेष्यत्वे सति प्रकारार्थकत्वे तथाविधदृष्टान्त एव साहचर्यघटकत्वेन प्रकारे इत्युक्तदोषो दुर्वारः स्याद्दृष्टान्तार्थ
कत्वे च तादृशदृष्टान्तस्यादृष्टेऽयं पदार्थान्वयइति द्रष्टव्यम्। ननु तस्माद्वह्निमानिति निगमनवादिमतेपि कथं तद्घटकपंचम्यर्थान्वयः। तच्छब्दस्य बुद्धिस्थ
वाच्यतया घटादेर्बुद्धिस्थत्वेन तज्ज्ञाप्यत्वस्य साध्ये बाधादित्यत आह। तस्मादित्यत्रेति। साध्यान्वयि पंचम्यर्थज्ञाप्यत्वे योग्यतातात्पर्याभ्यां प्रकृतहेतोरेवान्वय
इत्यर्थः। ननु निगमनोत्तरं कुत इत्याकांक्षा कुतो न जायते इत्याशंकायामाह। तस्मादिति। विशिष्य सिद्धताप्रकृतसाध्ये हेतुविभक्त्यर्थान्वयनिराकांक्षता। साध्य
तयोक्तस्य। हेतुज्ञानज्ञाप्यत्वेन बोधितस्य। समर्थेति। व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वेन पुनर्बोधनादित्यर्थः। तथा च हेतुविभक्त्यर्थबोधोत्तरं बोधवि
षयविभक्त्यर्थवत्तल्लिंगेन तादृशनिराकांक्षतानुमितिराकांक्षाज्ञानविघटकेति न तादृशाकांक्षासंभवइति भावः। अन्यथा निगमनानंतरमनुमानान्तरबोधा

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पत्रे ३१

श्लोक ६००

ग॰टी॰ नेर्गीकारेनिगमनवैयर्थ्यप्रसंगात्। एतच्चाबाधितबोधइव निराकांक्षत्वबोधोपि निगमनप्रयोजनमितिमतेन। वस्तुतस्तु तस्मादित्यत एव हेतुसाध्यत्वस्य
लाभात्राकांक्षाप्रसक्तिः। नचहेतुसंबद्धसाध्ये तदाकांक्षा। तादृशसाध्यस्य वादिनाऽपरिग्रहात्। तादृशसाध्येमवद्भिरपि न निराकांक्षत्वबोधात्रपपादना चेति
१४७ । ननुसाध्यसंशयादेरपिअवयवत्वाज्जेषांपंचत्वकथनासंगतिरित्यतआह। संशयेति। प्रयोजनंसाध्यनिर्णयेच्छा। आदिनाहेत्वाकांक्षादयः। तत्सत्त्वांउचि
तानुपूर्वीकत्वघटितं आनुपूर्व्याःशाब्दधर्मत्वात्। न्यायांगत्वेन न्यायसंपादकत्वेनउपयुज्यंते। अपेक्ष्यंते। कंटकोद्धारस्यकोवह्निमान् कुतोवह्निमान् कथमस्य
147 गमकत्वमितिप्रश्नसमूहस्यसमयेपेति। कादाचित्कत्वादित्यर्थः। प्रकारांतरेणप्रतिवादिनस्तथाविधाकांक्षाबोधेन क्रमिकपंचवाक्यप्रयोगस्थलेकंट
कोद्धारासंभवादितिभावः॥ ॥ छ॥ इत्यवयवग्रंथेरुद्रभट्टीयम्॥ छ॥

राम॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative